Av.

DOUBLE NUMBER.

BIBLIOTHECA INDICA;


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, NOS. 491-492



पातञ्जलं योगसूत्रम् ।

राजमार्त्तण्डाख्यवृत्तिसहितम् ।

THE YOGA APHORISMS OF PATAÑJALI,

WITH THE

COMMENTARY OF BHOJA RA'JA'

AND AN ENGLISH TRANSLATION.

BY

RA'JENDRALA'LA MITRA, LL. D., C.I.E.

FASCICULUS IV & V.

CALCUTTA:

PRINTED BY J. W. THOMAS, AT THE BAPTIST MISSION PRESS.

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET.

1883.

Digitized by Google

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S LONDON AGENTS, MESSRS. TRÜBNER & CO.

57 AND 59, LUDGATE HILL, LONDON, E. C.

BIBLIOTHECA INDICA.

Sanskrit Series.

		Rs.	As.
1.	Atharvana Upanishads, (Sanskrit) Fasc. I—V @ /10/ each.. ..	3	2
2.	Aśvaláyana Grihya Sútra, (Sans.) Fasc. I—IV @ /10/ each ..	2	8
3.	Agni Puráṇa, (Sans.) Fasc. I—XIV @ /10/ each	8	12
4.	Aitareya Araṇyaka of the Rig Veda, (Sans.) Fasc. I—V @ /10/ each ..	3	2
5.	Aphorisms of Śáṇḍilya, (English) Fasc. I	0	10
6.	Aphorisms of the Vedánta, (Sans.) Fasc. III—XIII @ /10/ each ..	6	14
7.	Brahma Sútras, (English) Fasc. I	1	0
8.	Bhámatí, (Sans.) Fasc. I—VIII @ /10/ each	5	0
9.	Bṛihat Araṇyaka Upanishad, (Sans.) Fasc. II—IV, VI—IX @ /10/ each	4	6
10.	Ditto (English) Fasc. II—III @ /10/ each	1	4
11.	Bṛihat Saṃhitá, (Sans.) Fasc. I—III, V—VII @ /10/ each ..	3	12
12.	Chaitanya-Chandrodaya Nátaka, (Sans.) Fasc. II—III @ /10/ each ..	1	4
13.	Chaturvarga Chintámaṇi, (Sans.) Fasc. I—XL @ /10/ each ..	25	0
14.	Chhándogya Upanishad, (Sanskrit) Fasc. IV	0	10
15.	Ditto (English) Fasc. II	0	10
16.	Categories of the Nyáya Philosophy, (Sans.) Fasc. II	0	10
17.	Daśa Rúpa, (Sans.) Fasc. I—III @ /10/ each	1	14
18.	Gopatha Bráhmaṇa, (Sans. & Eng.) Fasc. I and II @ /10/ each ..	1	4
19.	Gopála Tápaní, (Sans.) Fasc. I	0	10
20.	Gobhilíya Grihya Sútra, (Sans.) Fasc. I—XII @ /10/ each.. ..	7	8
21.	Hindu Astronomy, (English) Fasc. I—III @ /10/ each	1	14
22.	Íśá Kena Kaṭha Praśna Muṇḍa Máṇḍukya Upanishads, (Sans.) Fasc. VI	0	10
23.	Kátantra, (Sans) Fasc. I—VI @ 1/ each	6	0

Continued on third page of cover.)

Digitized by Google

श्रीगणेशाय नमः ।

पातञ्जलं योगसूत्रम् ।

राजमार्त्तण्डाख्यवृत्तिसहितम् ।

देहार्द्धयोगः शिवयोः स श्रेयांसि तनोतु वः ।
दुष्प्रापमपि यत्स्मृत्या जनः कैवल्यमश्नुते ॥ १ ॥
त्रिविधान्यपि दुःखानि यदनुस्मरणान्नृणाम् ।
प्रयान्ति सद्यो विलयं तं स्तुमः शिवमव्ययम् ॥ २ ॥
पतञ्जलिमुनेरुक्तिः काप्यपूर्व्वा जयत्यसौ ।
पुम्प्रकृत्योर्व्वियोगोऽपि योग इत्युदितो यया ॥ ३ ॥
जयन्ति वाचः फणिभर्त्तुरन्तर-
स्फुरत्तमःस्तोमनिशाकरत्विषः ।
विभाव्यमानाः सततं मनांसि याः
सतां सदानन्दमयानि कुर्व्वते ॥ ४ ॥
ग्रन्थागामनुशासनं विदधता पातञ्जले कुर्व्वता
वृत्तिं राजमृगाङ्कसञ्ज्ञमपि च व्यातन्वता वैद्यके ।
वाक्चेतोवपुषां मलः फणभृतां भर्त्रैव येनोद्धृत-
स्तस्य श्रीरणरङ्गमल्लनृपतेर्वाचो जयन्त्युज्ज्वलाः ॥ ५ ॥

Digitized by Google

दुर्बोधं यदतीव तद्विजहति स्वष्टार्थमात्युक्तिभिः
स्वष्टार्थैश्चतिविस्तृतिं विदधति व्यर्थैः समासादिकैः ।
स्वस्थाने ऽनुपयोगिभिश्च बहुभिर्जल्पैर्भ्रमन्त्यन्वते
श्रोतॄणामिति वस्तुविप्लवकृतः सर्वेऽपि टीकाकृतः ॥ ६ ॥

उत्सृज्य विस्तरबृहत्त्व विकल्पजालं
*फल्गुप्रकाममवधार्य्य च सम्यगर्थान् ।
अन्तः पतञ्जलिमुनेः†र्विवृतिर्मयेय-
मातन्यते बुधजनप्रतिबोधहेतुः ‡ ॥ ७ ॥

अथ योगानुशासनम् ॥ १ ॥

अनेन सूत्रेण शास्त्रस्य सम्बन्धाभिधेयप्रयोजनान्याख्यायन्ते । §'अथ'शब्दोऽधिकारद्योतको मङ्गलार्थश्च । युक्तिः 'योगः' समाधानं, युजसमाधौ । अनुशिष्यते व्याख्यायते लक्षणस्वरूपभेदोपायफलैर्येन॥ तत् 'अनुशासनं' । योगस्यानुशासनं 'योगानुशासनं' । तत् आशास्त्रपरिसमाप्तेरधिकृतं वेदितव्यमित्यर्थः । तच्च शास्त्रस्य व्युत्पादकतया योगः समाधनः सफलोऽभिधेयः, तद्व्युत्पादनञ्च फलं, व्युत्पादि-

---

* फल्गुप्रकाममिति A फल्गुप्रकारमिति B चिह्नितपुस्तकपाठः ।

† अन्तः पतञ्जलिमते इति C पुस्तकपाठः ।

‡ बुधजनप्रतिपत्तिहेतुरिति B चिह्नितपुस्तकपाठः ।

§ मूलप्रकृतशब्दः वक्रचिह्नविशेषाभ्यां क्रोडीकृतः सर्वत्र । स च समस्तोऽसमस्तश्च गृहीतः ।

॥ लक्षणभेदोपायफलैर्येनेति नागापुस्तकपाठः । लक्षणभेदोपायैर्येनेति C चिह्नितपुस्तकपाठः ।

Digitized by Google

तस्य योगस्य कैवल्यं फलं। शास्त्राभिधेययोः प्रतिपाद्यप्रतिपादकभावलक्षणः सम्बन्धः, अभिधेयस्य योगस्य तत्फलस्य च कैवल्यस्य साध्यसाधनभावः। एतदुक्तं भवति, व्युत्पाद्यस्य योगस्य साधनानि शास्त्रेण प्रदर्श्यन्ते, तत्साधनसिद्धो योगः कैवल्याख्यं फलमुत्पादयतीति ॥ १ ॥

तत्र को योग इत्यत आह।

योगश्चित्तवृत्तिनिरोधः ॥ २ ॥

'चित्तस्य' निर्मलसत्त्वपरिणामरूपस्य याः 'वृत्तयः' ग्राह्यग्राहकभावपरिणामरूपास्तासां* 'निरोधः' बहिर्मुखपरिणतिविच्छेदादन्तर्मुखतया प्रतिलोमपरिणामेन स्वकारणे† लयः 'योगः', इत्याख्यायते। स च निरोधः सर्वासां चित्तस्य भूमीनां‡ सर्वप्राणिनां धर्मः कदाचित् कस्याञ्चिद्भुमावाविर्भवति। तत्र क्षिप्तं, मूढं, विक्षिप्तं, एकाग्रं, निरुद्धम् इति चित्तस्य भूमयः चित्तस्यावस्थाविशेषाः। तत्र क्षिप्तं, रजस उद्रेकादस्थिरं; बहिर्मुखतया सुखदुःखादिविषयेषु कल्पितेषु व्यवहितेषु सन्निहितेषु वा रजसा प्रेरितं। तत्र सदैव दैत्यदानवादीनाम्। मूढं, तमस उद्रेकात् कृत्याकृत्यविभागमन्तरेण क्रोधादिभिर्विरुद्धकृत्येष्वेव नियमितं। तत्र सदैव रक्षःपिशाचादीनाम्। विक्षिप्तं, सत्त्वोद्रेकादैश्वर्येण परिहृतदुःख-

---

* वृत्तयो निर्मलसत्त्वपरिणामरूपास्तासामिति बङ्गपुस्तकसम्मतः पाठः।

† स्वकारणे इति A चिह्नितपुस्तकपाठः।

‡ वृत्तीनामिति C चिह्नितपुस्तकपाठः।

Digitized by Google

[illegible] प्रहणं। तत्र तदेव देह- [illegible] तमसा परापकारविरतं, [illegible] तावस्था न [illegible] [illegible] द्वे च सत्त्वोत्कर्षापकर्षोत्तरभव- [illegible] भवेते [illegible] तत्क्रमभि- [illegible] तदर्थं रजसः प्रथम- [illegible] तत्त्वचित्तनिर्माणं प्रकाश्यते दर्शयितु- [illegible] तदर्थं पश्चात् प्रदर्शनं। [illegible] द्वयोर्योगयोर्विनावितिं अनयो- [illegible] परिणामः स [illegible] निरुद्धे [illegible] इति। अनयोरेव भूयो-

[illegible] विरोधपरिहारमपि व्याख्यातुकामः

[illegible] ॥ ३॥

[illegible] 'स्वरूपे' चित्तस्वरूपतायाम्, [illegible] तत्त्वविवेकख्यातेश्चित्तसत्त्व-

Digitized by Google

माभावात् कर्तव्याभिमाननिवृत्तौ प्रेक्षकस्थितिमात्रं, बुद्धावात्मनः स्वरूपेणावस्थानं स्थितिर्भवतीति ॥ ३ ॥

व्युत्थानदशायां तस्य किं स्वरूपमित्याह ।

वृत्तिसारूप्यमितरत्र ॥ ४ ॥

'इतरत्र' योगादन्यस्मिन् काले, वृत्तयो या वक्ष्यमाणलक्षणाः, ताभिः 'सारूप्यं' तद्रूपत्वं । अयमर्थः, यादृशो वृत्तयः सुख-दुःख-मोहात्मिकाः प्रादुर्भवन्ति, तादृग्रूप एव संवेद्यते व्यवहर्तृभिः पुरुषः । प्रतीयते* तदेवं, यस्मिन्नेकाग्रतया परिणते वस्तुनि चित्तस्य† स्वस्मिन् रूपे प्रतिष्ठानं भवति, यस्मिंश्चेन्द्रियवृत्तिद्वारेण विषयाकारेण परिणते पुरुषस्तदाकार इव परिभाव्यते, यथा जलतरङ्गेषु चलत्सु चन्द्रस्तत्रैव प्रतिभासते, तच्चित्तं ॥ ४ ॥

वृत्तिपदं व्याख्यातुमाह ।

वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः‡ ॥ ५ ॥

'वृत्तयः' चित्तस्य परिणामविशेषाः । वृत्तिसमुदायरूपस्यावयविनो या अवयवरूपा वृत्तयस्तदपेक्षया तयप्प्रत्ययः । एतदुक्तं भवति । पञ्च वृत्तयः । कीदृश्यः । 'क्लिष्टाऽक्लिष्टाः' । क्लेशैर्वक्ष्यमाणलक्षणैराक्रान्ताः 'क्लिष्टाः', तद्विपरीताः 'अक्लिष्टाः', ॥ ५ ॥

---

* प्रतीयते इतिपाठः B चिच्छिवपुस्तके नास्ति ।

† विविक्तचित्ते इति B चिच्छिवपुस्तकपाठः ।

‡ क्लिष्टा अक्लिष्टा इति B चिच्छिवपुस्तकपाठः । क्लिष्टा अक्लिष्टाश्च इति P चिच्छिवपुस्तकपाठः ।

Digitized by Google

साधनं* सुखसाधनेष्वेव ग्रन्थादिषु प्रवृत्तं। तच्च सदैव देवानाम्। एतदुक्तं भवति, रजसा प्रवृत्तिरूपं, तमसा परापकारनिरतं, सत्त्वेन सुखमयं चित्तं भवतीति। एतास्तिस्रश्चित्तावस्था न समाधावुपयोगिन्यः। एकाग्रनिरुद्धरूपे† द्वे च सत्त्वोत्कर्षाद्योत्तरमवस्थितत्वात् समाधावुपयोगं भजेते। सत्त्वादिक्रमव्युत्क्रमे त्वयमभिप्रायः, द्वयोरपि रजस्तमसोरत्यन्तहेयत्वं तदर्थं रजसः प्रथमसुपादानं। यावच्च प्रवृत्तिर्दर्शिता तावन्निवृत्तिर्न शक्यते दर्शयितुमिति द्वयोर्व्यत्ययेन प्रदर्शनं। सत्त्वस्य त्वेतदर्थं पश्चात् प्रदर्शनं। यत् तस्योत्कर्षेणोत्तरे द्वे भूमी योगोपयोगिन्याविति अनयोर्द्वयोरेकाग्रनिरुद्धयोर्भूमिकयोर्यश्चित्तस्यैकाग्रतारूपः परिणामः स योगः। किमुक्तं भवति, एकाग्रे बहिर्वृत्तेर्निरोधः, निरुद्धे सर्व्वासां वृत्तीनां ससंस्काराणां प्रविलय इति। अनयोरेव भूम्योर्योगस्य सम्भवः॥ २॥

इदानीं सूचकारश्चित्त-वृत्ति-निरोधपदानि व्याख्यातुकामः प्रथमं चित्तपदं व्याचष्टे।

तदा द्रष्टुः स्वरूपेऽवस्थानम्॥ ३॥

'द्रष्टुः' पुरुषस्य, तस्मिन् काले, 'स्वरूपे' चिन्मात्ररूपतायाम्, 'अवस्थानं' स्थितिः भवति। अयमर्थः, उत्पन्नविवेकख्यातेश्चित्तस्य-

---

* परिकल्पितदुःखसाधनेष्वेव इति F चिह्नितपुस्तकपाठः।

† एकाग्रनिरुद्धे त्वेवमिति B चिह्नितपुस्तकपाठः।

Digitized by Google

माभावात् कर्तृत्वाभिमाननिवृत्तौ प्रोन्मुक्तपरिणामाय, बुद्धावात्मनः स्वरूपेणावस्थानं स्थितिर्भवतीति ॥ ३ ॥

व्युत्थानदशायां तस्य किं स्वरूपमित्याह ।

वृत्तिसारूप्यमितरत्र ॥ ४ ॥

'इतरत्र' योगादन्यस्मिन् काले, वृत्तयो या वक्ष्यमाणलक्षणाः, ताभिः 'सारूप्यं' तद्रूपत्वं । अयमर्थः, यादृक्षो वृत्तयः सुख-दुःख-मोहात्मिकाः प्रादुर्भवन्ति, तादृग्रूप एव संवेद्यते व्यवहर्तृभिः पुरुषः । प्रतीयते* तदेवं, यस्मिन्नेकाग्रतया परिणते वस्तुनि चिच्छक्तेः† स्वस्मिन् रूपे प्रतिष्ठानं भवति, यस्मिंश्चेन्द्रियवृत्तिद्वारेण विषयाकारेण परिणते पुरुषस्तदाकार इव परिभाव्यते, यथा जलतरङ्गेषु चलत्सु चन्द्रस्यलन्निव प्रतिभासते, तच्चित्तं ॥ ४ ॥

वृत्तिपदं व्याख्यातुमाह ।

वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः‡ ॥ ५ ॥

'वृत्तयः' चित्तस्य परिणामविशेषाः । वृत्तिसमुदायरूपस्यावयविनो या अवयवरूपा वृत्तयस्तदपेक्षया तयप्प्रत्ययः । एतदुक्तं भवति । पञ्च वृत्तयः । कीदृश्यः । 'क्लिष्टाऽक्लिष्टाः' । क्लेशैर्वक्ष्यमाणलक्षणैराक्रान्ताः 'क्लिष्टाः', तद्विपरीताः 'अक्लिष्टाः', ॥ ५ ॥

---

* प्रतीयते इतिपाठः B चिच्छितपुस्तके नास्ति ।

† विविक्तचित्ते इति B चिच्छितपुस्तकपाठः ।

‡ क्लिष्टा अक्लिष्टा इति B चिच्छितपुस्तकपाठः । क्लिष्टा अक्लिष्टाश्च इति F चिच्छितपुस्तकपाठः ।

Digitized by Google

साधनं* सुखसाधनेष्वेव ब्रह्मादिषु प्रवृत्तं। तच्च सदैव देवानाम्। एतदुक्तं भवति, रजसा प्रवृत्तिरूपं, तमसा परापकारनिरतं, सत्त्वेन सुखमयं चित्तं भवतीति। एतास्तिस्रश्चित्तावस्था न समाधावुपयोगिन्यः। एकाग्रनिरुद्धरूपे† द्वे च सत्त्वोत्कर्षाद्यथोत्तरमवस्थितत्वात् समाधावुपयोगं भजेते। सत्त्वादिक्रमव्युत्क्रमे त्वयमभिप्रायः, द्वयोरपि रजस्तमसोरत्यन्तहेयत्वं तदर्थं रजसः प्रथमसुपादानं। यावच्च प्रवृत्तिर्दर्शिता तावन्निवृत्तिर्न शक्यते दर्शयितुमिति द्वयोर्व्यत्ययेन प्रदर्शनं। सत्त्वस्य त्वेतदर्थं पश्चात् प्रदर्शनं। यत् तस्योत्कर्षेणोत्तरे द्वे भूमी योगोपयोगिन्याविति अनयोर्द्वयोरेकाग्रनिरुद्धयोर्भूमिकयोर्यश्चित्तस्यैकाग्रतारूपः परिणामः स योगः। किमुक्तं भवति, एकाग्रे बहिर्वृत्तेर्निरोधः, निरुद्धे सर्व्वासां वृत्तीनां ससंस्काराणां प्रविलय इति। अनयोरेव भूयोर्योगस्य सम्भवः ॥ २ ॥

इदानीं सूत्रकारश्चित्त-वृत्ति-निरोधपदानि व्याख्यातुकामः प्रथमं चित्तपदं व्याचष्टे।

तदा द्रष्टुः स्वरूपेऽवस्थानम् ॥ ३॥

'द्रष्टुः' पुरुषस्य, तस्मिन् काले, 'स्वरूपे' चिन्मात्ररूपतायाम्, 'अवस्थानं' स्थितिः भवति। अयमर्थः, उत्पन्नविवेकख्यातेश्चित्तस्य

---

* परिक्षतदुःखसाधनेष्वेव इति F चिह्नितपुस्तकपाठः।

† एकाग्रनिरुद्धे त्वेवमिति B चिह्नितपुस्तकपाठः।

Digitized by Google

माभावात् कर्तृत्वाभिमाननिवृत्तौ प्रोन्मुक्तपरिणामाय, बुद्धावात्मनः स्वरूपेणावस्थानं स्थितिर्भवतीति ॥ ३ ॥

व्युत्थानदशायां तस्य किं स्वरूपमित्याह ।

वृत्तिसारूप्यमितरत्र ॥ ४ ॥

'इतरत्र' योगादन्यस्मिन् काले, वृत्तयो या वक्ष्यमाणलक्षणाः, ताभिः 'सारूप्यं' तद्रूपत्वं । अयमर्थः, यादृक्षो वृत्तयः सुख-दुःख-मोहात्मिकाः प्रादुर्भवन्ति, तादृग्रूप एव संवेद्यते व्यवहर्तृभिः पुरुषः । प्रतीयते* तदेवं, यस्मिन्नेकाग्रतया परिणते वस्तुनि चिच्छक्तेः† स्वस्मिन् रूपे प्रतिष्ठानं भवति, यस्मिंश्चेन्द्रियवृत्तिद्वारेण विषयाकारेण परिणते पुरुषस्तदाकार इव परिभाव्यते, यथा जलतरङ्गेषु चलत्सु चन्द्रस्तत्रैव प्रतिभासते, तच्चित्तं ॥ ४ ॥

वृत्तिपदं व्याख्यातुमाह ।

वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः‡ ॥ ५ ॥

'वृत्तयः' चित्तस्य परिणामविशेषाः । वृत्तिसमुदायरूपस्यावयविनो या अवयवरूपा वृत्तयस्तदपेक्षया तयप्प्रत्ययः । एतदुक्तं भवति । पञ्च वृत्तयः । कीदृश्यः । 'क्लिष्टाऽक्लिष्टाः' । क्लेशैर्वक्ष्यमाणलक्षणैराक्रान्ताः 'क्लिष्टाः', तद्विपरीताः 'अक्लिष्टाः', ॥ ५ ॥

---

* प्रतीयते इतिपाठः B चिक्कितपुस्तके नास्ति ।

† विविक्तचित्ते इति B चिक्कितपुस्तकपाठः ।

‡ क्लिष्टा अक्लिष्टा इति B चिक्कितपुस्तकपाठः । क्लिष्टा अक्लिष्टाश्च इति F चिक्कितपुस्तकपाठः ।

Digitized by Google

ता एव पञ्च वृत्तयः समुद्दिश्य व्याख्यायन्ते* ।

प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतयः ॥ ६ ॥

आसां क्रमेण लक्षणमाह ।

प्रत्यक्षानुमानागमाः प्रमाणानि ॥ ७ ॥

अतिप्रसिद्धत्वात् प्रमाणानां† शास्त्रकारेण भेदनिरूपणेनैवावगतत्वाल्लक्षणस्य,‡ न पृथक् तल्लक्षणं कृतम् । प्रमालक्षणन्तु अविसंवादिज्ञानं, तत्करणं प्रमाणमिति । इन्द्रियद्वारेण बाह्यवस्तुपरागात् चित्तस्य तद्विषया सामान्यविशेषात्मनोऽर्थस्य विशेषावधारणप्रधाना वृत्तिः 'प्रत्यक्षं' । गृहीतसम्बन्धालिङ्गात् लिङ्गिनः सामान्यात्मनाध्यवसायः 'अनुमानं' । आप्तवचनम् 'आगमः' ॥ ७ ॥

एवं प्रमाणरूपां वृत्तिं व्याख्याय विपर्ययरूपामाह ।

विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् ॥ ८ ॥

अतथाभूतेऽर्थे तथोत्पद्यमानं ज्ञानं 'विपर्ययः', यथा शुक्तिकायां रजतज्ञानं । 'अतद्रूपप्रतिष्ठम्' इति । तस्यार्थस्य यद्रूपं न तस्मिन् रूपे प्रतिष्ठते, तस्यार्थस्य यत् पारमार्थिकं रूपं न तत् प्रतिभासयतीति यावत् । संशयोऽप्यतद्रूपप्रतिष्ठत्वात् 'मिथ्याज्ञानं', यथा स्थाणुर्वा पुरुषो वेति ॥ ८ ॥

विकल्पवृत्तिं व्याख्यातुमाह ।

---

* वृत्तयः समुपदर्श्यन्ते इति B चिह्नितपुस्तकपाठः ।

† उपरक्तावस्तुविषयप्रमाज्ञानानामिति F चिह्नितपुस्तकपाठः ।

‡ प्रमालक्षणलक्ष्यस्येति F चिह्नितपुस्तकपाठः ।

Digitized by Google

शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ॥ ९ ॥

शब्दजनितं ज्ञानं 'शब्दज्ञानं', तदनुपतितुं शीलं यस्य स 'शब्दज्ञानानुपाती', 'वस्तुनः', तथात्वमनपेक्षमाणो योऽध्यवसायः सः 'विकल्पः', इत्युच्यते। यथा पुरुषस्य चैतन्यं स्वरूपमित्यत्र देवदत्तस्य कम्बल इतिवत्शब्दजनिते ज्ञाने षष्ठ्या योऽध्यवसितो भेदस्तमिहाविद्यमानमपि समारोप्य वर्त्ततेऽध्यवसायः* । वस्तुतस्तु चैतन्यमेव पुरुषः ॥ ९ ॥

निद्रां व्याख्यातुमाह।

अभावप्रत्ययालम्बना वृत्तिर्निद्रा ॥ १० ॥

'अभावप्रत्ययः' 'आलम्बनं' यस्या वृत्तेः सा तथोक्ता। एतदुक्तं भवति, या सम्यक्तमुद्रिक्तत्वात्तमसः† समस्तविषयपरित्यागेन प्रवर्त्तते 'वृत्तिः' सा 'निद्रा'। अस्याश्च‡ सुखमहमस्वाप्समिति स्मृतिनिदर्शनात् स्मृतेश्चानुभवव्यतिरेकेणानुपपत्तेर्वृत्तित्वं ॥ १० ॥

स्मृतिं व्याख्यातुमाह।

अनुभूतविषयासम्प्रमोषः स्मृतिः ॥ ११ ॥

प्रमाणेन 'अनुभूतस्य' 'विषयस्य' योऽयं 'असम्प्रमोषः' संस्कार-

---

* समारोप्याध्यवसाय इति F चिह्नितपुस्तकपाठः।

† समन्ततः समुद्रिक्तत्वात्तमसः इति G चिह्नितपुस्तकपाठः।

‡ अस्याश्चेति G चिह्नितपुस्तकपाठः।

Digitized by Google

द्वारेण बुद्धावुपारोहः, सः 'स्मृतिः'। तच्च* प्रमाणविपर्ययविकल्पा जाग्रदवस्थाः। त एव यदानुभवबलात् प्रत्यक्षायमाणास्तदा† स्वप्नः। निद्रा त्वसंवेद्यमानविषया। स्मृतिस्तु प्रमाणविपर्ययविकल्पनिद्रानिमित्ता ॥ ११ ॥

एवं वृत्तीर्व्याख्याय सोपायं निरोधं व्याख्यातुमाह।

अभ्यासवैराग्याभ्यां तन्निरोधः ॥ १२ ॥

‡'अभ्यासवैराग्ये' वक्ष्यमाणलक्षणे। ताभ्यां तासां प्रकाशप्रवृत्तिनियमरूपाणां§ चित्तवृत्तीनां, यत् प्रतिहननं सः 'निरोधः'। किमुक्तं भवति, तासां विनिवृत्तत्वाद्ग्राह्याभिनिवेशानामन्तर्मुखतया स्वकारण एव चित्ते प्रलीनरूपतयावस्थानम्। तच्च विषयदोषदर्शनजेन वैराग्येण तद्वैमुख्यमुत्पाद्यते। अभ्यासेन च सुखजनकशान्तप्रवाहप्रदर्शनद्वारेण॥ दृढं स्थैर्यमुत्पाद्यते इत्याभ्यां भवति चित्तवृत्तिनिरोधः॥ १२ ॥

अभ्यासं व्याख्यातुमाह।

---

* तदत्रेति A, D चिह्नितपुस्तकद्वयपाठः।

† प्रत्यक्षोपमाग इति B चिह्नितपुस्तकपाठः।

‡ चित्तदोषामोभयतो वाहिनी वहति कल्याणाय वहति पापाय च। या तु कैवल्यप्राग्भाराविवेकविषयनिम्ना सा कल्याणवहा। संसारप्राग्भाराविवेकविषयनिम्ना पापावहा। तत्र वैराग्येण विषयस्रोतस्विनी क्रियते, विवेकदर्शनाभ्यासेन कल्याणस्रोत उत्पाद्यते, इत्युभयाधीनचित्तवृत्तिनिरोधः। अभ्यासवैराग्ये इत्यादि B चिह्नितपुस्तकपाठः। एष तु साङ्ख्यप्रवचनभाष्यपाठः लेखकप्रमादादादर्शपुस्तके नीतः।

§ प्रकाशप्रवृत्तिप्रशमनरूपाणामिति B चिह्नितपुस्तकपाठः।

‖ सुखजनकशान्तप्रत्ययप्रवाहप्रदर्शनद्वारेणेति F पुस्तकपाठः।

Digitized by Google

तत्र स्थितौ यत्नोऽभ्यासः ॥ १३ ॥

वृत्तिरहितस्य चित्तस्य स्वरूपनिष्ठः परिणामः 'स्थितिः' तस्यां 'यत्नः' उत्साहः, पुनःपुनस्तथात्वेन चेतसि विनिवेशनम् 'अभ्यासः', इत्युच्यते ॥ १३ ॥

तस्यैव विशेषमाह ।

स तु दीर्घकालनैरन्तर्यसत्कारसेवितो दृढभूमिः ॥ ॥ १४ ॥

बहुकालं 'नैरन्तर्येणादरातिशयेन च सेव्यमानः 'दृढभूमिः' स्थिरो भवति, दार्ढ्याय प्रभवतीत्यर्थः ॥ १४ ॥

वैराग्यस्य लक्षणमाह ।

दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसञ्ज्ञा वैराग्यम् ॥ १५ ॥

द्विविधो विषयो दृष्ट आनुश्रविकश्च । 'दृष्टः' इहैवोपलभ्यमानः शब्दादिः । देवलोकादौ* 'आनुश्रविकः'। अनुश्रूयते गुरुमुखादित्यनुश्रवो वेदः तत आगतः† 'आनुश्रविकः' । तयोर्द्वयोरपि 'विषययोः' परिणामविरसत्वदर्शनात् विगतगर्द्धस्य,‡ या 'वशीकारसञ्ज्ञा' ममैते

---

* देवलोके इति F पुस्तकपाठः ।

† ततोऽधिगत इति B, C चिह्नितपुस्तकद्वयपाठः । तत आगतः ज्ञात इति F पुस्तकपाठः ।

‡ विगतरागस्येति B, D चिह्नितपुस्तकद्वयपाठः ।

Digitized by Google

वश्या* नाहमेषां वश्य इति योऽयं विमर्शः,† तत् 'वैराग्यम्' उच्यते ॥ १५ ॥

तस्यैव विशेषमाह ।

तत् परं पुरुषख्यातेर्गुणवैतृष्ण्यम् ॥ १६ ॥

'तत्' वैराग्यं, 'परं' उत्कृष्टं। प्रथमं वैराग्यं विषयविषयं, द्वितीयन्तु गुणविषयसुत्पन्नगुणपुरुषविवेकख्यातेरेव‡ भवति निरोधसमाधेरत्यन्तानुकूलत्वात् ॥ १६ ॥

एवं योगस्य स्वरूपमुक्त्वा सम्प्रज्ञाताऽसम्प्रज्ञातरूपभेदमाह§ ।

वितर्कविचारानन्दास्मितानुगमात् सम्प्रज्ञातः ॥१७॥

समाधिरिति शेषः । सम्यक् संशयविपर्ययरहितत्वेन प्रज्ञायते प्रकर्षेण ज्ञायते भाव्यस्य स्वरूपं येन स 'सम्प्रज्ञातः'। समाधिर्भावनाविशेषः । ध्येयातिरिक्तसकलवृत्तिनिरोधः सम्प्रज्ञातः सबीजसमाधिरिति यावत्। स वितर्कादिभेदात् चतुर्विधः । सवितर्कः, सविचारः, सानन्दः, सास्मितश्च । भावना च भाव्यस्य॥ विषयान्तरपरिहारेण

---

* वशीकारसंज्ञा नैते वश्या इति F पुस्तकपाठः ।

† विभाग इति F पुस्तकपाठः ।

‡ उत्पन्नपुरुषख्यातेरेव भवतीति B चिक्कितपुस्तकपाठः । उत्पन्नगुणपुरुषविवेकख्यातेस्तद्भवतीति D पुस्तकपाठः । उत्पन्नगुणविवेकख्यातेरेव भवतीति F पुस्तकपाठः ।

§ सम्प्रज्ञातभेदरूपमाहेति B चिक्कितपुस्तकपाठः ।

॥ आत्मन इति D पुस्तकपाठः ।

Digitized by Google

ऽपि पुनः पुनर्निवेशनं। भाव्यश्च द्विधा। ईश्वरतत्त्वानि च। तान्यपि च द्विधा जड़ाजड़भेदात्। षडानि चतुर्विंशतिः। अजड़ः पुरुषः*। तत्र† यदा महाभूतेन्द्रियाणि स्थूलानि विषयत्वेनादाय पूर्व्वापरानुसन्धानेन शब्दार्थोल्लेखसम्भेदेन‡ च भावना प्रवर्त्तते, तदा सवितर्कः समाधिः। अस्मिन्नेवावलम्बने पूर्व्वापरानुसन्धानशब्दार्थोल्लेख§ शून्यत्वेन‖ यदा भावना प्रवर्त्तते, तदा निर्वितर्कः। तस्माच्चान्तःकरण-लक्षणं सूक्ष्मं विषयमालम्ब्य तस्य देशकालधर्म्मावच्छेदेन‖ यदा भावना प्रवर्त्तते, तदा सविचारः। तस्मिन्नेवावलम्बने देशकालधर्म्मावच्छेदं विना धर्म्मिमात्राधभासितत्वेन भावना क्रियमाणा निर्विचार इत्यु-च्यते। एवं पर्य्यन्तः समाधिर्ग्राह्यसमापत्तिरिति व्यपदिश्यते¶। यदा तु रजस्तमोलेशानुविद्धमन्तःकरणसत्त्वं भाव्यते, तदा गुणभावात् विच्छिन्नः सुखप्रकाशमयस्य सत्त्वस्य भाव्यमानस्योद्रेकात् सानन्दः समाधिर्भवति। अस्मिन्नेव समाधौ ये बद्धधृतयस्तत्त्वान्तरं प्रधानपुरुषरूपं न पश्यन्ति, ते विगतदेहाहङ्कारत्वात् विदेहशब्दवाच्याः। इयं ग्रहणसमापत्तिः। ततः परं रजस्तमोलेशानभिभूतं शुद्धं सत्त्वमालम्बनीकृत्य या प्रवर्त्तते भावना, तस्यां ग्राह्यस्य सत्त्वस्य न्यग्भावाविच्छिन्नोद्रेकात् सत्तामा-

---

* जड़ः पुरुष इति A पुस्तकपाठः परन्त्वयं न समीचीनः।
† यत्रेति F पुस्तकपाठः।
‡ शब्दार्थोल्लेखसम्भेदेनेति C पुस्तकपाठः। शब्दार्थोल्लेखसम्भेदेन यदेति F पुस्तकपाठः।
§ शब्दोल्लेखशून्यत्वेनेति C पुस्तकपाठः।
‖ सर्व्वदेशकालधर्म्मावच्छेदेनेति F पुस्तकपाठः।
¶ ग्राह्यसमापत्तिरित्युच्यत इति E चिह्नितपुस्तकपाठः।

Digitized by Google

चावशेषत्वेन समाधिः सास्मिता इत्युच्यते । न च अहङ्कारास्मितयोरभेदः अङ्गनीयः, यतो यचान्तःकरणमहमित्युल्लेखेन विषयान् वेदयते सोऽहङ्कारः, यचान्तर्मुखतया प्रतिलोमपरिणामेन प्रकृतिलीने चेतसि सत्तामात्रमवभाति सास्मिता । अस्मिन्नेव समाधौ ये कृतपरितोषाः परमात्मानं पुरुषं न पश्यन्ति तेषां चेतसि स्वकारणे स्वयमुपगते ते प्रकृतिलया इत्युच्यन्ते । ये परं पुरुषं ज्ञात्वा भावनायां प्रवर्त्तन्ते तेषामियं विवेकख्यातिर्महीतसमापत्तिरित्युच्यते । तच सवितर्कसमाधौ चतस्रोऽप्यवस्थाः अक्लिष्टपतयावतिष्ठन्ते, तत एकैकस्यात्यागे उत्तरोत्तरा इति चतुरवस्थोयम् सम्प्रज्ञातः समाधिः ॥ १७ ॥

असम्प्रज्ञातमाह ।

विरामप्रत्ययाभ्यासपूर्व्वकः संस्कारशेषोन्यः*॥ १८॥

विरम्यतेऽनेनेति 'विरामः' वितर्कादिचिन्तात्यागः । विरामस्यासौ प्रत्ययश्चेति 'विरामप्रत्ययः', तस्य 'अभ्यासः' पौनः पुन्येन चेतसि विनिवेशनं, तच या काचित् वृत्तिरुल्लसति तस्यां नेति नेतीति नैरन्तर्येण पर्य्युदसनं तत्पूर्व्वकोऽसम्प्रज्ञातसमाधिः† 'संस्कारशेषः',‡ 'अन्यः' तद्विलक्षणः, असम्प्रज्ञात इत्यर्थः । न तच किञ्चिद्देयं सम्प्रज्ञायते इत्यसम्प्रज्ञातो निर्बीजः समाधिः । दृष्टे§ चतुर्विधश्चित्तस्य परिणामः । व्युत्थानं, समाधिप्रारम्भः, एकाग्रता, निरोधश्च । तच

---

* संस्कारविशेषोन्य इति E पुस्तकपाठः ।

† तत्पूर्व्वकः सम्प्रज्ञातसमाधिरिति B पुस्तकपाठः परन्त्वयं न समीचीनः ।

‡ संस्कारविशेष इति E पुस्तकपाठः ।

§ समाधाविष्टेति D पुस्तकपाठः ।

Digitized by Google

क्षिप्तमूढे चित्तभूमी व्युत्थानं। विक्षिप्तभूमिः सत्त्वोद्रेकात् समाधिप्रारम्भः। एकाग्रतानिरुद्धे तु पर्य्यन्तभूमी। प्रतिपरिणामश्च संस्काराः। तत्र व्युत्थानजनिताः संस्काराः समाधिप्रारम्भजैः संस्कारैर्हन्यन्ते। तज्जास्त्वेकाग्रताजैः। निरोधजनितैरेकाग्रताजाः संस्काराः स्वरूपञ्च हन्यते। यथा सुवर्णसम्बलितं ध्मायमानं सीसकमात्मानं* सुवर्णमलञ्च निर्दहति, एवमेकाग्रताजनितान् संस्कारान् निरोधजाः स्वात्मानञ्च निर्दहन्ति॥ १८॥

तदेवं योगस्य स्वरूपभेदं सङ्क्षेपेणोपायञ्चाभिधाय विस्तरेणोपायं योगाभ्यासप्रदर्शनपूर्व्वकं वक्तुमुपक्रमते।

भवप्रत्ययो विदेहप्रकृतिलयानाम्॥ १९॥

'विदेहाः', 'प्रकृतिलयाः', च वितर्कादिभूमिकासूचे व्याख्याताः। तेषां समाधिः 'भवप्रत्ययः', भवः संसारः स एव प्रत्ययः कारणं यस्य स 'भवप्रत्ययः'। अयमर्थः। आविर्भूतमात्रे† एव संसारे ते तथाविधसमाधिभाजो भवन्ति। तेषां परतत्त्वादर्शनात् योगाभ्यासोऽयं। अतः परतत्त्वज्ञाने तद्भावनायाञ्च मुक्तिकामेन यत्नः‡ विधेय इत्येतदर्थमुपदिष्टम्॥ १९॥

तदन्येषान्तु।

---

* ग्रीसकं स्वयमात्मानमिति F पुस्तकपाठः।
† आविर्भूताधिमात्र इति E, G पुस्तकद्वयपाठः।
‡ महान् यत्न इति D, G पुस्तकपाठः।

Digitized by Google

श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम् ॥ २० ॥

विदेहप्रकृतिलयव्यतिरिक्तानां योगिनां, श्रद्धादिपूर्वकः, श्रद्धादयः पूर्वे उपाया यस्य स श्रद्धादिपूर्वकः । ते च श्रद्धादयः क्रमादुपायोपेयभावेन प्रवर्त्तमानाः सम्प्रज्ञातस्य समाधेरुपायतां प्रतिपद्यन्ते । तत्र 'श्रद्धा' योगविषये चेतसः प्रसादः । 'वीर्यं' उत्साहः । 'स्मृतिः' अनुभूतासम्प्रमोषः । 'समाधिः' एकाग्रता । 'प्रज्ञा' प्रज्ञातव्यविवेकः । तत्र श्रद्धावतो वीर्यं जायते, योगविषये उत्साहवान् भवति । सोत्साहस्य पाश्चात्यासु भूमिषु स्मृतिरुपजायते । तत्स्मरणात् चेतः समाधीयते । समाहितचित्तस्य भाव्यं सम्यग्विजानाति । त एते सम्प्रज्ञातसमाधेरुपायाः । तस्माच्छ्रद्धात् पराच्च वैराग्याद्भवत्यसम्प्रज्ञातः ॥ २० ॥

उक्तोपायवतां योगिनामुपायभेदात् भेदानाह ।

तीव्रसंवेगानामासन्नः* ॥ २१ ॥

समाधिलाभ इतिशेषः । 'संवेगः' क्रियाहेतुर्दृढतरः संस्कारः, स 'तीव्रः', येषामधिमात्रोपायानां, तेषां 'आसन्नः,' समाधिलाभः,† समाधिफलस्यासन्नं भवति, शीघ्रमेव निष्पद्यत इत्यर्थः ॥ २१ ॥

के ते तीव्रसंवेगा इत्यत आह ।

---

* समाधिलाभ इति C, F, G पुस्तकत्रयेषु पाठः । यत्र सूत्रे समाधिलाभ इति पाठस्तत्र टीकायां समाधिलाभ इति शेष इति पाठो नास्ति । तथा च समाधिलाभशब्देन अन्यतरस्यासन्नस्य यत्र कुत्राप्यवश्यमेव भवितव्यमिति निश्चीयते ।

† तेषां समाधिर्भवति लाभ इति D पुस्तकपाठः ।

Digitized by Google

मृदुमध्याधिमात्रत्वात् ततोपि विशेषः ॥ २२ ॥

तेभ्यः उपायेभ्यो मृदादिभेदभिन्नेभ्य उपायवतां 'विशेषः', भवति। 'मृदुर्मध्योऽधिमात्रः', इत्युपायभेदाः। ते प्रत्येकं मृदुसंवेग-मध्यसंवेग-तीव्रसंवेगभेदात् त्रिविधाः। तद्भेदेन च नव योगिनो भवन्ति। मृदूपायः, मृदुसंवेगः, मध्यसंवेगः, तीव्रसंवेगश्च। मध्योपायः, मृदुसंवेगः, मध्यसंवेगः, तीव्रसंवेगश्च। अधिमात्रोपायः, मृदुसंवेगः, मध्यसंवेगः, तीव्रसंवेगश्च। अधिमात्रोपाये तीव्रे च संवेगे महान् यत्नः कर्त्तव्य इति भेदोपदेशः ॥ २२ ॥

इदानीमेतदुपायविलक्षणं सुगममुपायान्तरमाह।

ईश्वरप्रणिधानाद्वा ॥ २३ ॥

'ईश्वरः' वक्ष्यमाणलक्षणः, 'प्रणिधानं' तत्र भक्तिविशेषः। विशिष्टमुपासनं सर्व्वक्रियाणामपि तत्रार्पणं। विषयसुखादिकं फलमनिच्छन्* सर्व्वाः क्रियास्तस्मिन् परमगुरावर्पयति, तत् 'प्रणिधानं'। समाधेस्तत्फललाभस्य च प्रकृष्ट उपायः ॥ २३ ॥

ईश्वरस्य प्रणिधानात् समाधिलाभ इत्युक्तं। तत्रेश्वरस्य स्वरूपं, प्रमाणं, प्रभावं, वाचकं, उपासनाक्रमं, तत्फलञ्च क्रमेण वक्तुमाह।

क्लेशकर्म्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ॥ ॥ २४ ॥

क्लिश्यन्तीति 'क्लेशाः' अविद्यादयो वक्ष्यमाणाः। विहित-प्रतिषिद्ध-व्यामिश्ररूपाणि 'कर्म्माणि'। विपच्यन्त इति 'विपाकाः' कर्म्मफलानि

---

* फलमनिच्छन्निति C, F पुस्तकद्वयपाठः।

Digitized by Google

जात्यायुर्भोगाः। आफलविपाकात् चित्तभूमौ शेरत इति 'आशयाः' वासनाख्याः संस्काराः। तैः 'अपरामृष्टः' चिच्वपि कालेषु न संस्पृष्टः। 'पुरुषविशेषः' अन्येभ्यः पुरुषेभ्यो विशिष्यत इति विशेषः। 'ईश्वरः' ईशनशीलः*, इच्छामात्रेण सकलजगदुद्धरणक्षमः। यद्यपि सर्व्वेषामात्मनां क्लेशादिस्पर्शो नास्ति तथापि चित्तगतस्तेषामुपदिश्यते। यथा योद्धृगतौ जयपराजयौ स्वामिनः। अस्य तु चिच्वपि कालेषु तथाविधोऽपि क्लेशादिपरामर्शो नास्तीत्यतः स विलक्षण एव भगवानीश्वरः। तस्य च तथाविधमैश्वर्यमनादेः सत्त्वोत्कर्षात्। सत्त्वोत्कर्षस्यास्य प्रकृष्टज्ञानादेव। न चानयोः† ज्ञानैश्वर्ययोरितरेतराश्रयत्वं, परस्परानपेक्षत्वात्। ते द्वे ज्ञानैश्वर्ये ईश्वरसत्त्वे वर्त्तमाने अनादिभूते। तथाविधेन सत्त्वेन तस्यानादिरेव सम्बन्धः, प्रकृतिपुरुषसंयोगवियोगयोरीश्वरेच्छाव्यतिरेकेणानुपपत्तेः। यथेतरेषां प्राणिनां सुखदुःखमोहतया विपरिणतं चित्तं निर्म्मले सात्त्विके धर्म्मात्मप्रख्ये योगिशरीरे प्रतिसंक्रान्तं चिच्छायासंक्रान्तेः संवेद्यं भवति, नैवमीश्वरस्य। तस्य केवल एव सात्त्विकः परिणाम उत्कर्षवाननादिसम्बन्धेन भोग्यतया व्यवस्थितः। अतः पुरुषान्तरविलक्षणतया स एवेश्वरः। मुक्तात्मनः पुनः क्लेशादिसंयोगस्तैस्तैः शास्त्रोक्तैरुपायैर्निवर्त्तितः, अस्य पुनः सर्व्वदैव तथाविधत्वान्न मुक्तात्मतुल्यत्वं। न चेश्वराणामनेकत्वं, तेषां तुल्यत्वेपि भिन्नाभिप्रायत्वात् कार्य्यस्यैक्यानुपपत्तेः। उत्कर्षापकर्षयुक्तत्वे य एव उत्कृष्टः स एव ईश्वरः तत्रैव काष्ठाप्राप्तत्वादैश्वर्यस्य ॥ २४ ॥

---

* ईशानशील इति A पुस्तकपाठः परन्त्वयं न समीचीनः।

† न च तयोरिति C, F पुस्तकद्वयपाठः।

Digitized by Google

एवमीश्वरस्य स्वरूपमभिधाय प्रमाणमाह ।

तच्च निरतिशयं सर्व्वज्ञबीजं ॥ २५ ॥

तस्मिन् भगवति, सर्व्वज्ञत्वस्य यत् 'बीजं' अतीतानागतादिग्रहणस्याणुत्वं* महत्त्वञ्च, मूलत्वाद्बीजमिव बीजं, तत् 'तच्च', 'निरतिशयं' काष्ठां प्राप्तं। दृष्टा हि अणुत्वमहत्त्वादीनां† धर्म्माणां सातिशयानां काष्ठाप्राप्तिः। यथा परमाणावणुत्वस्याकाशे च परममहत्त्वस्य। एवं ज्ञानादयोऽपि चित्तधर्म्मास्तारतम्येन परिदृश्यमानाः क्वचिन्निरतिशयतामापादयन्ति‡ यच्च ते निरतिशयाः स ईश्वरः। यद्यपि सामान्यमात्रेऽनुमानस्य पर्य्यवसितत्वान्न विशेषावगतिः सम्भवति, तथापि शास्त्रादस्य सर्व्वज्ञत्वादयो विशेषा अवगन्तव्याः। स च स्वप्रयोजनाभावे कथं प्रकृतिपुरुषयोः संयोगवियोगावापादयतीति नाशङ्कनीयं। तस्य कारुणिकत्वाद्भूतानुग्रह एव प्रयोजनं। कल्पप्रलयमहाप्रलयेषु निःश्रेषान् संसारिण उद्धरिष्यामीति तस्याध्यवसायः। यद्यदिष्टं तत्तस्य प्रयोजनमिति ॥ २५ ॥

एवमीश्वरस्य स्वरूपं प्रमाणञ्चाभिधाय प्रभावमाह ।

स एष पूर्व्वेषामपि गुरुः कालेनानवच्छेदात् ॥ २६ ॥

आद्यानां स्रष्टॄणां ब्रह्मादीनामपि, 'गुरुः' उपदेष्टा, यतः 'सः',

---

* अतीतानागतादिग्रहणास्याल्पत्वमिति B, C, D, E पुस्तकानां पाठः।

† अल्पत्वमहत्त्वादीनामिति A, E पुस्तकपाठः। एवमत्र सर्व्वत्र अणुशब्दस्थाने अल्पशब्दस्यवहारः।

‡ निरतिशयतामासादयन्तीति D पुस्तकपाठः।

Digitized by Google

जात्यायुर्भोगाः। आफलविपाकात् चित्तभूमौ शेरत इति 'आशयाः' वासनाख्याः संस्काराः। तैः 'अपरामृष्टः' त्रिष्वपि कालेषु न संस्पृष्टः। 'पुरुषविशेषः' अन्येभ्यः पुरुषेभ्यो विशिष्यत इति विशेषः। 'ईश्वरः' ईशनशीलः*, इच्छामात्रेण सकलजगदुद्धरणक्षमः। यद्यपि सर्व्वेषामात्मनां क्लेशादिस्पर्शो नास्ति तथापि चित्तगतक्लेशानुपदिश्यते। यथा योद्धृगतौ जयपराजयौ स्वामिनः। अस्य तु त्रिष्वपि कालेषु तथाविधोऽपि क्लेशादिपरामर्शो नास्तीत्यतः स विलक्षण एव भगवानीश्वरः। तस्य च तथाविधमैश्वर्यमनादेः सत्त्वोत्कर्षात्। सत्त्वोत्कर्षस्यास्य प्रकृष्टज्ञानादेव। न चानयोः† ज्ञानैश्वर्ययोरितरेतराश्रयत्वं, परस्परानपेक्षत्वात्। ते द्वे ज्ञानैश्वर्ये ईश्वरसत्त्वे वर्त्तमाने अनादिभूते। तथाविधेन सत्त्वेन तस्यानादिरेव सम्बन्धः, प्रकृतिपुरुषसंयोगवियोगयोरीश्वरेच्छाव्यतिरेकेणानुपपत्तेः। यथेतरेषां प्राणिनां सुखदुःखमोहतया विपरिणतं चित्तं निर्म्मले सात्त्विके धर्म्मात्मप्रख्ये योगिशरीरे प्रतिसंक्रान्तं चिच्छायासंक्रान्तेः संवेद्यं भवति, नैवमीश्वरस्य। तस्य केवल एव सात्त्विकः परिणाम उत्कर्षज्ञाननादिसम्बन्धेन भोग्यतया व्यवस्थितः। अतः पुरुषान्तरविलक्षणतया स एवेश्वरः। मुक्तात्मनः पुनः क्लेशादिसंयोगस्तैस्तैः शास्त्रोक्तैरुपायैर्निवर्त्तितः, अस्य पुनः सर्व्वदैव तथाविधत्वान्न मुक्तात्मतुल्यत्वं। न चेश्वराणामनेकत्वं, तेषां तुल्यत्वेपि भिन्नाभिप्रायत्वात् कार्य्यस्यैवानुपपत्तेः। उत्कर्षापकर्षयुक्तत्वे च य एव उत्कृष्टः स एव ईश्वरः तत्रैव काष्ठाप्राप्तत्वादैश्वर्यस्य ॥ २४ ॥

---

* ईशानशील इति A पुस्तकपाठः परन्त्वयं न समीचीनः।

† न च तयोरिति C, F पुस्तकद्वयपाठः।

Digitized by Google

एवमीश्वरस्य स्वरूपमभिधाय प्रमाणमाह।

तच्च निरतिशयं सर्व्वज्ञबीजं ॥ २५ ॥

तस्मिन् भगवति, सर्व्वज्ञत्वस्य यत् 'बीजं' अतीतानागतादिग्रहणस्याणुत्वं* महत्त्वञ्च, मूलत्वाद्बीजमिव बीजं, तत् 'तच्च', 'निरतिशयं' काष्ठां प्राप्तं। दृष्टा हि अणुत्वमहत्त्वादीनां† धर्म्माणां सातिशयानां काष्ठाप्राप्तिः। यथा परमाणावणुत्वस्याकाशे च परममहत्त्वस्य। एवं ज्ञानादयोऽपि चित्तधर्म्मास्तारतम्येन परिदृश्यमानाः क्वचिन्निरतिशयतामापादयन्ति‡ यच्च चैते निरतिशयाः स ईश्वरः। यद्यपि सामान्यमात्रेऽनुमानस्य पर्य्यवसितत्वान्न विशेषावगतिः सम्भवति, तथापि शास्त्रादस्य सर्व्वज्ञत्वादयो विशेषा अवगन्तव्याः। स च स्वप्रयोजनाभावे कथं प्रकृतिपुरुषयोः संयोगवियोगावापादयतीति नाशङ्कनीयं। तस्य कारुणिकत्वाद्भूतानुग्रह एव प्रयोजनं। कल्पप्रलयमहाप्रलयेषु निःश्रेयान् संसारिण उद्धरिष्यामीति तस्याध्यवसायः। यद्यदेष्टं तत्तस्य प्रयोजनमिति ॥ २५ ॥

एवमीश्वरस्य स्वरूपं प्रमाणञ्चाभिधाय प्रभावमाह।

स एष पूर्व्वेषामपि गुरुः कालेनानवच्छेदात् ॥ २६ ॥

आद्यानां स्रष्टॄणां ब्रह्मादीनामपि, 'गुरुः' उपदेष्टा, यतः 'सः',

---

* अतीतानागतादिग्रहणास्याल्पत्वमिति B, C, D, E पुस्तकानां पाठः।

† अल्पत्वमहत्त्वादीनामिति A, E पुस्तकपाठः। एवमत्र सर्व्वत्र अणुशब्दस्थाने अल्पशब्दव्यवहारः।

‡ निरतिशयतामासादयन्तीति D पुस्तकपाठः।

Digitized by Google

'कालेन', नावच्छिद्यते अनादित्वात्। तेषां पुनरादिमत्त्वादस्ति कालेनावच्छेदः॥ २६॥

एवं प्रभावमुक्त्वा उपासनोपयोगाय वाचकमाह।

तस्य वाचकः प्रणवः॥ २७॥

इत्यमुक्तस्वरूपस्य ईश्वरस्य, 'वाचकः' अभिधायकः।* प्रकर्षेण नूयते स्तूयतेऽनेनेति नौति स्तौतीति वा 'प्रणवः' ओङ्कारः। तयोश्च वाच्यवाचकभावलक्षणसम्बन्धो नित्यः सङ्केतेन प्रकाश्यते, न तु केनचित् क्रियते, यथा पितृपुत्रयोर्विद्यमानः सम्बन्धोऽस्यायं पिता अस्यायं पुत्र इति केनचित् प्रकाश्यते॥ २७॥

उपासनमाह।

तज्जपस्तदर्थभावनम्॥ २८॥

'तस्य' सार्द्धचिमात्रस्य प्रणवस्य, 'जपः' यथावदुच्चारणं, तदाश्रयेश्वरस्य 'भावनं' पुनः पुनस्तेषु विनिवेशनं, एकाग्रतायाः उपायः। अतः समाधिसिद्धये योगिना प्रणवो जप्यः, तदर्थस्य भावनीयः† इत्युक्तं भवति॥ २८॥

उपासनायाः फलमाह।

ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च‡॥ २९॥

तस्माज्जपात् तदर्थभावनात् च योगिनः 'प्रत्यक्चेतनाधि-

---

* वाचकोऽभिधायकः प्रणव ओङ्कार इति A, D पुस्तकद्वयपाठः।
† तदर्थ ईश्वरश्च भावनीय इति B, D पुस्तकद्वयपाठः।
‡ चेतनागमोऽन्तराया भाव इति A, C, D, F पुस्तकचतुष्टयपाठः।

Digitized by Google

गमः',* भवति । विषयप्रातिकूल्येन स्वान्तःकरणाभिमुखमञ्चति, या 'चेतना' दृक्शक्तिः,† सा 'प्रत्यक्चेतना', तस्याः 'अधिगमः' ज्ञानं, भवति । 'अन्तरायाः' वक्ष्यमाणाः, तेषां 'अभावः' शक्तिप्रतिबन्धः, भवति ॥ २९ ॥

अथ के अन्तरायाः‡ इत्याशङ्क्यायामाह ।

व्याधि-स्थान-संशय-प्रमादालस्याविरति-भ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः ॥ ३० ॥

नवैते रजस्तमोबलात् प्रवर्त्तमानाः 'चित्तविक्षेपाः',§ भवन्ति, तैरेकाग्र्यविरोधिभिश्चित्तं विक्षिप्यते इत्यर्थः । तत्र 'व्याधिः' धातुवैषम्यनिमित्तो ज्वरादिः । 'स्थानं' अकर्मण्यता चित्तस्य । उभयकोट्यालम्बनं‖ विज्ञानं 'संशयः', योगः साध्यो वा न वेति¶ । 'प्रमादः' अननुष्ठानशीलता, समाधिसाधने औदासीन्यं । 'आलस्यं' कायचित्तयोर्गुरुत्वं, योगविषये प्रवृत्त्यभावे हेतुः । 'अविरतिः' चित्तस्य

---

* प्रत्यक्चेतनागम इति C, D पुस्तकद्वयपाठः ।

† स्वान्तःकरणाभिमुखमञ्चति या दृक्शक्तिरिति B पुस्तकपाठः । स्वान्तःकरणाभिमुखमञ्चतीति या चेतना दृक्शक्तिरिति A, C पुस्तकद्वयपाठः । स्वान्तःकरणाभिमुखमञ्चति प्रत्यक् चेतना दृक्चेतना तस्याधिगम इति D पुस्तकपाठः ।

‡ अथ के तेऽन्तराया इति C, E पुस्तकद्वयपाठः ।

§ चित्तस्य विक्षेपा इति A, C पुस्तकद्वयपाठः ।

‖ उभयकोट्यालम्बनमिति C पुस्तकपाठः । परन्त्वयं न समीचीनः ।

¶ योगः साध्यः स्याद्वा न वेति A, C पुस्तकद्वयपाठः ।

Digitized by Google

विषयसम्प्रयोगात्मा गर्द्धः*। 'भ्रान्तिदर्शनं' शुक्तिकायां रजतत्व-वदिति† विपर्य्ययज्ञानं। 'अलब्धभूमिकत्वं' कुतश्चित् निमित्तात् समाधिभूमेरलाभोऽसम्प्राप्तिः। 'अनवस्थितत्वं' लब्धावस्थायामपि‡ समाधिभूमौ चित्तस्य तत्राप्रतिष्ठा। त-एते समाधेरेकाग्रतायाः यथायोगं प्रतिपक्षत्वात् 'अन्तरायाः', इति उच्यते ॥ ३० ॥

चित्तविक्षेपकारकानन्यानप्यन्तरायान् प्रतिपादयितुमाह।

दुःख-दौर्मनस्याङ्गमेजयत्व-श्वास-प्रश्वासा विक्षेपसह-भुवः ॥ ३१ ॥

कुतश्चिन्निमित्तादुत्पन्नेषु विक्षेपेष्वेते§ दुःखादयः प्रवर्त्तन्ते। तत्र 'दुःखं' चित्तस्य रागजः॥ परिणामः बाधनालक्षणः, यद्बाधात् प्राणिनस्तदपघाताय प्रवर्त्तन्ते। 'दौर्मनस्यं' वाञ्छाभ्यन्तरैः कारणैर्म-नसो दौःस्थ्यं। 'अङ्गमेजयत्वं' सर्व्वाङ्गीनो वेपथुः आसनस्थैर्य्यस्य¶ बाधकः। प्राणो यद्बाह्यं वायुमाचामति सः 'श्वासः'**। यत्कौष्ठ्यं वायुं निःसारयति†† स 'प्रश्वासः'। त एते विक्षेपैः‡‡ सह वर्त्तमाना

---

* विषयसम्प्रयोगार्थो गर्द्ध इति C पुस्तकपाठः।

† रजतवदितीति A पुस्तकपाठः।

‡ लब्धायामपीति E पुस्तकपाठः।

§ विक्षेपेष्वेतेषु इति C, E, F पुस्तकत्रयपाठः।

॥ चित्तस्य रजस इति A पुस्तकपाठः।

¶ आसनमनस्थैर्य्ययोरिति A पुस्तकपाठः।

** प्राणो यद्बाह्यं वायुमाश्वसिति स श्वास इति B पुस्तकपाठः।

†† निश्वसितीति A, B, D पुस्तकत्रयपाठः।

‡‡ ते एतैर्विक्षेपैरिति A, F पुस्तकद्वयपाठः। एतैर्विक्षेपैरिति B, E, D पुस्तकत्रयपाठः।

Digitized by Google

यथोदिताभ्यामभ्यास-वैराग्याभ्यां निरोद्धव्या इत्येषामुपदेशः ॥ ३१ ॥

सोपद्रवचित्तविक्षेपप्रतिषेधार्थमुपायान्तरमाह ।

तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ॥ ३२ ॥

तेषां चित्तविक्षेपाणां 'प्रतिषेधार्थं' निषेधार्थं, 'एकस्मिन् कस्मिंश्चिदभिमते, 'तत्त्वे', 'अभ्यासः', चेतसः पुनः पुनर्विनिवेशनं कुर्य्यात्। यद्बलात् प्रत्युदितायामेकाग्रतायां प्रज्ञामुपयान्ति चित्तविक्षेपाः ॥ ३२ ॥

इदानीं चित्तसंस्कारापादकपरिकर्म्मकथनपूर्व्वकमुपायान्तरमाह* ।

मैत्री-करुणा-मुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम् ॥ ३३ ॥

'मैत्री' सौहार्द्दं। 'करुणा' कृपा। 'मुदिता' हर्षः। 'उपेक्षा' औदासीन्यं। एता यथाक्रमं सुखितेषु, दुःखितेषु, पुण्यवत्सु, अपुण्यवत्सु च भावयेत्। तथाहि सुखितेषु साध्वेषां सुखितमिति मैत्रीं कुर्य्यान्न ईर्ष्यां। दुःखितेषु कथं नु नामैषां दुःखितविमुक्तिः स्यादिति कृपामेव कुर्य्यात् न तात्स्थ्यं। पुण्यवत्सु पुण्यानुमोदनेन हर्षं कुर्य्यात् न तु किमेते पुण्यवन्त इति विद्वेषं। अपुण्यवत्सु चौदासीन्यमेव भावयेत् नानुमोदनं न द्वेषं। सूत्रे सुखदुःखादिशब्दैस्तद्वन्तः प्रतिपादिताः। तदेवं मैत्र्यादिपरिकर्म्मणा चित्ते† प्रसीदति‡ सुखेन समाधेराविर्भावो भवति। परिकर्म्म चैतद्वाच्यं

---

* चित्तसंस्कारापादकं परिकर्म्मकथनमुपायान्तरमाहेति C, E पुस्तकद्वयपाठः।

† परिकर्म्मजा प्रसादोपायेन चित्त इति E, D पुस्तकद्वयपाठः।

‡ चित्तप्रसादे सतीति D पुस्तकपाठः॥

Digitized by Google

कर्म्म। यथा गणिते मिश्रकादिव्यवहारगणितनिष्पत्तये सङ्कलितादि-कर्म्म, उपकारकत्वेन प्रधानकर्म्मनिष्पत्तये प्रभवति, एवं द्वेषरागादि-प्रतिपक्षभूतमैत्र्यादिभावनया वसुत्पादितप्रसादं चित्तं सम्प्रज्ञात-समाधियोग्यं सम्पद्यते। रागद्वेषावेव सुखतया भेदमुत्पादयतः*। तौ चेत् समूलमुन्मूलितौ स्यातां तदा प्रसन्नत्वात् मनसो भवत्येवै-कायता ॥ ३३ ॥

उपायान्तरमाह।

प्रच्छर्द्दन-विधारणाभ्यां वा प्राणस्य ॥ ३४ ॥

'प्रच्छर्द्दनं' यत् कौष्ठस्य वायोः प्रयत्नविशेषान्मात्राप्रमाणेन वहि-र्निःसारणं। 'विधारणं' मात्राप्रमाणेनैव प्राणस्यायामः गतिविच्छेदः। स च द्वाभ्यां प्रकाराभ्यां, बाह्यस्याभ्यन्तरापूरणेन, पूरितस्य वायोस्तथैव निरोधेन। तदेवं रेचकपूरककुम्भकभेदेन त्रिविधः प्राणायामः चित्तस्य स्थितिमेकाग्रतायां निबध्नाति। सर्व्वेषामिन्द्रियवृत्तीनां प्राणप्रवृत्तिपूर्व्वकत्वात् मनःप्राणयोः स्वस्वव्यापारे परस्परमेकयोग-क्षेमत्वाच्चीयमाणः प्राणः समस्तेन्द्रियवृत्तिनिरोधद्वारेण चित्तस्यैका-ग्रतायां प्रभवति। समस्तदोषक्षयकारित्वं चास्यागमे श्रूयते, दोष-क्षताश्च सर्व्वा विक्षेपवृत्तयः। अतो दोषनिर्हरणद्वारेणास्यैकाग्रतायां सामर्थ्यं ॥ ३४ ॥

इदानीमुपायान्तरदर्शनेनोपक्षेपेण सम्प्रज्ञातस्य समाधेः पूर्वरङ्गं करोति†।

---

* विक्षेपमुत्पादयत इति A, D पुस्तकद्वयपाठः।

† पूर्व्वाङ्गं करोतीति B पुस्तकपाठः।

Digitized by Google

विषयवती वा प्रवृत्तिरुत्पन्ना स्थितिनिबन्धनी ॥ ३५ ॥

मनस इति वाक्यशेषः। विषया गन्ध-रस-रूप-स्पर्श-शब्दाः ते विद्यन्ते फलत्वेन यस्याः सा 'विषयवती', 'प्रवृत्तिः', मनसः स्थैर्यं करोति। तथा हि नासाग्रे चित्तं धारयतो दिव्यगन्धसम्विदुपजायते। तादृश्येव जिह्वाग्रे रससम्वित्। तालव्ये रूपसम्वित्। जिह्वामध्ये स्पर्शसम्वित्। जिह्वामूले शब्दसम्वित्। तदेवं तत्तदिन्द्रियद्वारेण तस्मिंस्तस्मिन् दिव्ये विषये जायमाना सम्वित् चित्तस्यैकाग्रतायां हेतुर्भवति, अस्ति योगस्य फलमिति योगिनां समाश्वासोत्पादनात्॥ ॥ ३५ ॥

एवंविधमेवोपायान्तरमाह।

विशोका वा ज्योतिष्मती ॥ ३६ ॥

प्रवृत्तिरुत्पन्ना चित्तस्य स्थितिनिबन्धिनीति वाक्यशेषः। ज्योतिःशब्देन सात्त्विकः प्रकाश उच्यते, स प्रशस्तो भूयानतिशयवांश्च विद्यते यस्याः सा 'ज्योतिष्मती', प्रवृत्तिः। 'विशोका' विगतः सुखमयसत्त्वाभ्यासवशाच्छोको रजःपरिणामो यस्याः सा, चेतसः स्थितिनिबन्धिनी। अयमर्थः हृत्पद्मसम्पुटमध्ये प्रशान्तकल्लोलक्षीरोदधिप्रख्यं चित्तसत्त्वं सम्भावयतः प्रज्ञालोकात् सर्व्ववृत्तिपरिक्षये चेतसः स्थैर्यमुत्पद्यते ॥ ३६ ॥

उपायान्तरप्रदर्शनद्वारेण सम्प्रज्ञातस्य समाधेर्व्विषयं दर्शयति।

वीतरागविषयं वा चित्तं ॥ ३७ ॥

मनसः स्थितिनिबन्धनं भवतीति वाक्यशेषः। 'वीतरागः'

Digitized by Google

परित्यक्तविषयाभिलाषः, तस्य यत् 'चित्तं,' परिहृतक्लेशं तदालम्बनीकृतं, चेतसः स्थितिहेतुर्भवति ॥ ३७ ॥

एवंविधमेवोपायान्तरमाह ।

स्वप्न-निद्रा-ज्ञानावलम्बनं वा ॥ ३८ ॥

प्रत्यस्तमितबाह्येन्द्रियवृत्तेर्मनोमात्रेणैव यच्च भोक्तृत्वमात्मनः सः 'स्वप्नः'। 'निद्रा' पूर्व्वोक्तलक्षणा* । तदालम्बनं स्वप्नालम्बनं, निद्रालम्बनं वा 'ज्ञानं', आलम्ब्यमानं, चेतसः स्थितिं करोति ॥ ३८ ॥

नानारुचित्वात् प्राणिनां यस्मिन् कस्मिंश्चिदस्तुनि योगिनः श्रद्धा भवति । तस्य ध्यानेनापि भवतीष्टसिद्धिरिति प्रतिपादयितुमाह ।

यथाभिमतध्यानाद्वा ॥ ३९ ॥

यथाभिमते वस्तुनि वाह्ये चन्द्रादौ, अभ्यन्तरे नाड़ीचक्रादौ वा भाव्यमाने चेतः स्थिरं भवति† ॥ ३९ ॥

एवमुपायान् प्रदर्श्य फलप्रदर्शनार्थमाह ।

परमाणु-परममहत्त्वान्तोऽस्य वशीकारः ॥ ४० ॥

एभिरुपायैश्चित्तस्य स्थैर्य्यं भावयतो योगिनः सूक्ष्मविषयभावनाद्वारेण परमाण्वन्तः 'वशीकारः' अप्रतिघातरूपः, जायते, क्वचित् परमाणुपर्य्यन्ते सूक्ष्मे विषयेऽस्य मनो न प्रतिहन्यत इत्यर्थः । एवं स्थूलमाकाशादिपरममहत्त्वपर्य्यन्तं भावयतो न क्वचित् चेतसः प्रतिघात उत्पद्यते सर्व्वत्र खातन्त्र्यं भवतीत्यर्थः ॥ ४० ॥

---

* पूर्व्वमेवोक्तलक्षणेति H पुस्तकपाठः ।

† स्थिरीभवतीति E पुस्तकपाठः । चेतःस्थितिर्भवतीति H पुस्तकपाठः ।

Digitized by Google

एवमेभिरुपायैः संस्कृतस्य चेतसः कीदृग्रूपं भवतीत्याह।

क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृ-ग्रहण-ग्राह्येषु तत्स्थ-तदञ्जनतासमापत्तिः ॥ ४१ ॥

क्षीणा वृत्तयो यस्य सः 'क्षीणवृत्तिः', तस्य, 'ग्रहीतृ-ग्रहण-ग्राह्येषु' आत्मेन्द्रिय-विषयेषु, 'तत्स्थ-तदञ्जनतासमापत्तिः', भवति। 'तत्स्थत्वं' तत्रैकाग्रता। 'तदञ्जनत्वं' तन्मयत्वं, न्यग्भूते चित्ते विषयस्य भाव्यमानस्यैवोत्कर्षः। तथाविधा 'समापत्तिः' तद्रूपपरिणामो भवतीत्यर्थः। दृष्टान्तमाह। 'अभिजातस्येव मणेः', इति यथा 'अभिजातस्य' निर्मलस्य, स्फटिकमणेः, तत्तद्रूपाश्रयवशात्तत्तद्रूपतापत्तिः। एवं अभिजातस्य निर्मलस्य चित्तस्य तत्तद्भावनीयवस्तुपरागात्तत्तद्रूपतापत्तिः। यद्यपि ग्रहीतृ-ग्रहण-ग्राह्येष्वित्युक्तं, तथापि भूमिकाक्रमवशात् ग्राह्य-ग्रहण-ग्रहीतृष्विति बोद्धव्यं। यतः प्रथमं ग्राह्यनिष्ठ एव समाधिस्ततो ग्रहणनिष्ठस्ततोऽस्मितामात्ररूपो ग्रहीतृनिष्ठः, केवलस्य पुरुषस्य ग्रहीतृभाव्यत्वासम्भवात्। ततश्च स्थूलसूक्ष्मग्राह्योपरक्तं चित्तं तच्च समापन्नं भवति। एवं ग्रहणे ग्रहीतरि च समापन्नं बोद्धव्यं ॥ ४१ ॥

इदानीमुक्तायाः एव समापत्तेश्चतुर्विधभेदमाह* ।

शब्दार्थ-ज्ञान-विकल्पैः सङ्कीर्णा सवितर्का ॥ ४२ ॥

श्रोत्रेन्द्रियग्राह्यः स्फोटरूपो वा 'शब्दः'। 'अर्थः' जात्यादिः। 'ज्ञानं' सत्त्वप्रधाना बुद्धिवृत्तिः। 'विकल्पः' उक्तलक्षणः। तैः 'सङ्कीर्णा',

---

* चतुर्विधत्वमाहेति C पुस्तकपाठः।

Digitized by Google

यस्यामेते शब्दाध्यस्तयः परस्पराध्यासेन विकल्परूपेण प्रतिभासन्ते, गौरितिशब्दः, गौरित्यर्थः, गौरितिज्ञानं, इत्यनेनाकारेण सा 'सवितर्का', समापत्तिरित्युच्यते* ॥ ४२ ॥

उक्तलक्षणविपरीतां निर्वितर्कामाह ।

स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का ॥ ४३ ॥

शब्दार्थस्मृतिप्रविलये, प्रत्युदितखट्वाद्याकारप्रतिभाधितया स्वग्भूतज्ञानमात्रत्वेन† 'स्वरूपशून्या इव', 'निर्वितर्का', समापत्तिः ॥ ४३ ॥

भेदान्तरं प्रतिपादयितुमाह ।

एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता ॥ ४४ ॥

'एतयैव' सवितर्कया निर्वितर्कया च समापत्त्या, 'सविचारा निर्विचारा च व्याख्याता'। कीदृशी 'सूक्ष्मविषया' सूक्ष्मस्तन्मात्रेन्द्रियादिः‡ विषयो यस्या सा तथोक्ता । एतेन पूर्वस्याः स्थूलविषयत्वं प्रतिपादितं भवति, सा हि महाभूतालम्बना शब्दार्थ-ज्ञान-विकल्पसहितत्वेन तद्रहितत्वेन च§ । देशकालधर्मानवच्छिन्नः सूक्ष्मोऽर्थः प्रतिभाति यस्यां सा 'सविचारा' । देशकालधर्मादिरहितो धर्मिमात्रतया

---

* समापत्तिरुच्यत इति E पुस्तकपाठः ।

† ज्ञानांशत्वेनेति H पुस्तकपाठः ।

‡ तन्मात्रान्तःकरणमिति F पुस्तकपाठः ।

§ शब्दार्थ-विकल्पविषयत्वेन शब्दार्थ-विकल्परहितत्वेनेति H पुस्तकपाठः।

Digitized by Google

सूक्ष्मोऽर्थस्तन्मात्रेन्द्रियरूपः प्रतिभाति यस्यां सा 'निर्विचारा'।

अस्या एव सूक्ष्मविषयाः ॥ ४४ ॥

किं पर्य्यन्तः सूक्ष्मो विषय इत्याह।

सूक्ष्मविषयत्वञ्चालिङ्गपर्य्यवसानं ॥ ४५ ॥

सविचार-निर्विचारयोः समापत्त्योर्यत् 'सूक्ष्मविषयत्वं', उक्तं। न क्वचिल्लीयते न वा किञ्चिल्लिङ्गयति गमयतीति 'अलिङ्गं' प्रधानं, तत्पर्य्यन्तं सूक्ष्मविषयत्वं। तथा हि गुणानां परिणामे चत्वारि पर्व्वाणि, विशिष्टलिङ्गं, अविशिष्टलिङ्गं, लिङ्गमात्रं, अलिङ्गञ्चेति। विशिष्टलिङ्गं भूतानि। अविशिष्टलिङ्गं तन्मात्रेन्द्रियाणि। लिङ्गमात्रं बुद्धिः। अलिङ्गं प्रधानमिति। नातः परं सूक्ष्ममस्तीत्युक्तं भवति ॥ ४५ ॥

एतासां समापत्तीनां प्रकृते प्रयोजनमाह।

ता एव* सबीजः समाधिः ॥ ४६ ॥

'ता एव' उक्तलक्षणाः समापत्तयः, सह बीजेन आलम्बनेन वर्त्तत इति 'सबीजः' सम्प्रज्ञातः समाधिः, इत्युच्यते, सर्व्वासां सालम्बनत्वात् ॥ ४६ ॥

अथेतरासां समापत्तीनां निर्विचारफलकत्वात्† निर्विचारायाः फलमाह।

निर्विचारवैशारद्ये अध्यात्मप्रसादः ॥ ४७ ॥

'निर्विचारत्वं व्याख्यातं। 'वैशारद्यं' नैर्म्मल्यं। सवितर्कां स्थूल-

---

* सूत्रे टीकायाञ्च एता एवेति E पुस्तकपाठः।

† निर्विचारायाः फलत्वादिति E पुस्तकपाठः।

Digitized by Google

विषयामपेक्ष्य निर्वितर्कायाः प्राधान्यं। ततोऽपि सूक्ष्मविषयायाः सविचारायाः। ततोऽपि निर्विकल्पकरूपाया निर्विचारायाः। तस्यास्तु* निर्विचारायाः प्रकृष्टाभ्यासवशात्† 'वैशारद्ये' नैर्मल्ये सति, 'अध्यात्म-प्रसादः', समुपजायते, चित्तं क्लेशवासनारहितं स्थिरप्रवाहयोग्यं भवति। एतदेव चित्तस्य वैशारद्यं, यत्स्थितौ दार्ढ्यं ॥ ४७ ॥

तस्मिन् सति किं भवतीत्याह।

ऋतम्भरा तत्र प्रज्ञा ॥ ४८ ॥

"ऋतं" सत्यं बिभर्त्ति कदाचिदपि न विपर्ययेणाच्छाद्यते, सा 'ऋतम्भरा', 'प्रज्ञा', तस्मिन् सति, भवतीत्यर्थः। तस्माच्च प्रज्ञालोकात्‡ सर्वं यथावत् पश्यन् योगी प्रकृष्टं योगं प्राप्नोति ॥ ४८ ॥

अस्याः प्रज्ञान्तराद् वैलक्षण्यमाह।

श्रुतानुमानप्रज्ञाभ्यामन्यविषया§ विशेषार्थत्वात् ॥ ४९ ॥

'श्रुतं' आगमज्ञानं, 'अनुमानं' उक्तलक्षणं, ताभ्यां या जायते प्रज्ञा सा सामान्यविषया। न हि शब्दलिङ्गयोरिन्द्रियवद्विशेषप्रतिपत्तौ सामर्थ्यं। इयं पुनर्निर्विचारवैशारद्यसमुपेता॥ प्रज्ञा ताभ्यां विलक्षणा

---

* तस्या अपीति B पुस्तकपाठः।

† प्रकृष्टाभ्यासवशादिति B पुस्तकपाठः।

‡ तस्याश्च प्रज्ञाया इति F पुस्तकपाठः।

§ श्रौतानुमानप्रज्ञाभ्यां सामान्यविषया इति H पुस्तकपाठः। परन्त्वयं न समीचीनः।

॥ निर्विचारवैशारद्यसमुद्भवेति B, E पुस्तकपाठः।

Digitized by Google

विशेषविषयत्वात्। अस्यां हि प्रज्ञायां सूक्ष्म-व्यवहित-विप्रकृष्टानामपि विशेषः स्फुटेनैव रूपेण प्रतिभासते। अतस्तस्यां हि प्रज्ञायां योगिना परः प्रयत्नः कर्त्तव्य इत्युपदिष्टं भवति॥ ४८॥

अस्याः प्रज्ञायाः फलमाह।

तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी॥ ५०॥

तया प्रज्ञया जनितः यः 'संस्कारः,' सोऽन्यान् व्युत्थानजान् समाधिजांश्च* संस्कारान् प्रतिबध्नाति, स्वकार्य्यकरणाक्षमान् करोतीत्यर्थः। यतस्तत्त्वरूपतया तया जनिताः संस्कारा बलवत्त्वात् अतत्त्वरूपप्रज्ञाजनितान् संस्कारान् बाधितुं शक्नुवन्ति। अतस्तामेव प्रज्ञामभ्यसेदित्युक्तं भवति॥ ५०॥

एवं सम्प्रज्ञातसमाधिमभिधायासम्प्रज्ञातं वक्तुमाह।

तस्यापि निरोधे सर्व्वनिरोधान्निर्बीजः समाधिः॥ ५१॥

'तस्यापि' सम्प्रज्ञातस्यापि, 'निरोधे' प्रविलये, सति, 'सर्व्वासां' चित्तवृत्तीनां, स्वकारणे प्रविलयाद्या या संस्कारमात्रा वृत्तिरुदेति, तस्यां तस्यां नेति नेति केवलं पर्य्युदसनात्† 'निर्बीजः समाधिः', आविर्भवति। यस्मिन् सति पुरुषः स्वरूपमात्रनिष्ठः‡ शुद्धो भवति॥

तदत्राधिकृतस्य योगस्य लक्षणं, चित्तवृत्तिनिरोधपदानाञ्च व्या-

---

* तत्त्वज्ञानसमाधिजांश्चेति F पुस्तकपाठः।

† पर्य्यदर्शनादिति B पुस्तकपाठः।

‡ स्वरूपमात्रप्रतिष्ठ इति B पुस्तकपाठः।

Digitized by Google

ख्यानं, अभ्यास-वैराग्यलक्षणं, तस्योपायद्वयस्य*, स्वरूपं भेदश्चाभिधाय सम्प्रज्ञातासम्प्रज्ञातभेदेन योगस्य मुख्यामुख्यभेदमुक्त्वा योगाभ्यास-प्रदर्शनपूर्व्वकान् विस्तरेणोपायान् प्रदर्श्य सुगमोपायप्रदर्शनपरतया ईश्वरस्य स्वरूप-प्रमाण-प्रभाव-वाचकोपासनाक्रम-तत्फलानि निर्णीय चित्तस्य विक्षेपांश्चतुरश्चतुरो दुःखादीन् विस्तरेण च तत्प्रतिषेधोपा-यानेकतत्त्वाभ्यासमैत्र्यादीन् प्राणायामादीन् सम्प्रज्ञातासम्प्रज्ञातपूर्व्व-रङ्गभूतविषयवतीप्रवृत्तिरित्यादीनाख्यायोपसंहारद्वारेण समापत्तीः सलक्षणाः फलसहिताः† स्वस्वविषयसहिताश्चोक्ता सम्प्रज्ञातासम्प्रज्ञा-तयोरुपसंहारमभिधाय सबीजपूर्व्वको निर्व्वीजः समाधिरभिहित इति व्याकृतो योगपादः‡ ॥ ५१ ॥

इति श्रीमहाराजाधिराजश्रीभोजदेवविरचितायां राजमार्त्तण्डा-भिधायां पातञ्जलयोगशास्त्रवृत्तौ योगपादः प्रथमः ॥ ० ॥

---

* अभ्यास-वैराग्योपायद्वयस्येति B पुस्तकपाठः ।
† सलक्षणाः फलसहिता इति B पुस्तकपाठः ।
‡ व्याख्यातो योगपाद इति E पुस्तकपाठः ।

Digitized by Google

अथ द्वितीयः पादः।

ते ते दुष्प्रापयोगर्द्धिसिद्धये येन दर्शिताः।
उपायाः स जगन्नाथस्त्र्यक्षोऽस्तु प्रार्थितार्पये॥ १॥

तदेवं प्रथमे पादे समाहितचित्तस्य सोपायं योगमभिधाय व्युत्थितचित्तस्यापि कथमुपायाभ्यासपूर्व्वको योगः साध्यतामुपयातीति तत्साधनानुष्ठानप्रतिपादनाय क्रियायोगमाह।

तपः-स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः॥ १॥

'तपः' शास्त्रान्तरोपदिष्टं कृच्छ्रं चान्द्रायणादि। 'स्वाध्यायः' प्रणवपूर्व्वाणां मन्त्राणां जपः। 'ईश्वरप्रणिधानं' सर्व्वक्रियाणां तस्मिन् परमगुरौ फलनिरपेक्षतया समर्पणं। एतानि क्रियायोग इत्युच्यते॥१॥

स किमर्थ इत्यत आह।

समाधिभावनार्थः क्लेशतनूकरणार्थश्च॥ २॥

'क्लेशाः' वक्ष्यमाणाः। तेषां 'तनूकरणं' स्वकार्य्यकरणप्रतिबन्धः। 'समाधिः' उक्तलक्षणः। तस्य 'भावना' चेतसि पुनःपुनर्निवेशनं। सः 'अर्थः' प्रयोजनं यस्य स तथोक्तः॥ एतदुक्तं भवति। एते तपः-प्रभृतयोऽभ्यस्यमानास्चित्तगतानविद्यादीन् क्लेशान् शिथिलीकुर्व्वन्तः समाधेरुपकारकतां भजन्ते। तस्मात् प्रथमतः क्रियायोगावधानपरेण योगिना भवितव्यमित्युपदिष्टं॥ २॥

क्लेशतनूकरणार्थमित्युक्तं तत्र के क्लेशा इत्यत आह।

Digitized by Google

अविद्याऽस्मिता-राग-द्वेषाभिनिवेशाः पञ्च क्लेशाः॥ ॥ ३ ॥

'क्लेशाः' अविद्यादयो वक्ष्यमाणलक्षणाः पञ्च। ते बाधनालक्षणं परितापमुपजनयन्तः क्लेशशब्दवाच्या भवन्ति। ते हि चेतसि प्रवर्त्तमानाः संसारलक्षणं* गुणपरिणामं द्रढयन्ति ॥ ३ ॥

सत्यपि सर्व्वेषां तुल्ये क्लेशत्वे मूलभूतत्वादविद्यायाः प्राधान्यं प्रतिपादयितुमाह।

अविद्या क्षेत्रमुत्तरेषां प्रसुप्त-तनु-विच्छिन्नोदाराणां॥ ॥ ४ ॥

'अविद्या' मोहः, अनात्मन्यात्माभिमान इति यावत्। सा 'क्षेत्रं' प्रसवभूमिः, 'उत्तरेषां' अस्मितादीनां प्रत्येकं प्रसुप्तादिभेदेन चतुर्विधानां। अतो यत्राविद्या विपर्य्ययज्ञानरूपा शिथिली भवति, तत्र क्लेशानां अस्मितादीनां नोद्भवो दृश्यते, विपर्य्ययज्ञानसद्भावे च तेषामुद्भवदर्शनात् स्थितमेव मूलत्वमविद्यायाः†। 'प्रसुप्त-तनु-विच्छिन्नोदाराणां', इति तत्र ये क्लेशाश्चित्तभूमौ स्थिताः प्रबोधकाभावे स्वकार्य्यं नारभन्ते, ते 'प्रसुप्ताः', इत्युच्यते। यथा बाल्यावस्थायां। बालस्य हि वासनारूपेण स्थिता अपि क्लेशाः प्रबोधकसहकार्य्यभावेन‡ नाभिव्यज्यन्ते। ते 'तनवः', ये स्वस्वप्रतिपक्षभावनया शिथिलीकृतकार्य्यसम्पादनशक्तयो वासनाविशेषतया चेतस्यवस्थिताः प्रभूतां सामग्रीमन्तरेण

---

* संस्कारलक्षणमिति B पुस्तकपाठः।

† स्थितमेवं मूलमविद्याया इति B पुस्तकपाठः।

‡ स्वबोधकसहकार्य्यभावेनेति B, C पुस्तकपाठः।

Digitized by Google

ERRATA.

(*Sanskrit.*)

Page 2	*line*	1	*for*	मत्युक्तिभिः	*read*	नित्युक्तिभिः
5		1	„	परिक्षामाय	„	परिक्षामार्थं
8		3	„	विमया	„	विषया
10		14	„	सावना	„	भावना
11		2	„	षडानि	„	अडानि
12		7	„	मदीत	„	मदीद
13		2	„	नामच	„	नामच
„		4	„	निराध	„	निरोध
16		1	„	आमयाः	„	आमयाः
19		6-11	„	स्थान	„	स्थान
20		10	„	यद्वाधात्	„	यद्बाधात्
22		15	„	जीयमाद्यः	„	जीयमानः
23		4,5,6,7	„	सम्वित्	„	संवित्
24		16	„	परमाच्यन्तः	„	परमाच्छन्नः
27		5	„	उक्तं।	„	उक्तं तत् अलिङ्गपर्य्यवसानं।

(*English.*)

Page 2	*line*	11	*for*	fo	*read*	of
11	„	30	„	word	„	phrase
17	„	1	„	cive	„	conducive.
43	„	25	„	thum	„	thumb

F पुस्तकपाठः।

‡ मिथाज्ञानरूपायामविद्यायामिति B, C, E पुस्तकपाठः।

§ अतस्मिंस्तदिति प्रतिभास इति A पुस्तकपाठः।

Digitized by Google

* सस्कारलक्षणामात B पुस्तकपाठः ।
† स्थितमेवं मूलमविद्याया इति B पुस्तकपाठः ।
‡ स्वबोधकसहकार्य्यभावेनेति B, C पुस्तकपाठः ।

Digitized by Google

न स्वकार्य्यमारब्धुं क्षमाः। यथाभ्यासवतो हि योगिनः। ते 'विक्षिप्ताः', ये केनचिद् बलवता क्लेशेनाभिभूतमक्रियस्तिष्ठन्ति। यथा द्वेषावस्थायां रागः, रागावस्थायां वा द्वेषः। न ह्यनयोः परस्परविरुद्धयोर्युगपत् सम्भवोऽस्ति। ते 'उदाराः', ये प्राप्तसहकारिसन्निधयः स्वं स्वं कार्य्यमभिनिर्वर्त्तयन्ति। यथा सर्व्वदैव योगपरिपन्थिनो व्युत्थानदशायां*। एषां प्रत्येकं चतुर्व्विधानामपि मूलभूतत्वेन स्थिताप्यविद्याऽन्वयित्वेन प्रतीयते। न हि क्वचिदपि क्लेशानां विपर्य्ययान्वयनिरपेक्षस्वरूपाणां† स्वरूपमुपलभ्यते। तस्याश्च मिथ्याभूतायामविद्यायां‡ सम्यक्ज्ञानेन निवर्त्तितायां दग्धबीजकल्पानां एषां न क्वचित् प्ररोहोऽस्तीति अविद्यानिमित्तत्वमविद्यान्वयस्यैषां निश्चीयते। अतः सर्व्वेऽप्यविद्याव्यपदेशभाजः। सर्व्वेषाञ्च क्लेशानां चित्तविक्षेपकारित्वात् योगिना प्रथममेव तदुच्छेदे यत्नः कर्त्तव्य इति ॥ ४ ॥

अविद्याया लक्षणमाह।

अनित्याशुचि-दुःखानात्मसु नित्य-शुचि-सुखात्म-ख्यातिरविद्या ॥ ५ ॥

अतस्मिंस्तत्प्रतिभासः§ 'अविद्या', इति अविद्यायाः सामान्यलक्षणं। तस्या एव भेदप्रतिपादनं। 'अनित्येषु' घटादिषु, नित्यत्वाभिमानः

---

* व्युत्पादनदशायामिति B पुस्तकपाठः।

† विपर्य्ययान्वयनिरपेक्षायामिति B, E। विपर्य्यासान्वयनिरपेक्षायामिति F पुस्तकपाठः।

‡ मिथ्याज्ञानरूपायामविद्यायामिति B, C, E पुस्तकपाठः।

§ अतस्मिंस्तदिति प्रतिभास इति A पुस्तकपाठः।

Digitized by Google

अविद्येत्युच्यते । एवम् 'अशुचिषु' कायादिषु, शुचित्वाभिमानः । 'दुःखेषु' च विषयेषु, सुखत्वाभिमानः* । 'अनात्मनि' शरीरे, आत्मत्वाभिमानः† । एतेनापुण्ये पुण्यभ्रमोऽनर्थे चार्थभ्रमो व्याख्यातः ॥ ५ ॥

अस्मितां व्याख्यातुमाह ।

दृग्दर्शनशक्त्योरेकात्मतेवास्मिता ॥ ६ ॥

'दृक्शक्तिः' पुरुषः । 'दर्शनशक्तिः' रजस्तमोभ्यामनभिभूतः‡ सात्विकः परिणामोऽन्तःकरणरूपः । तयोर्भोग्यभोक्तृत्वेन जडाजडत्वेनात्यन्तं भिन्नयोः 'एकताभिमानः 'अस्मिता', इत्युच्यते । यथा प्रकृतिर्वस्तुतः कर्तृत्व-भोक्तृत्वरहितापि कर्त्र्यहं भोक्त्र्यहमित्यभिमन्यते, सोऽयमस्मिताख्यो विपर्ययः क्लेशः ॥ ६ ॥

रागस्य लक्षणमाह ।

सुखानुशयी रागः§ ॥ ७ ॥

सुखमनुशेते इति 'सुखानुशयी', सुखस्य सुखानुस्मृतिपूर्वकः सुखसाधनेषु तृष्णारूपो गर्द्धः 'रागसंज्ञः‖ क्लेशः ॥ ७ ॥

द्वेषस्य लक्षणमाह ।

दुःखानुशयी द्वेषः¶ ॥ ८ ॥

---

* सुखाभिमान इति B, C, E पुस्तकपाठः ।
† आत्माभिमान इति B, C, E पुस्तकपाठः ।
‡ रजस्तमोभ्यामनभिधान इति B, E पुस्तकपाठः ।
§ सुखानुशयो राग इति B, C, E पुस्तकपाठः ।
‖ गर्द्धो रागसंज्ञक इति B, E पुस्तकपाठः ।
¶ दुःखानुशयो द्वेष इति B, C, E पुस्तकपाठः ।

Digitized by Google

'दुःखं' उक्तलक्षणं।* तदभिज्ञस्य तदनुस्मृतिपूर्व्वकः तत्साधनेष्वनभिलषतो योऽयं निन्दात्मकः† सः 'द्वेषलक्षणः क्लेशः ॥ ८ ॥

अभिनिवेशस्य लक्षणमाह‡।

स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः§ ॥ ॥ ९ ॥

पूर्व्वजन्मानुभूतमरणदुःखानुभववासनाबलात्॥ भयरूपः समुपजायमानः शरीरविषयादिभिर्मम वियोगो माभूदित्यात्मकं शरीरानुबन्धरूपः सर्व्वस्यैवाल्पतेर्ब्रह्मपर्य्यन्तं¶ निमित्तं विना प्रवर्त्तमानः 'अभिनिवेशाख्यः क्लेशः। तदेवं व्युत्थानस्य क्लेशात्मकत्वात् एकाग्रताभ्यासेन** प्रथमं क्लेशाः परिहर्त्तव्याः ॥ ९ ॥

न चाज्ञातानां तेषां परिहारः शक्यः कर्त्तुमिति तज्ज्ञानाय तेषां उद्देशं चैवं विभागं लक्षणं†† चाभिधाय स्थूलसूक्ष्मभेदभिन्नानां तेषां प्रहाणोपायविभागमाह‡‡।

ते प्रतिप्रसवहेयाः सूक्ष्माः ॥ १० ॥

---

* प्रतिकूलवेदनीयमिति B, C, E पुस्तकपाठः।
† अनभिलषतो या निन्दा इति E पुस्तकपाठः।
‡ अभिनिवेशमाहेति H पुस्तकपाठः।
§ तथा रूढोऽभिनिवेश इति C पुस्तकपाठः। अयमेव पाठो भाष्यकारेण धृतः।
॥ पूर्व्वजन्मानुभवमरणदुःखानुभववासनाबलादिति H पुस्तकपाठः।
¶ सर्व्वस्यैवाल्पतेर्ब्रह्मपर्य्यन्तमिति H पुस्तकपाठः।
** एकाग्रताभ्यासकर्मणेति C, E, पुस्तकपाठः।
†† विभागलक्षणमिति E पुस्तकपाठः।
‡‡ प्रहरणोपायमाहेति B, C, E पुस्तकपाठः।

Digitized by Google

ते 'सूक्ष्माः', क्लेशाः, ये वासनारूपेणावस्थिता न वृत्तिरूपं* परिणाममारभन्ते। 'ते', 'प्रतिप्रसवेन' प्रतिलोमपरिणामेन, 'हेयाः' त्यक्तव्याः। स्वकारणास्मितायां कृतार्थं सवासनं चित्तं यदा प्रविष्टं भवति, तदा कृतस्तेषां निर्मूलानां सम्भवः॥ १०॥

स्थूलानां हानोपायमाह।

ध्यानहेयास्तद्वृत्तयः॥ ११॥

तेषां क्लेशनामारब्धकार्य्याणां याः सुखदुःखमोहात्मिकाः 'वृत्तयः', ताः, 'ध्यानेनैव चित्तैकाग्र्यलक्षणेन, 'हेयाः' हातव्या इत्यर्थः। चित्तपरिकर्म्माभ्यासमात्रेणैव स्थूलत्वात् तासां निवृत्तिर्भवति, यथा वस्त्रादौ घनः स्थूलो मलः प्रक्षालनमात्रेणैव निवर्त्तते। यस्तु तच्च सूक्ष्मः स तैस्तैरुपायैरुत्तापनप्रभृतिभिरेव निवर्त्तयितुं शक्यते॥ ११॥

एवं क्लेशानां तत्त्वमभिधाय कर्म्माशयस्याभिधातुमाह†।

क्लेशमूलः कर्म्माशयो दृष्टादृष्टजन्मवेदनीयः॥ १२॥

'कर्म्माशयः', इत्यनेन तस्य स्वरूपमभिहितं, यतो वासनारूपाण्येव कर्म्माणि। 'क्लेशमूलः', इत्यनेन कारणमभिहितं, यतः कर्म्मणां शुभाशुभानां क्लेशा एव निमित्तं। 'दृष्टादृष्टजन्मवेदनीयः',‡ इत्यनेन फलमुक्तं। अस्मिन्नेव जन्मनि अनुभवनीयः 'दृष्टजन्मवेदनीयः'§।

---

* स्वप्रवृत्तिरूपमिति B, E पुस्तकपाठः।

† कर्म्माशयमभिधातुमाहेति H पुस्तकपाठः।

‡ दृष्टवेदनीय इति B, E पुस्तकपाठः। जन्मवेदनीय इति C पुस्तकपाठः।

§ दृष्टवेदनीय इति E पुस्तकपाठः। जन्मवेदनीय इति C पुस्तकपाठः।

Digitized by Google

जन्मान्तरानुभवनीयः 'अदृष्टजन्मवेदनीयः'। तथाहि कानिचित् पुण्यानि कर्माणि देवताराधनादीनि तीव्रसंवेगेनैव कृतानि दृष्टैव जन्मनि फलं जात्यायुर्भोगलक्षणं प्रयच्छन्ति, यथा नन्दीश्वरस्य भगवन्महेश्वराराधनवशादिहैव जन्मनि जात्याद्यो विशिष्टाः* प्रादुर्भूताः। एवमन्येषां विश्वामित्रादीनां तपःप्रभावाज्जात्यायुषी। केषाञ्चिज्जातिरेव, यथा तीव्रसंवेगेन दुष्टकर्मकृतां नष्टषादीनां जात्यन्तरपरिणामः, उर्व्वशास्तु कार्त्तिकेयवने कृताङ्गपतया†। एवं व्यस्तसमस्तरूपत्वेन‡ यथायोगं योज्यं ॥ १२ ॥

इदानीं कर्म्माशयस्य स्वभेदभिन्नं फलमाह।

सति मूले तद्विपाको जात्यायुर्भोगाः ॥ १३ ॥

'मूलं उक्तलक्षणाः क्लेशाः, तेष्वनभिभूतेषु' सत्सु, कर्म्मणां कुशलाकुशलरूपाणां 'विपाकः' फलं, 'जात्यायुर्भोगाः' भवन्ति। 'जातिः' मनुष्यत्वादिः। 'आयुः' चिरकालं शरीरसम्बन्धः। 'भोगाः' विषयाः इन्द्रियाणि सुखदुःखसंवित्च, कर्म्मकरणभावसाधनव्युत्पत्त्या§ भोगशब्दस्य। इदमत्र तात्पर्य्यं चित्तभूमौ अनादिकालसञ्चिताः कर्म्मवासना यथा यथा पाकमुपयान्ति, तथा तथा गुणप्रधानभावेन स्थिता जात्यायुर्भोगलक्षणं स्वकार्य्यमारभन्ते ॥ १३ ॥

---

* जात्यायुर्भोगविशिष्टा इति B, C, E पुस्तकपाठः।
† कृताङ्गपा तयेति B, E पुस्तकपाठः।
‡ व्यस्तसमस्तत्वेनेति B, E पुस्तकपाठः।
§ कर्म्मकरणभावव्युत्पत्त्येति H पुस्तकपाठः।

Digitized by Google

उक्तानां कर्म्मफलत्वे जात्यादीनां स्वकारणकर्म्मानुसारेण कार्य्य-कर्त्तृत्वमाह।

ते ह्लाद-परितापफलाः पुण्यापुण्यहेतुत्वात्* ॥ १४ ॥

'ह्लादः' सुखं, 'परितापः' दुःखं, ह्लाद-परितापौ फले येषां 'ते' तथोक्ताः। 'पुण्यं' कुशलं कर्म्म, तद्विपरीतं 'अपुण्यं', ते पुण्यापुण्ये कारणे येषां तेषां भावस्तस्मात्। एतदुक्तं भवति, पुण्यकर्म्मारब्धा जात्यायुर्भोगा ह्लादफलाः। अपुण्यकर्म्मारब्धाः परितापफलाः॥ १४॥

एतस्य प्राणिमात्रापेक्षया द्वैविध्यं, योगिनस्तु सर्व्वं दुःखमित्याह।

परिणाम-ताप-संस्कारदुःखैर्गुणवृत्तिविरोधाच्च सर्व्वं दुःखमेव† विवेकिनः ॥ १५ ॥

परिज्ञातक्लेशादिविवेकस्य परिदृश्यमानं सकलमेव भोगसाधनं सविषखाद्यान्नवत्‡ 'दुःखमेव' प्रतिकूलवेदनीयमेवेत्यर्थः। यस्मादत्यन्ताभिजातः§ योगी दुःखलेशेनाप्युद्विजते॥। यथाऽक्षिपाचमूर्णातन्तुस्पर्श-मात्रेणैव महतीं पीडामनुभवति नेतरदङ्गं, तथा विवेकी स्वल्पदुःखानुषङ्गेणाऽपि¶ विरज्यते। कथमित्याह 'परिणाम-ताप-संस्कार-

---

* पुण्यापुण्यहेतुफलत्वादिति E पुस्तकपाठः।

† दुःखमेव सर्व्वं विवेकिन इति E पुस्तकपाठः।

‡ सविषान्नवदिति H पुस्तकपाठः।

§ यस्मादत्यन्ताभिज्ञात इति H पुस्तकपाठः।

॥ दुःखलेशेनाप्युद्विजत इति B, E पुस्तकपाठः।

¶ स्वल्पदुःखानुसम्बन्धेनापीति C पुस्तकपाठः। सुखदुःखानुबन्धेनापीति B, E पुस्तकपाठः।

Digitized by Google

दुःखैः'। विषयाणामुपभुज्यमानानां यथायथं गर्द्धाभिवृद्धेरुदग्राग्नि-कल्पस्य दुःखस्यापरिहार्य्यत्वात् दुःखान्तरसाधनत्वाच्चास्यैव दुःखरूपतेति 'परिणामदुःखत्वं। उपभुज्यमानेषु सुखसाधनेषु तत्प्रतिपन्थिनं* प्रति द्वेषस्य सर्व्वदैवावस्थितत्वात् सुखानुभवकालेऽपि तापदुःखं दुष्परिहा-रमिति 'तापदुःखता। 'संस्कारदुःखत्वं स्वाभिमतानभिमतविषयस-न्निधाने सुखसंवित् दुःखसंवित्तयोपजायमाना तथाविधमेव स्वचेत्ते संस्कारमारभते, संस्काराच्च पुनस्तथाविधसंविदनुभव इत्यपरिमित-संस्कारोत्पत्तिद्वारेण संसारानुच्छेदात् सर्व्वस्यैव दुःखत्वं। 'गुणवृ-त्तिविरोधाच्च' इति, गुणानां सत्वरजस्तमसां या वृत्तयः सुखदुः-खमोहरूपाः परस्परमभिभाव्याभिभावकत्वेन विरुद्धा जायन्ते, तासां सर्व्वत्रैव दुःखानुबन्धाद् दुःखत्वं। एतदुक्तं भवति। ऐकान्तिकीं आत्य-न्तिकीञ्च दुःखनिवृत्तिमिच्छतो विवेकिन उक्तरूपकारणचतुष्टयं यावत् सर्व्वे विषया दुःखरूपतया प्रतिभान्ति। तस्मात् सर्व्वकर्म्मविपाको दुःखरूप एवेत्युक्तं भवति ॥ १५ ॥

तदेवमुक्त†क्लेश-कर्म्माशय-विपाकराशेरविद्याप्रभवत्वात् अविद्यायाश्च मिथ्याज्ञानरूपतया सम्यग्ज्ञानोच्छेद्यत्वात् सम्यग्ज्ञानस्य च ससाध-नहेयोपादेयावधारणरूपत्वात्तदभिधानायाह।

हेयं दुःखमनागतं ॥ १६ ॥

---

* तत्प्रतिबन्धनं इति E पुस्तकपाठः। तत्परिपन्थिनमिति C पुस्तकपाठः।

† तदेवमुक्तस्येति B, C, E पुस्तकपाठः। एतदेवमुक्तस्य G पुस्तकपाठः।

Digitized by Google

भूतख्यातिक्रान्तत्वात्* अनुभूयमानस्य च त्यक्तुमशक्यत्वात् अनागतमेव संसारदुःखं हातव्यमित्युक्तं भवति† ॥ १६ ॥

हेयहेतुमाह ।

द्रष्टृ-दृश्ययोः संयोगो हेयहेतुः ॥ १७ ॥

'द्रष्टा' चिद्रूपः पुरुषः । 'दृश्यं' बुद्धितत्त्वं । तयोरविवेकख्यातिपूर्वको योऽसौ 'संयोगः' भोग्यभोक्तृत्वेन सन्निधानं, सः, 'हेयस्य' दुःखस्य गुणपरिणामरूपस्य संसारस्य, 'हेतुः' कारणं, तन्निवृत्त्या संसारनिवृत्तिर्भवतीत्यर्थः ॥ १७ ॥

द्रष्टृ-दृश्ययोः संयोग इत्युक्तं, तच्च दृश्यस्य स्वरूपं कार्यं प्रयोजनञ्चाह ।

प्रकाश-क्रिया-स्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यं ॥ १८ ॥

'प्रकाशः' सत्त्वस्य धर्मः । 'क्रिया' प्रवृत्तिरूपा रजसः । 'स्थितिः' नियमरूपा तमसः । ताः प्रकाशक्रियास्थितयः 'शीलं' स्वाभाविकं रूपं, यस्य तत् तथाविधं, इति स्वरूपमस्य निर्दिष्टं । 'भूतेन्द्रियात्मकं', इति । 'भूतानि' स्थूलसूक्ष्मभेदेन पृथिव्यादीनि गन्धतन्मात्रादीनि च । 'इन्द्रियाणि' बुद्धीन्द्रिय-कर्मेन्द्रियान्तःकरणभेदेन त्रिविधानि । उभयमेतद् ग्राह्य-ग्रहणरूपं 'आत्मा' स्वरूपाभिन्नः परिणामः, यस्य तत्

---

* व्यतिक्रान्तत्वादिति H पुस्तकपाठः । निष्क्रान्तत्वादिति E, C, I पुस्तकपाठः ।

† इत्युक्तमितीति H पुस्तकपाठः ।

Digitized by Google

तथाविधं, इत्यनेन कार्य्यमुक्तं। 'भोगः' कथितलक्षणः। 'अपवर्गः' विवेकख्यातिपूर्व्विका संसारनिवृत्तिः। तौ भोगापवर्गौ 'अर्थः' प्रयोजनं, यस्य तत् तथाविधं 'दृश्यं', इत्यर्थः ॥ १८ ॥

तस्य च दृश्यस्य नानावस्थारूपपरिणामात्मकस्य ज्ञेयत्वेन ज्ञातव्यत्वात् अवस्थाः कथयितुमाह।

विशेषाविशेष-लिङ्गमात्रालिङ्गानि गुणपर्व्वाणि ॥
॥ १९ ॥

'गुणानां', 'पर्व्वाणि' अवस्थाविशेषाश्चत्वारः, ज्ञातव्याः, इत्युपदिष्टं भवति। तत्र 'विशेषाः' महाभूतेन्द्रियाणि। 'अविशेषाः' तन्मात्रान्तःकरणे। 'लिङ्गमात्रं' बुद्धिः। 'अलिङ्गं' अव्यक्तं, इत्युक्तं*। सर्व्वत्र त्रिगुणरूपस्यान्वयिनेन प्रत्यभिज्ञानादवश्यं ज्ञातव्यत्वेन योगकाले चत्वारि पर्व्वाणि निर्द्दिष्टानि ॥ १९ ॥

एवं ज्ञेयत्वेन दृश्यस्य प्रथमं ज्ञातव्यत्वात् तदवस्थासहितं व्याख्यायोपादेयं द्रष्टारं व्याकर्त्तुमाह†।

द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः ॥ २० ॥

'द्रष्टा' पुरुषः। 'दृशिमात्रः' चेतनामात्रः‡। मात्रग्रहणं धर्म्मिधर्म्मनिरासार्थं। केचिद्धि चेतनामात्मनो धर्म्ममिच्छन्ति। सः 'शुद्धो-

---

* इत्युक्तं भवतीति B, E पुस्तकपाठः।
† वक्तुमाहेति C, E पुस्तकपाठः।
‡ चेतनमात्र इति E पुस्तकपाठः।

Digitized by Google

ऽपि' परिणामित्वाद्यभावेन स्वप्रतिष्ठोऽपि, 'प्रत्ययानुपश्यः'। 'प्रत्ययाः' विषयोपरक्तानि ज्ञानानि, तानि 'अनु' अव्यवधानेन प्रतिसंक्रमाद्यभावेन, पश्यति। एतदुक्तं भवति। जातविषयोपरागायामेव बुद्धौ सन्निधानमात्रेणैव पुरुषस्य द्रष्टृत्वमिति॥ २०॥

स एव च भोक्तेत्याह।

तदर्थ एव* दृश्यस्यात्मा॥ २१॥

'दृश्यस्य' प्रागुक्तलक्षणस्य, 'आत्मा' यत् स्वरूपं, सः 'तदर्थः' तस्य पुरुषस्य भोक्तृत्वसम्पादनं नाम स्वार्थपरिहारेण प्रयोजनं। न हि प्रधानं प्रवर्त्तमानमात्मनः किञ्चित् प्रयोजनमपेक्ष्य प्रवर्त्तते, किन्तु पुरुषस्य भोक्तृत्वसम्पादनायेति† ॥ २१॥

यद्येवं पुरुषस्य भोगसम्पादनमेव प्रयोजनं‡, तदा§ सम्पादिते तस्मिंस्तन्निष्प्रयोजनं विरतव्यापारं स्यात्, तस्मिंश्च परिणामशून्ये मुक्तत्वात् सर्व्वे द्रष्टारो बन्धरहिताः स्युः। ततश्च संसारोच्छेद इत्याशङ्क्याह।

कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसर्व्वसाधारणत्वात्॥ २२॥

यद्यपि विवेकख्यातिपर्य्यन्तात् भोगसम्पादनात् कमपि 'कृतार्थं', पुरुषं, 'प्रति', 'तत्', 'नष्टं' विरतव्यापारं, तथापि 'सर्व्वपुरुषसाधा-

---

* स तदर्थ एवेति B, E पुस्तकपाठः।

† भोगं सम्पादयामीतीति G, H पुस्तकपाठः।

‡ यदिदं पुरुषस्य भोगसम्पादनं तदेव प्रयोजनमिति B, E पुस्तकपाठः।

§ तदानीमिति B, E पुस्तकपाठः।

Digitized by Google

रणत्वात् अन्यान् प्रति 'अनष्टव्यापारं अवतिष्ठते*'। अतः प्रधानस्य सकलभोक्तृसाधारणत्वात् न कदाचनापि† विनाशः, एकमुक्तौ वा न सर्व्वमुक्तिप्रसङ्ग इत्युक्तं भवति॥ २२॥

दृश्य-द्रष्टारौ व्याख्याय संयोगं व्याख्यातुमाह।

स्व-स्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः॥२३॥

कार्य्यद्वारेणास्य लक्षणं करोति। 'स्वशक्तिः' दृश्यस्य स्वभावः। 'स्वामिशक्तिः' द्रष्टुः स्वरूपं। तयोर्द्वयोरपि संवेद्य-संवेदकत्वेन व्यवस्थितयोर्या 'स्वरूपोपलब्धिः', तस्याः कारणं यः 'संयोगः', स च सहजभोग्य-भोक्तृभावस्वरूपान्नान्यः। न हि तयोर्नित्ययोर्व्यापकयोश्च स्वस्वरूपादतिरिक्तः कश्चित् संयोगः। यदेव भोग्यस्य भोग्यत्वं, भोक्तुश्च भोक्तृत्वं अनादिसिद्धं स एव संयोगः॥ २३॥

तस्यापि कारणमाह।

तस्य हेतुरविद्या‡॥ २४॥

या पूर्व्वं विपर्य्यासात्मिका मोहरूपा 'अविद्या', व्याख्याता, सा 'तस्य' अविवेकख्यातिरूपस्य संयोगस्य, कारणं॥ २४॥

हेयं हानक्रियाकर्म्मोच्यते किम्पुनस्तद्धानमित्याह§।

---

* अनष्टमव्यापारमवतिष्ठत इति A पुस्तकपाठः।

† न कदाचिदपीति B, E पुस्तकपाठः। न कथञ्चिदपीति C पुस्तकपाठः।

‡ अस्य हेतुरविद्येति B, E पुस्तकपाठः। तस्य हेतुर्हेयमविद्येति G पुस्तकपाठः। परन्त्वीदृशपाठस्य सप्तसादर्शपुस्तकेष्वसत्त्वात् भाष्यञ्चादनुद्धृतत्वाच्च न समीचीनत्वं।

§ किं पुनर्हानमित्याहेति B, E पुस्तकपाठः।

Digitized by Google

तदभावात् संयोगाभावो हानं तद्दृशेः कैवल्यं ॥ ॥ २५ ॥

'तस्याः' अविद्यायाः स्वरूपविरुद्धेन सम्यग् ज्ञानेनोन्मूलितायाः, योऽयं 'अभावः', तस्मिन् सति, तत्कार्यस्य 'संयोगस्य', अपि 'अभावः', तत् 'हानं' इत्युच्यते। अयमर्थः नैतस्य मूर्त्तद्रव्यवत् परित्यागो युज्यते, किन्तु जातायां विवेकख्यातावविवेकख्यातिनिमित्तः* संयोगः स्वयमेव निवर्त्तत इति तस्य हानं। यदेव च संयोगस्य हानं 'तत्', एव नित्यकैवल्यस्थापि† पुरुषस्य 'कैवल्यं', व्यपदिश्यते। तदेवं संयोगस्य स्वरूपं‡ कारणं कार्यञ्चाभिहितं ॥ २५ ॥

अथ हानोपायकथनद्वारेण उपादेयकारणमाह।

विवेकख्यातिरविप्लवा हानोपायः ॥ २६ ॥

अन्ये गुणाः अन्यः पुरुष इत्येवंविधस्य 'विवेकस्य', 'ख्यातिः' प्रज्ञा, सा 'हानस्य' दृश्यपरित्यागस्य, 'उपायः'§ कारणं। कीदृशी 'अविप्लवा' न विद्यते विप्लवो विच्छेदोऽन्तराऽन्तरा॥ व्युत्थानरूपो यस्याः सा 'अविप्लवा'।

इदमत्र तात्पर्यं। प्रतिपक्षभावनाबलात् अविद्याप्रविलये विनि-

---

* अविवेकनिमित्त इति B, G पुस्तकपाठः।
† नित्यं कैवल्यस्येति H पुस्तकपाठः।
‡ तदेवं दृश्यस्य संयोगस्वरूपमिति B, E पुस्तकपाठः।
§ दुःखपरित्यागस्योपाय इति B, E पुस्तकपाठः।
॥ अन्तरात्मनेति E पुस्तकपाठः।

Digitized by Google

कृतकृत्यत्व-कर्तृत्वाद्यभिमानाया रजस्तमोमलानभिभूताया बुद्धेरग्र्यमुखाया या चिच्छायासंक्रान्तिः सा विवेकख्यातिरित्युच्यते। तस्याश्च सन्ततसंविच्छेदेन प्रवृत्तायां* दृश्यस्याधिकारनिवृत्तेर्भवत्येव कैवल्यं ॥ ॥ २६ ॥

उत्पन्नविवेकख्यातेः† पुरुषस्य यादृशी प्रज्ञा भवति, तां कथयन् विवेकख्यातेरेव स्वरूपमाह।

तस्य सप्तधा प्रान्तभूमौ प्रज्ञा ॥ २७ ॥

'तस्य' उत्पन्नविवेकज्ञानस्य, ज्ञातव्यविवेकरूपा 'प्रज्ञा', 'प्रान्तभूमौ' सकलसालम्बनसमाधिभूमिपर्य्यन्तं, सप्तप्रकारा भवति।

तच्च कार्य्यविमुक्तिरूपा चतुःप्रकारा। ज्ञातं मया ज्ञेयं। न ज्ञातव्यं किञ्चिदस्ति। क्षीणा मे क्लेशा, न मे किञ्चित् चेतव्यमस्ति। अधिगतं मया ज्ञानं, प्राप्ता मया विवेकख्यातिः। इतिप्रत्ययान्तर-परिहारेण तस्यामवस्थायामीदृश्येव प्रज्ञा जायते। ईदृशी प्रज्ञा कार्य्यविषयं निर्मलं ज्ञानं कार्य्यविमुक्तिरित्युच्यते।

चित्तविमुक्तिस्त्रिविधा। चरितार्था मे बुद्धिः। गुणाश्च कृताधिकाराः गिरिशिखरनिपतिता इव पाषाणो न पुनः स्थितिं यास्यन्ति, स्वकारणे प्रलयाभिमुखानां मोहाभिधानमूलकारणाभावान्निष्प्रयोजनत्वाच्चामीषां कुतः प्ररोहः। स्वात्मीभूतश्च मे समाधिः। तस्मिन् सति स्वरूपप्रतिष्ठोऽहमिति। ईदृशी त्रिःप्रकारा चित्तविमुक्तिः।

---

* सन्ततत्वेन प्रवृत्तायामिति H, C पुस्तकपाठः।

† उद्भूतविवेकख्यातेरिति C, E पुस्तकपाठः।

Digitized by Google

तदेवमीदृश्यां सप्तविधायां प्रान्तभूमिप्रज्ञायामुपजातायां पुरुषः केवल इत्युच्यते ॥ २७ ॥

विवेकख्यातिः संयोगाभावे हेतुरित्युक्तं*। तस्यास्तूत्पत्तौ किं निमित्तमित्यत आह।

योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः ॥ २८ ॥

'योगाङ्गानि वक्ष्यमाणानि। तेषां 'अनुष्ठानात्' ज्ञानपूर्व्वकाद्भ्यासात्, 'आविवेकख्यातेः', 'अशुद्धिक्षये' चित्तसत्त्वस्य प्रकाशावरणलक्षणक्लेशरूपाशुद्धिक्षये,† या 'ज्ञानदीप्तिः' तारतम्येन सात्त्विकः परिणामः, विवेकख्यातिपर्य्यन्तः‡ स तस्याः ख्यातेर्हेतुरित्यर्थः ॥ ॥ २८ ॥

योगाङ्गानुष्ठानादशुद्धिक्षय इत्युक्तं, कानि पुनस्तानि योगाङ्गानीति तेषां उद्देशमाह।

यम-नियमासन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयोऽष्टावङ्गानि ॥ २९ ॥

इह कानिचित्समाधेः साक्षादुपकारकत्वेनान्तराणङ्गानि? यथा 'धारणादीनि। कानिचित् प्रतिपक्षभूतहिंसादिवितर्कोन्मूलनद्वारेण

---

* इत्युक्तं भवतीति B, E पुस्तकपाठः।
† क्लेशस्याशुद्धिक्षय इति B, E पुस्तकपाठः।
‡ विवेकख्यातिपूर्व्वक इति B, C, E पुस्तकपाठः।
§ अन्तरङ्गानीति B, C, E पुस्तकपाठः।

Digitized by Google

समाधेरुपकुर्व्वन्ति, यथा 'यम-नियमादयः। तत्रासनादीनामुत्तरोत्तरमुपकारकत्वं यथा सत्यासनजये प्राणायामस्थैर्य्यं। एवमुत्तरत्रापि योज्यं* ॥ २९ ॥

क्रमेण एषां स्वरूपमाह।

अहिंसा-सत्यास्तेय-ब्रह्मचर्य्यापरिग्रहा यमाः ॥ ३० ॥

तत्र प्राणवियोगप्रयोजनव्यापारो हिंसा। सा च सर्व्वानर्थहेतुः। तद्भावः 'अहिंसा'। हिंसायाः सर्व्वकालमेव† परिहार्य्यत्वात् प्रथमं तद्भावरूपाया अहिंसाया निर्द्देशः। 'सत्यं' वाङ्मनसयोर्यथार्थत्व‡। स्तेयं परस्वापहरणं। तद्भावः 'अस्तेयं'। 'ब्रह्मचर्य्यं' उपस्थसंयमः। 'अपरिग्रहः' भोगसाधनानामस्वीकरण§। त एते‖ अहिंसादयः पञ्च 'यमशब्दवाच्याः योगाङ्गत्वेन निर्द्दिष्टाः ॥ ३० ॥

एषां विशेषमाह।

एते¶ जाति-देश-काल-समयानवच्छिन्नाः सार्व्वभौमा महाव्रतम् ॥ ३१ ॥

'जातिः' ब्राह्मणत्वादिः। 'देशः' तीर्थादिः। 'कालः' चतुर्द्दश्यादिः।

---

* न्याय्यमिति G पुस्तकपाठः।
† सर्व्वप्रकारेणैवेति B, C, E पुस्तकपाठः।
‡ वाङ्मनसोर्यथार्थत्वमिति B, E पुस्तकपाठः।
§ अस्वीकार इति C, E पुस्तकपाठः।
‖ तत्र ते अहिंसादय इति B, E पुस्तकपाठः।
¶ एते त्विति B, E पुस्तकपाठः।

Digitized by Google

तदेवमीदृश्यां सप्तविधायां प्रान्तभूमिप्रज्ञायामुपजातायां पुरुषः केवल इत्युच्यते ॥ २७ ॥

विवेकख्यातिः संयोगाभावे हेतुरित्युक्तं*। तस्यास्तूत्पत्तौ किं निमित्तमित्यत आह।

योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः ॥ २८ ॥

'योगाङ्गानि वक्ष्यमाणानि। तेषां 'अनुष्ठानात्' ज्ञानपूर्वकादभ्यासात्, 'आविवेकख्यातेः', 'अशुद्धिक्षये' चित्तसत्त्वस्य प्रकाशावरणलक्षणक्लेशरूपाशुद्धिक्षये,† या 'ज्ञानदीप्तिः' तारतम्येन सात्त्विकः परिणामः, विवेकख्यातिपर्य्यन्तः‡ स तस्याः ख्यातेर्हेतुरित्यर्थः ॥ ॥ २८ ॥

योगाङ्गानुष्ठानादशुद्धिक्षय इत्युक्तं, कानि पुनस्तानि योगाङ्गानीति तेषां उद्देशमाह।

यम-नियमासन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयोऽष्टावङ्गानि ॥ २९ ॥

इह कानिचित्समाधेः साक्षादुपकारकत्वेनान्तराण्यङ्गानि§ यथा 'धारणादीनि। कानिचित् प्रतिपक्षभूतहिंसादिवितर्कोन्मूलनद्वारेण

---

* इत्युक्तं भवतीति B, E पुस्तकपाठः।
† क्लेशस्याशुद्धिक्षय इति B, E पुस्तकपाठः।
‡ विवेकख्यातिपूर्वक इति B, C, E पुस्तकपाठः।
§ अन्तरङ्गानीति B, C, E पुस्तकपाठः।

Digitized by Google

समाधेरुपकुर्व्वन्ति, यथा 'यम-नियमादयः। तत्रासनादीनामुत्तरोत्तरमुपकारकत्वं यथा सत्यासनजये प्राणायामस्थैर्य्यं। एवमुत्तरत्रापि योज्यं* ॥ २९ ॥

क्रमेण एषां स्वरूपमाह।

अहिंसा-सत्यास्तेय-ब्रह्मचर्य्यापरिग्रहा यमाः ॥ ३० ॥

तत्र प्राणवियोगप्रयोजनव्यापारो हिंसा। सा च सर्व्वानर्थहेतुः। तद्भावः 'अहिंसा'। हिंसायाः सर्व्वकालमेवा† परिहार्य्यत्वात् प्रथमं तद्भावरूपाया अहिंसाया निर्द्देशः। 'सत्यं' वाङ्मनसयोर्यथार्थत्वं‡। स्तेयं परस्वापहरणं। तद्भावः 'अस्तेयं'। 'ब्रह्मचर्य्यं' उपस्थसंयमः। 'अपरिग्रहः' भोगसाधनानामस्वीकरणं§। त एते‖ अहिंसादयः पञ्च 'यमशब्दवाच्याः योगाङ्गत्वेन निर्द्दिष्टाः ॥ ३० ॥

एषां विशेषमाह।

एते¶ जाति-देश-काल-समयानवच्छिन्नाः सार्व्वभौमा महाव्रतम् ॥ ३१ ॥

'जातिः' ब्राह्मणत्वादिः। 'देशः' तीर्थादिः। 'कालः' चतुर्द्दश्यादिः।

---

* न्याय्यमिति G पुस्तकपाठः।
† सर्व्वप्रकारेणैवेति B, C, E पुस्तकपाठः।
‡ वाङ्मनसोर्यथार्थत्वमिति B, E पुस्तकपाठः।
§ अस्वीकार इति C, E पुस्तकपाठः।
‖ तत्र ते अहिंसादय इति B, E पुस्तकपाठः।
¶ एते इति B, E पुस्तकपाठः।

Digitized by Google

'समयः' ब्राह्मणप्रयोजनादिः। एतैश्चतुर्भिः 'अनवच्छिन्नाः', पूर्वोक्ता अहिंसादयो यमाः सर्व्वासु जात्यादिषु चित्तभूमिषु भवाः 'महाव्रतं' इत्युच्यते। तद् यथा ब्राह्मणं न हनिष्यामि, तीर्थे कंचन न हनिष्यामि, चतुर्दश्यां न हनिष्यामि, देव-ब्राह्मणार्थव्यतिरेकेण* न हनिष्यामीत्येवंचतुर्विधावच्छेदव्यतिरेकेण कञ्चित् कंचित् कदाचित् कञ्चिंत्किञ्चिदप्यर्थं न हनिष्यामीत्यनवच्छिन्नाः। एवं सत्यादिषु यथायोगं योज्यं। इत्थमनियतीभूताः† सामान्येनैव प्रवृत्ताः महाव्रतमित्युच्यते, न पुनः परिच्छिन्नावधारणं‡ ॥ ३१ ॥

नियममाह§।

शौच-सन्तोष-तपः-स्वाध्यायेश्वरप्रनिधानानि नियमाः ॥ ३२ ॥

'शौचं', द्विविधं बाह्यमाभ्यन्तरञ्च। बाह्यं मृज्जलादिभिः कायादिप्रक्षालनं। आभ्यन्तरं मैत्र्यादिभिश्चित्तमलानां प्रक्षालनं। 'सन्तोषः' तुष्टिः। शेषाः प्रागेव कृतव्याख्यानाः‖। एते शौचादयः 'नियमशब्दवाच्याः ॥ ३२ ॥

कथमेषां योगाङ्गत्वमित्यत आह।

---

* देवब्राह्मणप्रयोजनव्यतिरेकेण कमपीति B, C, E पुस्तकपाठः।

† इत्थमनियतीकृता इति H पुस्तकपाठः।

‡ न पुनः परकीयाद्यादिधारणमिति A पुस्तकपाठः।

§ नियमानाहेति A पुस्तकपाठः।

‖ प्रागेव व्याख्याता इति B, C, E पुस्तकपाठः। भूतव्याख्याना इति H पुस्तकपाठः।

Digitized by Google

वितर्कबाधने प्रतिपक्षभावनं ॥ ३३ ॥

वितर्क्यन्त इति 'वितर्काः' योगपरिपन्थिनो हिंसादयः। तेषां 'प्रतिपक्षभावने सति, यदा बाधा भवति,* तदा योगः सुकरो भवतीति भवत्येव यमनियमानां योगाङ्गत्वं ॥ ३३ ॥

इदानीं वितर्काणां स्वरूपं भेदं प्रकारं कारणं फलञ्च क्रमेणाह।

वितर्का हिंसादयः कृत-कारितानुमोदिता लोभ-क्रोध-मोहपूर्व्वका मृदु-मध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम् ॥ ३४ ॥

एते पूर्व्वोक्ताः 'हिंसादयः', प्रथमं त्रिधा भिद्यन्ते 'कृत-कारितानुमोदितभेदेन। तत्र स्वयं निष्पादिताः 'कृताः'। कुरु कुर्व्विति प्रयोजकव्यापारेण समुत्पादिताः 'कारिताः'। अन्येन क्रियमाणाः साधु साध्वित्यङ्गीकृताः† 'अनुमोदिताः'। एतच्च त्रैविध्यं परस्परव्यामोहनिवारणायोच्यते‡। अन्यथा मन्दमतिरेवं मन्येत न मया स्वयं हिंसा कृतेति नास्ति मे दोष इति। एतेषां कारण-प्रतिपादनायाह, 'लोभ-क्रोध-मोहपूर्व्वकाः', इति। यद्यपि लोभः क्रोधः प्रथमं निर्द्दिष्टः§ तथापि सर्व्वक्लेशानां मोहस्यानात्मन्यात्मा-

---

* यदि बाधा भवतीति E, A, D, F पुस्तकपाठः। यथा बाधा भवतीति C पुस्तकपाठः।

† साध्वित्यङ्गीकृता इति A पुस्तकपाठः।

‡ मोहनिवारणायोच्यत इति B, E पुस्तकपाठः।

§ लोभः प्रथमं निर्द्दिष्ट इति G पुस्तकपाठः।

Digitized by Google

भिमानलक्षणस्य निदानत्वात् तस्मिन् सति स्वपरविभागपूर्व्वकत्वेन लोभ-क्रोधादीनामुद्भवात्* मूलत्वमवसेयं । मोहपूर्व्विका सर्व्वा दोषजातिरित्यर्थः । 'लोभः' तृष्णा । 'क्रोधः' कृत्याकृत्यविवेकोन्मूलकः प्रज्वलनात्मकश्चित्तधर्म्मः । प्रत्येकं कृतादिभेदेन त्रिप्रकारा अपि हिंसाद्यो मोहादिकारणत्वेन त्रिधा भिद्यन्ते । तेषामेव पुनरवस्थाभेदेन त्रैविध्यमाह 'मृदु-मध्याधिमात्राः' । 'मृदवः' मन्दा न तीव्राः नापि मध्यमाः । 'मध्याः' न मन्दा नापि तीव्राः । 'अधिमात्राः' तीव्राः, न मध्या नापि मन्दाः । इति नव भेदाः† । इत्थं त्रैविध्ये सति सप्तविंशतिर्भवति । मृदादीनामपि प्रत्येकं मृदुमध्याधिमात्रभेदात् त्रैविध्यं सम्भवति । तत् यथायोगं योज्यं । तद् यथा मृदुमृदुः मृदुमध्यो मृदुतीव्र इति । एषां फलमाह 'दुःखाज्ञानानन्तफलाः', इति । 'दुःखं' प्रतिकूलतयावभासमानो राजसश्चित्तधर्म्मः । 'अज्ञानं' मिथ्याज्ञानं संशयविपर्य्यासरूपं‡ । ते दुःखाज्ञाने 'अनन्तं' अपरिच्छिन्नं, 'फलं', येषां ते तथोक्ताः । इत्थं तेषां स्वरूप-कारणादिभेदेन§ ज्ञातानां प्रतिपक्षभावनया योगिना परिहारः कर्त्तव्य इत्युपदिष्टं भवति ॥ ३४ ॥

एषामभ्यासात् प्रकर्षं गच्छतामनु निष्पाद्यिन्यः सिद्धयो यथा भवन्ति, तथा क्रमेण प्रतिपादयितुमाह ।

---

* समुद्भवादिति B, E पुस्तकपाठः ।

† इत्येवं नव भेदा इति B, C, E पुस्तकपाठः ।

‡ संशयविपर्य्ययरूपमिति G पुस्तकपाठः ।

§ स्वरूपादिभेदेनेति H पुस्तकपाठः ।

Digitized by Google

अहिंसाप्रतिष्ठायां* तत्सन्निधौ वैरत्यागः॥ ३५॥

'तस्याहिंसां भावयतः, 'सन्निधौ',† सहजविरोधिनामप्यहिनकुलादीनां 'वैरत्यागः' निर्मत्सरतयावस्थानं भवति। हिंसारता हिंस्रत्वं परित्यजन्तीत्यर्थः॥ ३५॥

सत्याभ्यासवतः किं भवतीत्याह।

सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्॥ ३६॥

क्रियमाणा हि 'क्रियाः' यागादिकाः, 'फलं' स्वर्गादिकं, प्रयच्छन्ति। तस्य तु सत्याभ्यासवतो योगिनः तथा सत्यं प्रह्रष्यते, यथा अफलतायामपि क्रियायां योगी फलमाप्नोति‡। तद्वचनाद् यस्य कस्यचित् क्रियामकुर्व्वतोऽपि क्रियाफलं भवतीत्यर्थः॥ ३६॥

अस्तेयाभ्यासवतः फलमाह।

अस्तेयप्रतिष्ठायां सर्व्वरत्नोपस्थानम्॥ ३७॥

'अस्तेयं', यदाऽभ्यसति योगी तदा तस्य प्रकर्षात् निरभिलाषस्यापि 'सर्व्वतोदिग्भ्यः§ 'रत्नान्युपतिष्ठन्ते॥ ३७॥

ब्रह्मचर्य्याभ्यासस्यापि फलमाह।

ब्रह्मचर्य्यप्रतिष्ठायां वीर्य्यलाभः॥ ३८॥

---

* सूत्रे, अहिंसाप्रतिष्ठायामितिपाठः G पुस्तके नास्ति।
† वृत्तौ, सन्निधाविति पाठः G पुस्तके नास्ति।
‡ फलमाश्रयतीति B, C, E पुस्तकपाठः।
§ सर्व्वतो दिक्स्थानीति G पुस्तकपाठः।

Digitized by Google

भिमानलक्षणस्य निदानत्वात् तस्मिन् सति स्वपरविभागपूर्व्वकत्वेन लोभ-क्रोधादीनामुद्भवात्* मूलत्वमवसेयं। मोहपूर्व्विका सर्व्वा दोषजातिरित्यर्थः। 'लोभः' तृष्णा। 'क्रोधः' कृत्याकृत्यविवेकोन्मूलकः प्रज्वलनात्मकश्चित्तधर्म्मः। प्रत्येकं कृतादिभेदेन त्रिप्रकारा अपि हिंसाद्यो मोहादिकारणत्वेन त्रिधा भिद्यन्ते। तेषामेव पुनरवस्थाभेदेन त्रैविध्यमाह 'मृदु-मध्याधिमात्राः'। 'मृदवः' मन्दा न तीव्राः नापि मध्यमाः। 'मध्याः' न मन्दा नापि तीव्राः। 'अधिमात्राः' तीव्राः, न मध्या नापि मन्दाः। इति नव भेदाः†। इत्थं त्रैविध्ये सति सप्तविंशतिर्भवति। मृदादीनामपि प्रत्येकं मृदुमध्याधिमात्रभेदात् त्रैविध्यं सम्भवति। तत् यथायोगं योज्यं। तद् यथा मृदुमृदुः मृदुमध्यो मृदुतीव्र इति। एषां फलमाह 'दुःखाज्ञानानन्तफलाः', इति। 'दुःखं' प्रतिकूलतयावभासमानो राजसश्चित्तधर्म्मः। 'अज्ञानं' मिथ्याज्ञानं संशयविपर्य्यासरूपं‡। ते दुःखाज्ञाने 'अनन्तं' अपरिच्छिन्नं, 'फलं', येषां ते तथोक्ताः। इत्थं तेषां स्वरूप-कारणादिभेदेन§ ज्ञातानां प्रतिपक्षभावनया योगिना परिहारः कर्त्तव्य इत्युपदिष्टं भवति ॥ ३४ ॥

एषामभ्यासात् प्रकर्षं गच्छतामनु निष्पाद्यिन्यः सिद्धयो यथा भवन्ति, तथा क्रमेण प्रतिपादयितुमाह।

---

* समुद्भवादिति B, E पुस्तकपाठः।
† इत्येवं नव भेदा इति B, C, E पुस्तकपाठः।
‡ संशयविपर्य्ययरूपमिति G पुस्तकपाठः।
§ स्वरूपादिभेदेनेति H पुस्तकपाठः।

Digitized by Google

अहिंसाप्रतिष्ठायां* तत्सन्निधौ वैरत्यागः॥ ३५॥

'तस्याहिंसां भावयतः, 'सन्निधौ',† सहजविरोधिनामप्यहिनकुलादीनां 'वैरत्यागः' निर्मत्सरतयावस्थानं भवति। हिंसारता हिंस्रत्वं परित्यजन्तीत्यर्थः॥ ३५॥

सत्याभ्यासवतः किं भवतीत्याह।

सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्॥ ३६॥

क्रियमाणा हि 'क्रियाः' यागादिकाः, 'फलं' स्वर्गादिकं, प्रयच्छन्ति। तस्य तु सत्याभ्यासवतो योगिनः तथा सत्यं प्रकल्प्यते, यथा अकृतायामपि क्रियायां योगी फलमाप्नोति‡। तद्वचनाद् यस्य कस्यचित् क्रियामकुर्व्वतोऽपि क्रियाफलं भवतीत्यर्थः॥ ३६॥

अस्तेयाभ्यासवतः फलमाह।

अस्तेयप्रतिष्ठायां सर्व्वरत्नोपस्थानम्॥ ३७॥

'अस्तेयं', यदाऽभ्यस्यति योगी तदा तस्य प्रकर्षात् निरभिलाषस्यापि 'सर्व्वतोदिग्भ्यः§ 'रत्नान्युपतिष्ठन्ते॥ ३७॥

ब्रह्मचर्य्याभ्यासस्यापि फलमाह।

ब्रह्मचर्य्यप्रतिष्ठायां वीर्य्यलाभः॥ ३८॥

---

* सूत्रे, अहिंसाप्रतिष्ठायामितिपाठः G पुस्तके नास्ति।
† वृत्तौ, सन्निधाविति पाठः G पुस्तके नास्ति।
‡ फलमाश्रयतीति B, C, E पुस्तकपाठः।
§ सर्व्वतो दिक्स्थानीति G पुस्तकपाठः।

Digitized by Google

यः किल 'ब्रह्मचर्य्यं', अभ्यस्यति, तस्य तत्प्रकर्षाच्चिरतिग्रयं 'वीर्य्यं' सामर्थ्यं आविर्भवति। वीर्य्यनिरोधो हि ब्रह्मचर्य्यं तस्य प्राकर्षाच्छरीरेन्द्रियमनःसु वीर्य्यं प्रकर्षमागच्छति ॥ ३८ ॥

अपरिग्रहाभ्यासस्य फलमाह।

अपरिग्रहस्थैर्य्ये जन्मकथन्तासम्बोधः ॥ ३९ ॥

कथमित्यस्य भावः 'कथन्ता'। जन्मनः कथन्ता 'जन्मकथन्ता'। तस्याः 'सम्बोधः' सम्यग्ज्ञानं। जन्मान्तरे कोऽहमासं कीदृशः किं कार्य्यकारीति जिज्ञासायां सर्व्वमेव सम्यग्जानातीत्यर्थः।

न केवलं भोगसाधनपरिग्रह एव परिग्रहः। किन्तु यावदात्मनः शरीरपरिग्रहोऽपि परिग्रहः भोगसाधनत्वाच्छरीरस्य। तस्मिन् सति रागानुबन्धात्* बहिर्मुखायामेव प्रवृत्तौ न तात्त्विकज्ञानप्रादुर्भावः। यदा पुनः शरीरादिपरिग्रहनैरपेक्ष्येण माध्यस्थ्यमवलम्बते तदा मध्यस्थस्य रागादित्यागात् सम्यग्ज्ञानहेतुर्भवत्येव पूर्व्वापरजन्मसम्बोधः ॥ ॥ ३९ ॥

उक्ता यमानां सिद्धयः। अथ नियमानाह।

शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः ॥ ४० ॥

यः 'शौचं भावयति, तस्य 'स्वाङ्गेष्वपि कारणस्वरूपपर्य्यालोचनद्वारेण 'जुगुप्सा' घृणा, समुपजायते। अशुचिरयं कायः नाचाग्रहः† कर्त्तव्य इत्यमुनैव हेतुना 'परैः' अन्यैश्च कायवद्भिः, 'असंसर्गः' सम्पर्कः

* रागानुसन्धादिति H पुस्तकपाठः।
† मास्य सङ्गच्छ इति E पुस्तकपाठः।

Digitized by Google

भावः* संसर्गपरिवर्जनमित्यर्थः। यः किल स्वमेव कायं जुगुप्सते तत्तद्-वद्यदर्शनात् स कथं परकीयैस्तथाभूतैः कायैः संसर्गमनुभवति ॥ ४० ॥

शौचस्यैव फलान्तरमाह।

किञ्च† सत्त्वशुद्धि-सौमनस्यैकाग्र्येन्द्रियजयात्मदर्शन-योग्यत्वानि च ॥ ४१ ॥

भवन्तीति‡ वाक्यशेषः। 'सत्त्वं' प्रकाशसुखाद्यात्मकं§। तस्य 'शुद्धिः' रजस्तमोभ्यामनभिभवः। 'सौमनस्यं' खेदाननुभवेन मानसी प्रीतिः। 'एकाग्र्यता' नियतेन्द्रियविषये‖ चेतसः स्थैर्यं। 'इन्द्रिय-जयः' विषयपराङ्मुखानामिन्द्रियाणां स्वात्मन्यवस्थानं। 'आत्मदर्शने' विवेकख्यातिरूपे, चित्तस्य 'योग्यत्वं'। शौचाभ्यासवत एते सत्त्वशुद्ध्या-दयः क्रमेण प्रादुर्भवन्ति। तथा हि शौचात् सत्त्वशुद्धिः¶। सत्त्वशुद्धेः सौमनस्यं। सौमनस्यादेकाग्र्यता**। एकाग्र्यतायाः†† इन्द्रियजयः। इन्द्रियजयादात्मदर्शनयोग्यतेति ॥ ४१ ॥

सन्तोषाभ्यासस्य फलमाह।

सन्तोषादनुत्तमः सुखलाभः ॥ ४२ ॥

---

* संसर्गाभाव इति H पुस्तकपाठः।

† किञ्चेतिपाठः नवखादर्शपुस्तकेषु नास्ति, परन्तु भाष्यकारेण धृतः।

‡ सम्भवन्तीतीति H पुस्तकपाठः।

§ प्रकाशसुखाद्यात्मकत्वमिति B, E, C पुस्तकपाठः।

‖ नियतविषये इति B, C, E पुस्तकपाठः।

¶ शौचात् सत्त्वशुद्धिरितिपाठः A, B, C, D, E, H पुस्तकेषु नास्ति।

** सौमनस्यादैकाग्र्यमिति G पुस्तकपाठः।

†† ऐकाग्र्यादिति G पुस्तकपाठः।

Digitized by Google

यः किल 'ब्रह्मचर्य्यं', अभ्यस्यति, तस्य तत्प्रकर्षान्निरतिशयं 'वीर्य्यं' सामर्थ्यं आविर्भवति। वीर्य्यनिरोधो हि ब्रह्मचर्य्यं तस्य प्राकर्षाच्छरीरेन्द्रियमनःसु वीर्य्यं प्रकर्षमागच्छति ॥ ३८ ॥

अपरिग्रहाभ्यासस्य फलमाह।

अपरिग्रहस्थैर्य्ये जन्मकथन्तासम्बोधः ॥ ३९ ॥

कथमित्यस्य भावः 'कथन्ता'। जन्मनः कथन्ता 'जन्मकथन्ता'। तस्याः 'सम्बोधः' सम्यग्ज्ञानं। जन्मान्तरे कोऽहमासं कीदृशः किं कार्य्यकारीति जिज्ञासायां सर्व्वमेव सम्यग्जानातीत्यर्थः।

न केवलं भोगसाधनपरिग्रह एव परिग्रहः। किन्तु यावदात्मनः शरीरपरिग्रहोऽपि परिग्रहः भोगसाधनत्वाच्छरीरस्य। तस्मिन् सति रागानुबन्धात्* बहिर्मुखायामेव प्रवृत्तौ न तात्त्विकज्ञानप्रादुर्भावः। यदा पुनः शरीरादिपरिग्रहनैरपेक्ष्येण माध्यस्थ्यमवलम्बते तदा मध्यस्थस्य रागादित्यागात् सम्यग्ज्ञानहेतुर्भवत्येव पूर्व्वापरजन्मसम्बोधः ॥ ॥ ३९ ॥

उक्ता यमानां सिद्धयः। अथ नियमानाह।

शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः ॥ ४० ॥

यः 'शौचं भावयति, तस्य 'स्वाङ्गेष्वपि कारणस्वरूपपर्य्यालोचनद्वारेण 'जुगुप्सा' घृणा, समुपजायते। अशुचिरयं कायः नाचार्य्यः† कर्त्तव्य इत्यमुनैव हेतुना 'परैः' अन्यैश्च कायवद्भिः, 'असंसर्गः' सम्पर्का-

---

* रागानुसन्धादिति H पुस्तकपाठः।

† मास्य सङ्गच्छ इति E पुस्तकपाठः।

Digitized by Google

भावः* संसर्गपरिवर्जनमित्यर्थः। यः किल स्वमेव कायं जुगुप्सते तत्तदवद्यदर्शनात् स कथं परकीयैस्त्वथाभूतैः कायैः संसर्गमनुभवति ॥ ४० ॥

शौचस्यैव फलान्तरमाह।

किञ्च† सत्त्वशुद्धि-सौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च ॥ ४१ ॥

भवन्तीति‡ वाक्यशेषः। 'सत्त्वं' प्रकाशसुखाद्यात्मकं§। तस्य 'शुद्धिः' रजस्तमोभ्यामनभिभवः। 'सौमनस्यं' खेदाननुभवेन मानसी प्रीतिः। 'एकाग्रता' नियतेन्द्रियविषये॥ चेतसः स्थैर्यं। 'इन्द्रियजयः' विषयपराङ्मुखानामिन्द्रियाणां स्वात्मन्यवस्थानं। 'आत्मदर्शने' विवेकख्यातिरूपे, चित्तस्य 'योग्यत्वं'। शौचाभ्यासवत एते सत्त्वशुद्ध्यादयः क्रमेण प्रादुर्भवन्ति। तथा हि शौचात् सत्त्वशुद्धिः¶। सत्त्वशुद्धेः सौमनस्यं। सौमनस्यादेकाग्र्यता**। एकाग्र्यतायाः†† इन्द्रियजयः। इन्द्रियजयादात्मदर्शनयोग्यतेति ॥ ४१ ॥

सन्तोषाभ्यासस्य फलमाह।

सन्तोषादनुत्तमः सुखलाभः ॥ ४२ ॥

---

* संसर्गाभाव इति H पुस्तकपाठः।

† किञ्चेतिपाठः नवखादर्शपुस्तकेषु नास्ति, परन्तु भाष्यकारेण धृतः।

‡ सम्भवन्तीतीति H पुस्तकपाठः।

§ प्रकाशसुखाद्यात्मकत्वमिति B, E, C पुस्तकपाठः।

‖ नियतविषये इति B, C, E पुस्तकपाठः।

¶ शौचात् सत्त्वशुद्धिरितिपाठः A, B, C, D, E, H पुस्तकेषु नास्ति।

** सौमनस्यादैकाग्र्यमिति G पुस्तकपाठः।

†† ऐकाग्र्यादिति G पुस्तकपाठः।

Digitized by Google

यः किल 'ब्रह्मचर्यं', अभ्यस्यति, तस्य तत्प्रकर्षान्निरतिशयं 'वीर्यं' सामर्थ्यं आविर्भवति। वीर्यनिरोधो हि ब्रह्मचर्यं तस्य प्राकर्षाच्छरीरेन्द्रियमनःसु वीर्यं प्रकर्षमागच्छति ॥ ३८ ॥

अपरिग्रहाभ्यासस्य फलमाह।

अपरिग्रहस्थैर्ये जन्मकथन्तासम्बोधः ॥ ३९ ॥

कथमित्यस्य भावः 'कथन्ता'। जन्मनः कथन्ता 'जन्मकथन्ता'। तस्याः 'सम्बोधः' सम्यग्ज्ञानं। जन्मान्तरे कोऽहमासं कीदृशः किं कार्यकारीति जिज्ञासायां सर्वमेव सम्यग्जानातीत्यर्थः।

न केवलं भोगसाधनपरिग्रह एव परिग्रहः। किन्तु यावदात्मनः शरीरपरिग्रहोऽपि परिग्रहः भोगसाधनत्वाच्छरीरस्य। तस्मिन् सति रागानुबन्धात्* बहिर्मुखायामेव प्रवृत्तौ न तात्त्विकज्ञानप्रादुर्भावः। यदा पुनः शरीरादिपरिग्रहनैरपेक्ष्येण माध्यस्थ्यमवलम्बते तदा मध्यस्थस्य रागादित्यागात् सम्यग्ज्ञानहेतुर्भवत्येव पूर्वापरजन्मसम्बोधः ॥ ॥ ३९ ॥

उक्ता यमानां सिद्धयः। अथ नियमानाह।

शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः ॥ ४० ॥

यः 'शौचं भावयति, तस्य 'स्वाङ्गेष्वपि कारणस्वरूपपर्य्यालोचनद्वारेण 'जुगुप्सा' घृणा, समुपजायते। अशुचिरयं कायः नाचाग्रहः† कर्त्तव्य इत्यमुनैव हेतुना 'परैः' अन्यैश्च कायवद्भिः, 'असंसर्गः' सम्पर्का-

---

* रागानुसन्धादिति H पुस्तकपाठः।

† मास्य सङ्गृह इति E पुस्तकपाठः।

Digitized by Google

भावः* संसर्गपरिवर्जनमित्यर्थः। यः किल स्वमेव कायं जुगुप्सते तत्तदवद्यदर्शनात् स कथं परकीयैस्तथाभूतैः कायैः संसर्गमनुभवति ॥ ४० ॥

शौचस्यैव फलान्तरमाह।

किञ्च† सत्त्वशुद्धि-सौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च ॥ ४१ ॥

भवन्तीति‡ वाक्यशेषः। 'सत्त्वं' प्रकाशसुखाद्यात्मकं§। तस्य 'शुद्धिः' रजस्तमोभ्यामनभिभवः। 'सौमनस्यं' खेदाननुभवेन मानसी प्रीतिः। 'एकाग्रता' नियतेन्द्रियविषये॥ चेतसः स्थैर्यं। 'इन्द्रियजयः' विषयपराङ्मुखानामिन्द्रियाणां स्वात्मन्यवस्थानं। 'आत्मदर्शने' विवेकख्यातिरूपे, चित्तस्य 'योग्यत्वं'। शौचाभ्यासवत एते सत्त्वशुद्ध्यादयः क्रमेण प्रादुर्भवन्ति। तथा हि शौचात् सत्त्वशुद्धिः¶। सत्त्वशुद्धेः सौमनस्यं। सौमनस्यादेकाग्र्यता**। एकाग्र्यतायाः†† इन्द्रियजयः। इन्द्रियजयादात्मदर्शनयोग्यतेति ॥ ४१ ॥

सन्तोषाभ्यासस्य फलमाह।

सन्तोषादनुत्तमः सुखलाभः ॥ ४२ ॥

---

* संसर्गाभाव इति H पुस्तकपाठः।

† किञ्चेतिपाठः नवखादर्शपुस्तकेषु नास्ति, परन्तु भाष्यकारेण धृतः।

‡ सम्भवन्तीतीति H पुस्तकपाठः।

§ प्रकाशसुखाद्यात्मकत्वमिति B, E, C पुस्तकपाठः।

॥ नियतविषये इति B, C, E पुस्तकपाठः।

¶ शौचात् सत्त्वशुद्धिरितिपाठः A, B, C, D, E, H पुस्तकेषु नास्ति।

** सौमनस्यादैकाग्र्यमिति G पुस्तकपाठः।

†† ऐकाग्र्यादिति G पुस्तकपाठः।

Digitized by Google

'सन्तोषप्रकर्षेण* योगिनस्तथाविधमान्तरं सुखमाविर्भवति यस्य वाह्यं विषयसुखं अनन्तांशेनापि न समानं† भवति‡ ॥ ४२ ॥

तपसः फलमाह ।

कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः ॥ ४३ ॥

'तपः समभ्यस्यमानं चेतसः क्लेशादिलक्षणाशुद्धिक्षयद्वारेण§ 'कायेन्द्रियाणां', 'सिद्धिं उत्कर्षं आदधाति॥ ।

अयमर्थः । चान्द्रायणादिना चित्तक्लेशक्षयः । ततक्षयादिन्द्रियाणां सूक्ष्म-व्यवहित-विप्रकृष्टदर्शनादिसामर्थ्यमाविर्भवति, कायस्य यथेच्छमणुमहत्त्वादीनि ॥ ४३ ॥

स्वाध्यायस्य फलमाह ।

स्वाध्यायादिष्टदेवतासम्प्रयोगः ॥ ४४ ॥

अभिप्रेतमन्त्रजपादिलक्षणे 'स्वाध्याये प्रक्रियमाणे, योगिनः 'इष्टया अभिप्रेतया, 'देवतया, 'सम्प्रयोगः', भवति । सा देवता प्रत्यक्षीभवतीत्यर्थः ॥ ४४ ॥

ईश्वरप्रणिधानस्य फलमाह ।

समाधिसिद्धिरीश्वरप्रणिधानात् ॥ ४५ ॥

---

* सन्तोषप्रकर्षे इति C पुस्तकपाठः ।

† समभिति H, G पुस्तकपाठः ।

‡ भवतीत्ययं पाठः G पुस्तके नास्ति ।

§ क्लेशादिलक्षणाशुद्धिक्षयद्वारेणेति B, C, E पुस्तकपाठः ।

॥ आपादयतीति B, C, E पुस्तकपाठः ।

Digitized by Google

'ईश्वरे योऽयं भक्तिविशेषस्तस्मात् 'समाधेः' उक्तलक्षणस्य, आविर्भावो भवति। यस्मात् स भगवानीश्वरः प्रसन्नः सन्नन्तरायरूपान् क्लेशान् परिहृत्य* समाधिमुद्बोधयति ॥ ४५ ॥

यम-नियमानुक्त्वा आसनमाह।

तच† स्थिरसुखमासनम् ॥ ४६ ॥

आस्यते अनेनेति 'आसनं' पद्मासन-दण्डासन-स्वस्तिकासनादि। तद् यदा 'स्थिरं' निष्कम्पं, 'सुखं' अनुद्वेजकं‡ भवति, तदा योगाङ्गतां भजते ॥ ४६ ॥

तस्यैव स्थिरसुखत्वापत्त्यर्थमुपायमाह।

प्रयत्नशैथिल्यानन्त्यसमापत्तिभ्याम् ॥ ४७ ॥

तदासनं 'प्रयत्नशैथिल्येन', 'आनन्त्यसमापत्त्या', च स्थिरं सुखं भवतीति सम्बन्धः।

यदा यदासनं बध्नामीति इच्छां करोति तदा प्रयत्नशैथिल्येऽप्यक्लेशेनैव तदासनं निष्पद्यते। यदा आकाशादिगते आनन्त्ये चेतसः समापत्तिः क्रियते अवधानेन तादात्म्यमापद्यते, तदा देहाहङ्काराभावान्नासनं दुःखजनकं भवति। अस्मिंस्त्वासनजये सति समाध्यन्तरायभूता न प्रभवन्त्यङ्गमेजयत्वादयः ॥ ४७ ॥

तस्यैवानुनिष्पादितस्य फलमाह।

---

* अपहृत्येति G पुस्तकपाठः।

† तचेति शब्दः A, B, C, D, E, F, G पुस्तकेषु नास्ति। परन्तु भाष्यकारेण धृतः।

‡ अनुद्वेजनीयमिति G पुस्तकपाठः।

Digitized by Google

ततो द्वन्द्वानभिघातः ॥ ४८ ॥

तस्मिन्नासनजये सति 'द्वन्द्वैः' शीतोष्ण-क्षुत्तृष्णादिभिः, योगी नाभिहन्यत इत्यर्थः ॥ ४८ ॥

आसनजयानन्तरं* प्राणायाममाह।

तस्मिन् सति श्वास-प्रश्वासयोर्गतिविच्छेदः प्राणायामः ॥ ४९ ॥

आसनस्थैर्ये 'सति', तन्निमित्तकः प्राणायामलक्षणो योगाङ्गविशेषः अनुष्ठेयो भवति। कीदृशः 'श्वासप्रश्वासयोर्गतिविच्छेदलक्षणः। श्वास-प्रश्वासौ कृतलक्षणौ। तयोर्द्वेधा रेचक-पूरकद्वारेण† बाह्याभ्यन्तरेषु स्थानेषु 'गतेः' प्रवाहस्य, 'विच्छेदः' धारणं, 'प्राणायामः', उच्यते ॥ ४९ ॥

तस्यैव सुखावगमाय विभज्य स्वरूपं कथयति‡।

स तु बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसङ्ख्याभिः परिदृष्टो दीर्घसूक्ष्मः ॥ ५० ॥

'बाह्यवृत्तिः श्वासो रेचकः। आन्तरवृत्तिः प्रश्वासः पूरकः। आन्तस्तम्भवृत्तिः कुम्भकः। तस्मिन् जलमिव कुम्भे निश्चलतया प्राणाः अवस्थाप्यन्ते§ इति कुम्भकः।

---

* आसनजयादनन्तरमिति G पुस्तकपाठः।

† तयोस्त्रिधा रेचक-पूरककुम्भकद्वारेणेति A, D, F, G पुस्तकपाठः।

‡ दर्शयतीति B, C, E पुस्तकपाठः।

§ प्रायोऽवस्थाप्यत इति C पुस्तकपाठः।

Digitized by Google

त्रिविधोऽयं प्राणायामः 'देशेन, 'कालेन, 'सङ्ख्यया चोपलक्षितः 'दीर्घसूक्ष्मसंज्ञको भवति। देशेनोपलक्षितो यथा नासादादास्यान्तादौ नासामारभ्य हृदयाङ्गुलिपर्य्यन्तमित्यर्थः। कालेनोपलक्षितो यथा षट्-त्रिंशन्मात्रादिप्रमाणः*। सङ्ख्यया उपलक्षितो यथा दृयतो वारान्कृतः†। एतावद्भिः श्वासप्रश्वासैः प्रथम उद्घातः‡ भवति। एतच्छ्वासाय सङ्ख्याग्रहण-मुपात्तं। उद्घातो नाभिमूलात् प्रेरितस्य वायोः शिरस्यभिहननं॥५०॥

त्रीन् प्राणायामानभिधाय चतुर्थमभिधातुमाह।

बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः॥५१॥

प्राणस्य 'बाह्यो विषयः' नासादादास्यान्तादिः। 'आभ्यन्तरो विषयः' हृदयनाभिचक्रादिः। तौ द्वौ विषयौ आक्षिप्य' पर्य्यालोच्य यः सम्भ-रूपो गतिविच्छेदः स 'चतुर्थः', प्राणायामः। तृतीयस्मात् कुम्भ-काख्यादयमस्य विशेषः। स बाह्याभ्यन्तरविषयावपर्य्यालोच्य सहसा तन्नोपलनिपतितजलजन्यायेन युगपत् सम्भवृत्त्या निष्पद्यते। अस्य तु विषयद्वयाक्षेपको निरोधः। अयमपि पूर्ववत् देश-काल-सङ्ख्याभि-रुपलक्षितो द्रष्टव्यः॥५१॥

चतुर्विधस्यास्य फलमाह।

ततः क्षीयते प्रकाशावरणम्॥५२॥

'ततः' तस्मात् प्राणायामात्, 'प्रकाशस्य' चित्तसत्त्वगतस्य, यत् 'आवरणं' क्लेशरूपं, तत् 'क्षीयते' विनश्यतीत्यर्थः॥५२॥

फलान्तरमाह।

---

* षड्विंशतिमात्रादिप्रमाण इति B पुस्तकपाठः।

† एतान् वारान् कृत इति B पुस्तकपाठः।

‡ G पुस्तके सर्व्वत्र उद्घात इत्यत्र उद्गात इति पाठः।

Digitized by Google

धारणासु च योग्यता मनसः ॥ ५३ ॥

'धारणाः' वक्ष्यमाणलक्षणाः*। तासु प्रणायामैः क्षीणदोषं† मनो यत्र यत्र धार्य्यते, तत्र तत्र स्थिरं भवति‡ न विक्षेपं भजते ॥ ५३ ॥

प्रत्याहारस्य लक्षणमाह ।

स्वस्वविषयसम्प्रयोगाभावे§ चित्तस्य स्वरूपानुकार-इवेन्द्रियाणां प्रत्याहारः ॥ ५४ ॥

इन्द्रियाणि स्वस्वविषयेभ्यः प्रत्याकृष्यन्ते प्रतिकूलतया आकृष्यन्ते-ऽस्मिन् इति 'प्रत्याहारः'। स च कथं निष्पद्यत इत्याह। चक्षुरादीनां इन्द्रियाणां स्वः स्वो विषयः रूपादिः। तेन 'सम्प्रयोगः' तदाभिमुख्येन प्रवर्त्तनं। तदभावस्तदाभिमुख्यं परित्यज्य स्वरूपमात्रेऽवस्थानं। तस्मिन् सति चित्तस्वरूपमात्रानुकारीणीन्द्रियाणि भवन्ति, यतश्चित्तमनुवर्त्तमानानि मधुकरराजमिव मधुमक्षिकाः॥, सर्व्वाणीन्द्रियाणि प्रतीयन्ते। अतश्चित्तनिरोधे तानि प्रत्याहृतानि भवन्ति ॥ ५४ ॥

तेषां तत्स्वरूपानुकारः प्रत्याहार उक्तः। फलमाह।

ततः परमा वश्यतेन्द्रियाणाम् ॥ ५५ ॥

---

* वक्ष्यमाणा इति H पुस्तकपाठः।
† क्षीणक्लेशमिति C पुस्तकपाठः।
‡ स्थिरीभवतीति B, E पुस्तकपाठः।
§ स्वविषयासम्प्रयोगे इति B, E पुस्तकपाठः। स्वस्वविषयासम्प्रयोगे इति B पुस्तकपाठः।
॥ मधुकरराजमिव मक्षिका इति B, E पुस्तकपाठः। मधुकरराजमिव मधुकरमक्षिका इति G पुस्तकपाठः।

Digitized by Google

अभ्यस्यमाने हि प्रत्याहारे तथा 'वश्यान्यायत्तानि 'इन्द्रियाणि सम्पद्यन्ते, यथा वाह्यविषयाभिमुखतां नीयमानान्यपि न यान्तीत्यर्थः॥ ५५॥

तदेवं प्रथमपादोक्तलक्षणस्य योगस्याङ्गभूतं क्लेशतनूकरणफलं क्रियायोगमभिधाय क्लेशानामुद्देशं कारणं क्षेत्रं स्वरूपं फलञ्चोक्ता कर्म्मणामपि भेदं कारणं स्वरूपं फलञ्चाभिधाय विपाकस्य स्वरूपं कारणञ्चाभिहितं। ततस्त्याज्यत्वात् क्लेशादीनां, ज्ञानव्यतिरेकेन त्यागस्याशक्यत्वात्, ज्ञानस्य च शास्त्रायत्तत्वात्, शास्त्रस्य च हेयाहेयकारणोपादेयोपादानकारणत्वेन चतुर्व्यूहत्वात्, हेयस्य च हानव्यतिरेकेण स्वरूपानिष्पत्तेर्हानसहितं चतुर्व्यूहं स्वस्वकारणसहितमभिधायोपादानकारणभूताया विवेकख्यातेः कारणभूतानामन्तरङ्गबहिरङ्गभावेन स्थितानां योगाङ्गानां* यमादीनां स्वरूपं फलसहितं व्याकृत्य धारणापर्य्यन्तानां चासनादीनां परस्परमुपकार्य्योपकारकभावेनावस्थितानां उद्देशमभिधाय परस्परलक्षणकारणपूर्व्वकं† फलमभिहितं।

तदयं योगो यमनियमादिभिः प्राप्तबीजभावः। आसनप्राणायामैरङ्कुरितः। प्रत्याहारेण पुष्पितः‡। ध्यानधारणासमाधिभिः§ फलिष्यतीति व्याख्यातः साधनपादः।

इति महाराजाधिराजश्रीभोजदेवविरचितायां राजमार्त्तण्डाभिधायां पातञ्जलयोगशास्त्रसूत्रवृत्तौ द्वितीयः साधनपादः॥२॥

---

* योगानामिति G पुस्तकपाठः।

† प्रत्येकलक्षणकारणपूर्व्वमिति B, C, E पुस्तकपाठः। परस्परलक्षणपूर्व्वकमिति G पुस्तकपाठः।

‡ कुसुमित इति G पुस्तकपाठः।

§ चित्तधारणासमाधिभिरिति H पुस्तकपाठः।

Digitized by Google

अथ तृतीयः पादः ।

यत्पादपद्मस्मरणादणिमादिविभूतयः ।
भवन्ति भाविनामस्तु भूतनाथः स भूतये ॥

तदेवं पूर्व्वोद्दिष्टं धारणाद्यङ्गत्रयं निर्णेतुं संयमसंज्ञाभिधानपूर्व्वकं बाह्याभ्यन्तरादिसिद्धिप्रतिपादनाय लक्षयितुमुपक्रमते ।

तत्र धारणायाः स्वरूपमाह ।

देशबन्धश्चित्तस्य धारणा* ॥ १ ॥

'देशे' नाभिचक्रनासाग्रादौ । चित्तस्य 'बन्धः' विषयान्तरपरिहारेण यत् चित्तस्य स्थिरीकरणं । सा 'चित्तस्य धारणा', उच्यते ।

अयमर्थः । मैत्र्यादिचित्तपरिकर्म्मवासिताभ्यन्तःकरणेन यमनियमवता जितासनेन परिशुद्धतप्राणविक्षेपेण प्रत्याहृतेन्द्रियग्रामेण निर्व्बाधे प्रदेशे ऋजुकायेन जितद्वन्द्वेन योगिना नासाग्रादौ सम्प्रज्ञातस्य समाधेरभ्यासाय चेतसः स्थिरीकरणं कर्त्तव्यमिति ॥ १ ॥

धारणामभिधाय ध्यानमभिधातुमाह ।

तत्र प्रत्ययैकतानता ध्यानं ॥ २ ॥

'तत्र' तस्मिन् देशे† यत् चित्तं धृतं तत्र । 'प्रत्ययस्य' ज्ञानस्य ।

---

* चित्तधारणेति H पुस्तकपाठः ।
† तस्मिन्नर्थे इति B, E पुस्तकपाठः ।

Digitized by Google

या 'एकतानता' विसदृशपरिणामपरिहारद्वारेण यदेव धारणाया-मालम्बनीकृतं तदालम्बतयैव निरन्तरमुत्पत्तिः, सा 'ध्यानं', उच्यते ॥ ॥ २ ॥

चरमं योगाङ्गं समाधिमाह।

तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ॥ ॥ ३ ॥

'तदेव' उक्तलक्षणं ध्यानं। यच 'अर्थमात्रनिर्भासं' अर्थाकारसमावे-शादुद्भूतार्थरूपं, न्यग्भूतज्ञानरूपत्वेन 'स्वरूपशून्यमिव',* आपद्यते, स 'समाधिः', इत्युच्यते। सम्यगाधीयते एकाग्रीक्रियते विक्षेपान्-परिहृत्य यत्र मनः स 'समाधिः' ॥ ३ ॥

उक्तलक्षणस्य योगाङ्गत्रयस्य व्यवहाराय स्वशास्त्रे तान्त्रिकीं संज्ञां कर्तुमाह।

त्रयमेकत्र संयमः ॥ ४ ॥

एकस्मिन् विषये ध्यान-धारणा-समाधिलक्षणं त्रितयं प्रवर्त्तमानं 'संयमसंज्ञया† शास्त्रे व्यवस्थियते ॥ ४ ॥

तस्य फलमाह।

तज्जयात् प्रज्ञालोकः ॥ ५ ॥

'तस्य संयमस्य। 'जयात्' अभ्यासेन साम्योत्पादनात्‡। 'प्रज्ञायाः'

---

* स्वरूपशून्यतामिवेति H पुस्तकपाठः।

† संयमसंज्ञ इति B, E पुस्तकपाठः।

‡ स्वात्मोत्पादनादिति H पुस्तकपाठः।

Digitized by Google

ज्ञातव्यविवेकस्वरूपायाः । 'आलोकः' प्रसरो भवति* । प्रज्ञा ह्ययं सम्यगवभासयतीत्यर्थः ॥ ५ ॥

तस्योपयोगमाह ।

तस्य भूमिषु विनियोगः ॥ ६ ॥

'तस्य' संयमस्य, 'भूमिषु' स्थूलसूक्ष्मालम्बनभेदेन स्थितासु† चित्तवृत्तिषु, 'विनियोगः', कर्त्तव्यः । अधरामधरां चित्तभूमिं जितां जितां ज्ञात्वोत्तरस्यां भूमौ संयमः कार्य्यः । न ह्ययमनात्मीकृताधरभूमिः उत्तरस्यां भूमौ संयमं कुर्व्वाणः फलभाग् भवति ॥ ६ ॥

साधनपादे योगाङ्गान्यष्टावुद्दिश्य पञ्चानां लक्षणं विधाय त्रयाणां कथं न कृतमित्याशङ्क्याह ।

त्रयमन्तरङ्गं पूर्व्वेभ्यः ॥ ७ ॥

'पूर्व्वेभ्यः' यमादिभ्यो योगाङ्गेभ्यः पारम्पर्य्येण समाधेरुपकारकेभ्यः । धारणादियोगाङ्गत्रयं सम्प्रज्ञातस्य समाधेः 'अन्तरङ्गं', समाधिस्वरूपनिष्पादनात् ॥ ७ ॥

तस्यापि समाध्यन्तरापेक्षया बहिरङ्गत्वमाह ।

तदपि बहिरङ्गं निर्व्बीजस्य ॥ ८ ॥

'निर्व्बीजस्य' निरालम्बनस्य शून्यभावनापरपर्य्यायस्य समाधेः । एतदपि योगाङ्गत्रयं, 'बहिरङ्गं', पारम्पर्य्येणोपकारकत्वात् ॥ ८ ॥

---

* प्रसादो भवतीति D पुस्तकपाठः ।

† अवस्थिताखिति E पुस्तकपाठः ।

Digitized by Google

इदानीं योगाङ्गसिद्धीराख्यातुकामः* संयमस्य विषयपरिशुद्धिं कर्त्तुं क्रमेण परिणामत्रयमाह।

व्युत्थान-निरोधसंस्कारयोरभिभव-प्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः ॥ ९ ॥

'व्युत्थानं' क्षिप्त-मूढ-विक्षिप्ताख्यं भूमित्रयं। 'निरोधः' प्रख्याप्रवृत्त्यवस्थाङ्कितया चेतसः परिणामः। ताभ्यां व्युत्थान-निरोधाभ्यां यौ जनितौ 'संस्कारौ' तयोर्यथाक्रमं 'अभिभव—प्रादुर्भावौ', यदा भवतः। 'अभिभवः' न्यग्भूततया कार्य्यकरणासामर्थ्येनावस्थानं। 'प्रादुर्भावः' वर्त्तमानेऽध्वनि अभिव्यक्तरूपतयावस्थानं। तदा 'निरोधक्षणे', 'चित्तस्योभयवृत्तित्वात् 'अन्वयः', यः सः 'निरोधपरिणामः', इत्युच्यते।

अयमर्थः। यदा व्युत्थानसंस्काररूपो धर्म्मः स्थिरीभूतो भवति, निरोधसंस्काररूपश्चाविर्भवति, धर्म्मिरूपतया च चित्तमुभयचान्वयित्वेनावस्थितं प्रतीयते, तदा स निरोधपरिणामशब्देन व्यवह्रियते। यद्यपि चलत्वाद्गुणवृत्तस्य चेतसो निश्चलत्वं नास्ति, तथाप्येवम्भूतपरिणामः स्थैर्य्यमुच्यते ॥ ९ ॥

अस्यैव फलमाह।

तस्य प्रशान्तवाहिता संस्कारात् ॥ १० ॥

'तस्य' चेतसः, उक्तान्निरोधसंस्कारात्', 'प्रशान्तवाहिता', भवति। परिक्षतविक्षेपतया सदृशप्रवाहपरिणामि चित्तं भवतीत्यर्थः ॥ १० ॥

निरोधपरिणाममभिधाय समाधिपरिणाममाह।

---

* सिद्धीराख्यातुकाम इति D पुस्तकपाठः।

Digitized by Google

सर्व्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः ॥ ११ ॥

'सर्व्वार्थता' सत्त्वात्मानाविधाऽर्थग्रहणं, चित्तस्य विक्षेपो धर्म्मः। एकस्मिन्नेवावलम्बने सदृशपरिणामिता 'एकाग्रता',* सापि† चित्तस्य धर्म्मः। तयोर्यथाक्रमं 'क्षयोदयौ'। 'सर्व्वार्थतास्वरूपस्य धर्म्मस्य 'क्षयः' अत्यन्तमभिभवः। 'एकाग्रतास्वरूपस्य धर्म्मस्य प्रादुर्भावोऽभिव्यक्तिः। 'चित्तस्य' उद्रिक्तसत्त्वस्य, अन्वयितयाऽवस्थानं 'समाधिपरिणामः', इत्युच्यते।

पूर्व्वस्मात् परिणामादयं विशेषः। तत्र संस्कारस्वरूपयोर्धर्म्मयोरभिभव—प्रादुर्भावौ। पूर्व्वस्य व्युत्थानसंस्कारस्वरूपस्य धर्म्मस्य‡ न्यग्भावः। उत्तरस्य निरोधसंस्काररूपस्योद्भवोऽनभिभूतत्वेनावस्थानं। इह तु क्षयोदयाविति। सर्व्वार्थतारूपविक्षेपस्यात्यन्ततिरस्काराद्नुत्पत्तिरतीताध्वनि प्रवेशः क्षयः। एकाग्रतास्वरूपस्य धर्म्मस्योद्भवो वर्त्तमानेऽध्वनि प्रकटत्वं ॥ ११ ॥

तृतीयमेकाग्रतापरिणाममाह।

शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः ॥ १२ ॥

समाहितस्यैव 'चित्तस्य', एकप्रत्ययो वृत्तिविशेषः। 'शान्तः'

---

* एकाग्रत्वमिति H पुस्तकपाठः।

† तदपीति H पुस्तकपाठः।

‡ व्युत्थानसंस्कारस्येति H, C पुस्तकपाठः।

Digitized by Google

अतीतमध्वानं प्रविष्टः। अपरस्तु उदितः' वर्त्तमानेऽध्वनि स्फुरितः। द्वावपि समाहितचित्तत्वेन 'तुल्यौ' एकरूपालम्बनत्वेन सदृशौ, 'प्रत्ययौ'। उभयत्रापि समाहितस्यैव चित्तस्याग्रयित्वेनावस्थानं यत् सः 'एकाग्रतापरिणामः', इत्युच्यते॥ १२॥

चित्तपरिणामोक्तरूपमन्यत्रातिदिशन्नाह।

एतेन भूतेन्द्रियेषु धर्म्म-लक्षणावस्थापरिणामा व्याख्याताः* ॥ १३ ॥

'एतेन' त्रिविधोक्तेन चित्तपरिणामेन। 'भूतेषु' स्थूल-सूक्ष्मेषु। 'इन्द्रियेषु' बुद्धिकर्म्मान्तःकरणभेदेनावस्थितेषु†। 'धर्म्म-लक्षणावस्था-भेदेन त्रिविधः परिणामो व्याख्यातोऽवगन्तव्यः।

अवस्थितस्य धर्म्मिणः पूर्व्वधर्म्मनिवृत्तौ धर्म्मान्तरापत्तिर्धर्म्मपरि-णामः‡, यथा मृल्लक्षणस्य धर्म्मिणः पिण्डरूपधर्म्मपरित्यागेन घटरूप-धर्म्मान्तरस्वीकारः§, 'धर्म्मपरिणामः' इत्युच्यते। 'लक्षणपरिणामः,' यथा तस्यैव घटस्यानागताध्वपरित्यागेन वर्त्तमानाध्वस्वीकारः, तत्परित्यागेन चातीताध्वपरिग्रहः। 'अवस्थापरिणामः', यथा तस्यैव घटस्य प्रथमद्वितीययोः सदृशयोर्धर्म्मलक्षणयोरन्वयित्वेन। यतस्त्वसौ गुणवृत्तं नापरिणममानं क्षणमप्यास्ते॥ १३॥

---

* धर्म्मलक्षणावस्थापरिणामो व्याख्यात इति O पुस्तकपाठः।

† बुद्धिकर्म्मभेदेनावस्थितेष्विति E पुस्तकपाठः।

‡ परिणाम इति H पुस्तकपाठः।

§ घटरूपधर्म्मान्तरस्वीकार इति O पुस्तकपाठः।

Digitized by Google

ननु कोऽयं धर्म्मीत्याशङ्क्य धर्म्मिणो लक्षणमाह।

तच्च* शान्तोदिताव्यपदेश्यधर्म्मानुपाती धर्म्मी† ॥१४॥

'शान्ताः' ये कृतस्वस्वव्यापारा अतीतेऽध्वन्यनुप्रविष्टाः। 'उदिताः' ये अनागतमध्वानं परित्यज्य वर्त्तमानेऽध्वनि स्वस्वव्यापारं कुर्व्वन्ति। 'अव्यपदेश्याः' ये शक्तिरूपेण स्थिता व्यपदेष्टुं न शक्यन्ते। यथा सर्व्वं सर्व्वात्मकमित्येवमादयः‡। नियतकार्य्यकारणरूपतया योग्यतयाऽवच्छिन्ना शक्तिरेवेह धर्म्मशब्देनाभिधीयते। तं त्रिविधमपि धर्म्मं योऽनुपतत्यनुवर्त्तते अन्वयित्वेन स्वीकरोति, सः 'शान्तोदिताव्यपदेश्यधर्म्मानुपाती धर्म्मी', इत्युच्यते, यथा सुवर्णं रुचकरूपधर्म्मपरित्यागेन§ स्वस्तिकधर्म्मान्तरपरिग्रहे सुवर्णरूपतयाऽनुवर्त्तमानं। तेषु धर्म्मेषु कथञ्चिद्भिन्नेषु धर्म्मिरूपतया सामान्यात्मना धर्म्मरूपतया विशेषात्मनाऽवस्थितमनुपातित्वेनावभासते ॥ १४ ॥

एकस्य धर्म्मिणः कथमनेके परिणामा इत्याशङ्क्यामपनेतुमाह।

क्रमान्यत्वं परिणामान्यत्वे हेतुः ॥ १५ ॥

---

* तच्चेतिपदं अस्माभिरन्यषड्दर्शपुस्तकेषु नास्ति। परन्तु भाष्यकारेण सूत्रान्तर्गतत्वेन परिगृहीतत्वात् अस्माभिरपि तथैव व्यवस्थापितं।

† "योग्यतावच्छिन्ना धर्म्मिणः शक्तिरेव धर्म्मः" इत्ययं भाष्यपाठः काशीस्थां मुद्रितयोगभाष्यपुस्तके सूत्रान्तर्गत एव मुद्रितः। परन्त्वयं न समीचीनः वार्त्तिककारेण उक्तपाठस्य भाष्यमध्ये परिगणितत्वात्।

‡ तेषां यथा खं सर्व्वात्मकमित्येवमादय इति H पुस्तकपाठः। तेषां यथा सर्व्वं सर्व्वात्मकमित्येवमादय इति C पुस्तकपाठः।

§ मुद्रिकारूपधर्म्मपरित्यागेनेति C पुस्तकपाठः।

Digitized by Google

धर्म्माणामुक्तलक्षणानां यः 'क्रमः,' तस्य यत् प्रतिक्षणं 'अन्यत्वं', परिदृश्यमानं, 'परिणामस्य' उक्तलक्षणस्य, 'अन्यत्वे' नानाविधत्वे, 'हेतुः' सिद्धं ज्ञापकं भवति। अयमर्थः। योऽयं नियतक्रमः, मृच्चूर्णात् मृत्पिण्डस्ततः कपालानि तैश्च घट इत्येवं रूपः परिदृश्यमानः परिणामस्यान्यत्वमावेदयति। तस्मिन् एव धर्म्मिणि यो लक्षणपरिणामस्यावस्थापरिणामस्य च क्रमः सोऽप्यनेनैव न्यायेन परिणामान्यत्वे गमकोऽवगन्तव्यः। सर्व्व एव च* भावा नियतेनैव क्रमेण प्रतिक्षणं परिणममानाः परिदृश्यन्ते अतः सिद्धं क्रमान्यत्वात् परिणामान्यत्वं†। चित्तादीनां सर्व्वेषां‡ परिणममानानां केचित् धर्म्माः प्रत्येकेणैवोपलभ्यन्ते, यथा सुखादयः संस्थानादयश्च। केचिदेकान्तेनानुमानगम्याः, यथा धर्म्म-संस्कार-शक्तिप्रभृतयः§। धर्म्मिणश्चाभिन्नरूपतया‖ सर्व्वचानुगमः॥ १५॥

इदानीमुक्तस्य संयमस्य विषयप्रदर्शनद्वारेण सिद्धीः प्रतिपादयितुमाह¶।

परिणामत्रयसंयमादतीतानागतज्ञानं॥ १६॥

धर्म्म-लक्षणावस्थाभेदेन यत् 'परिणामत्रयं' उक्तं। तत्र 'संयमात्'

---

* पूर्व्व एव चेति H पुस्तकपाठः।
† अतः सिद्धं क्रमान्यत्वं क्रमान्यत्वात् परिणामान्यत्वमिति H पुस्तकपाठः।
‡ विषयादीनामिति H पुस्तकपाठः।
§ कर्म्म-संस्कार-शक्तिप्रभृतय इति B, E पुस्तकद्वयपाठः।
‖ धर्म्मिणश्च भिन्नाभिन्नरूपतयेति H पुस्तकपाठः।
¶ प्रदर्शयितुमाहेति B, C, E पुस्तकेषु पाठः।

Digitized by Google

ननु कोऽयं धर्म्मीत्याशङ्क्य धर्म्मिणो लक्षणमाह।

तच्च* शान्तोदिताव्यपदेश्यधर्म्मानुपाती धर्म्मी† ॥१४॥

'शान्ताः' ये कृतस्वव्यापारा अतीतेऽध्वन्यनुप्रविष्टाः। 'उदिताः' ये अनागतमध्वानं परित्यज्य वर्त्तमानेऽध्वनि स्वव्यापारं कुर्व्वन्ति। 'अव्यपदेश्याः' ये शक्तिरूपेण स्थिता व्यपदेष्टुं न शक्यन्ते। यथा सर्व्वं सर्व्वात्मकमित्येवमादयः‡। नियतकार्य्यकारणरूपतया योग्यतयाऽवच्छिन्ना शक्तिरेवेह धर्म्मशब्देनाभिधीयते। तं त्रिविधमपि धर्म्मं योऽनुपतत्यनुवर्त्तते अन्वयित्वेन स्वीकरोति, सः 'शान्तोदिताव्यपदेश्यधर्म्मानुपाती धर्म्मी', इत्युच्यते, यथा सुवर्णं रुचकरूपधर्म्मपरित्यागेन§ स्वस्तिकधर्म्मान्तरपरिग्रहे सुवर्णरूपतयाऽनुवर्त्तमानं। तेषु धर्म्मेषु कथञ्चिद्भिन्नेषु धर्म्मिरूपतया सामान्यात्मना धर्म्मरूपतया विशेषात्मनाऽवस्थितमनुपातित्वेनावभासते ॥ १४ ॥

एकस्य धर्म्मिणः कथमनेके परिणामा इत्याशङ्क्यामपनेतुमाह।

क्रमान्यत्वं परिणामान्यत्वे हेतुः ॥ १५ ॥

---

* तच्चेतिपदं अस्माभिरन्यषड्दर्शपुस्तकेषु नास्ति। परन्तु भाष्यकारेण सूत्रान्तर्गतत्वेन परिगृहीतत्वात् अस्माभिरपि तथैव व्यवस्थापितं।

† "योग्यतावच्छिन्ना धर्म्मिणः शक्तिरेव धर्म्मः" इत्ययं भाष्यपाठः काशीस्थां मुद्रितयोगभाष्यपुस्तके सूत्रान्तर्गत एव मुद्रितः। परन्त्वयं न समीचीनः वार्त्तिककारेण उक्तपाठस्य भाष्यमध्ये परिगणितत्वात्।

‡ तेषां यथा स्वं सर्व्वात्मकमित्येवमादय इति H पुस्तकपाठः। तेषां यथा सर्व्वं सर्व्वात्मकमित्येवमादय इति C पुस्तकपाठः।

§ मुद्रिकारूपधर्म्मपरित्यागेनेति C पुस्तकपाठः।

Digitized by Google

धर्म्माणामुक्तलक्षणानां यः 'क्रमः,' तस्य यत् प्रतिक्षणं 'अन्यत्वं', परिदृश्यमानं, 'परिणामस्य' उक्तलक्षणस्य, 'अन्यत्वे' नानाविधत्वे, 'हेतुः' सिद्धं ज्ञापकं भवति। अयमर्थः। योऽयं नियतक्रमः, मृच्चूर्णात् मृत्पिण्डस्ततः कपालानि तैश्च घट इत्येवं रूपः परिदृश्यमानः परिणामस्यान्यत्वमावेदयति। तस्मिन् एव धर्म्मिणि यो लक्षणपरिणामस्यावस्थापरिणामस्य च क्रमः सोऽप्यनेनैव न्यायेन परिणामान्यत्वे गमकोऽवगन्तव्यः। सर्व्व एव च* भावा नियतेनैव क्रमेण प्रतिक्षणं परिणममानाः परिदृश्यन्ते अतः सिद्धं क्रमान्यत्वात् परिणामान्यत्वं†। चित्तादीनां सर्व्वेषां‡ परिणममानानां केचित् धर्म्माः प्रत्येकेणैवोपलभ्यन्ते, यथा सुखादयः संस्थानादयश्च। केचिदेकान्तेनानुमानगम्याः, यथा धर्म्म-संस्कार-शक्तिप्रभृतयः§। धर्म्मिणश्चाभिन्नरूपतया‖ सर्व्वचानुगमः॥ १५॥

इदानीमुक्तस्य संयमस्य विषयप्रदर्शनद्वारेण सिद्धीः प्रतिपादयितुमाह¶।

परिणामत्रयसंयमादतीतानागतज्ञानं॥ १६॥

धर्म्म-लक्षणावस्थाभेदेन यत् 'परिणामत्रयं उक्तं। तत्र 'संयमात्'

---

* पूर्व्व एव चेति H पुस्तकपाठः।

† अतः सिद्धं क्रमान्यत्वं क्रमान्यत्वात् परिणामान्यत्वमिति H पुस्तकपाठः।

‡ विषयादीनामिति H पुस्तकपाठः।

§ कर्म्म-संस्कार-शक्तिप्रभृतय इति B, E पुस्तकद्वयपाठः।

‖ धर्म्मिणश्च भिन्नाभिन्नरूपतयेति H पुस्तकपाठः।

¶ प्रदर्शयितुमाहेति B, C, E पुस्तकेषु पाठः।

Digitized by Google

तस्मिन् विषये पूर्वोक्तस्य संयमस्य करणात्, 'अतीतानागतज्ञानं', योगिनः सम्यगाविर्भवति। इदमत्र तात्पर्यं। अस्मिन् धर्मिणि अयं धर्मः, इदं लक्षणं, इयमवस्था वर्त्तमानादध्वनः समेत्य वर्त्तमाने ऽध्वनि स्वं व्यापारं विधायातीतमध्वानं प्रविशतीत्येवं परिदृतविवेचनतया यदा संयमं करोति, तदा यत् किञ्चिदतिक्रान्तमनुत्पन्नं वा तत्सर्वं योगी जानाति। यतस्तिस्तस्य शुद्धसत्त्वप्रकाशरूपत्वात् सर्वार्थग्रहणसामर्थ्यमविद्यादिभिर्विक्षेपैरजस्कं परिदृश्यते। यदा तु तैस्तैरुपायैर्विक्षेपाः परिदृश्यन्ते, तदा निर्मलस्वभावादर्शस्य सर्वार्थग्रहणसामर्थ्यमेकाग्रतावलादाविर्भवति ॥ १६ ॥

विभूत्यन्तरमाह।

शब्दार्थ-प्रत्ययानामितरेतराध्यासात् सङ्करस्तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानं ॥ १७ ॥

'शब्दः' श्रोत्रेन्द्रियग्राह्यो नियतक्रमवर्णात्मा नियतैकार्थप्रतिपत्तिहेतुर्वाच्यः। यदि वा क्रमरहितः स्फोटात्मा ध्वनिः शास्त्रसंस्कृतबुद्धिग्राह्यः, उभयथापि पदरूपो वाक्यरूपश्च। तयोरेकार्थप्रतिपत्तौ सामर्थ्यात्। 'अर्थः' जाति-गुण-क्रियादिः। 'प्रत्ययः' ज्ञानं विषयाकारा बुद्धिवृत्तिः। एषां शब्दार्थज्ञानानां व्यवहारे 'इतरेतराध्यासात्' भिन्नानामपि बुद्धेरेकरूपतासम्पादनात् सङ्कीर्णत्वं। तथाहि गामानयेत्युक्तः कश्चिद्-गोत्वगुणसम्बन्धं गोत्वजात्यवच्छिन्नं सास्नादिमत्पिण्डरूपं, शब्दं तद्वाचकं, ज्ञानञ्च तद्ग्राहकमभेदेनैवाध्यवस्यति। न त्वस्य गोशब्दो वाचकः, अयं गोशब्दस्य वाच्यः, तयोरिदं ग्राहकं ज्ञानमिति भेदेन व्यवहरति।

Digitized by Google

यथा हि कोऽयमर्थः, कोयं शब्दः, किमिदं ज्ञानमिति पृष्टः सर्व्वमेकरूपमेवोत्तरं* ददाति† गौरिति। स यद्येकरूपतां न प्रतिपद्यते कथमेकरूपमुत्तरं प्रयच्छति। एतस्मिन्नवस्थिते‡ योऽयं 'प्रविभागः', इदं शब्दस्य तत्त्वं यदाचकत्वं नाम। इदमर्थस्य यदाच्यत्वं। इदं ज्ञानस्य यत् प्रकाशत्वं। इति प्रविभागं विधाय तस्मिन् प्रविभागे यः 'संयमङ्करोति, तस्य 'सर्व्वेषां भूतानां मृग-पशु-पक्षि-सरीसृपादीनां यत् 'रुतं' यः शब्दः। तच 'ज्ञानं', उत्पद्यते। अनेनाभिप्रायेनैतेन प्राणिनाऽयं शब्दः समुच्चारित इति सर्व्वं जानाति॥ १७॥

सिद्धान्तरमाह।

संस्कारसाक्षात्करणात् पूर्व्वजातिज्ञानं॥ १८॥

द्विविधास्सित्तस्थे§ वासनारूपाः 'संस्काराः। केचित् स्मृतिमात्रोत्पादनफलाः। केचिज्जात्यायुर्भोगलक्षणविपाकहेतवः यथा धर्म्माधर्म्माख्याः। तेषु संस्कारेषु यदा संयमं करोति, एवं मया सोऽर्थोऽनुभूतः, एवं मया सा क्रिया निष्पादितेति पूर्व्ववृत्तं सर्व्वमनुसन्दधानो भावनयैव प्रबोधकमन्तरेण उद्बुद्धसंस्कारः सर्व्वमतीतं स्मरति। क्रमेण साक्षात्कृतेषूद्बुद्धेषु संस्कारेषु॥ 'पूर्व्वजन्मानुभूतानपि जात्यादीन् प्रत्यक्षेण पश्यति॥ १८॥

---

* सर्व्वमेकमेवोत्तरमिति E पुस्तकपाठः।
† वदतीति H पुस्तकपाठः।
‡ एतस्मिन् स्थिते इति H पुस्तकपाठः।
§ द्विविधास्तस्थेति E पुस्तकपाठः।
॥ साक्षात्कृतेषु संस्कारेष्विति B, C, E पुस्तकेषु पाठः।

Digitized by Google

सिद्धान्तरमाह ।

प्रत्ययस्य* परचित्तज्ञानं† ॥ १९ ॥

'प्रत्ययस्य' परचित्तस्य‡ केनचिन्मुखरागादिना लिङ्गेन गृहीतस्य । यदा संयमं करोति तदा 'परकीयस्य चित्तस्य 'ज्ञानं', उत्पद्यते । सरागमस्य चित्तं वीतरागं वेति परचित्तगतानपि सर्व्वानेव धर्म्मान् जानातीत्यर्थः ॥ १९ ॥

अस्यैव परचित्तज्ञानस्य विशेषमाह ।

न तत् सालम्बनं तस्याविषयीभूतत्वात्§ ॥ २० ॥

'तस्य' परस्य, यच्चित्तं 'तत्', 'सालम्बनं' स्वकीयालम्बनेन सहितं, 'न', ग्रह्यते ज्ञातुं । आलम्बनस्य केनचिल्लिङ्गेनाविषयीकृतत्वात् । लिङ्गाच्चित्तमात्रं परस्यावगतं, न तु नीलविषयमस्य चित्तं, पीतविषयमिति वा । यच्च न गृहीतं तच्च संयमस्य कर्तुमशक्यत्वात् । न भवति परचित्तस्य यो विषयस्तत्र ज्ञानं । तस्मात् परकीयचित्तं नालम्बनसहितं गृह्यते । तस्यालम्बनस्याग्रहीतत्वात् । चित्तधर्म्माः पुनर्गृह्यन्ते एव । यदा तु किमनेनालम्बितमिति प्रणिधानं करोति तदा तत्संयमात् तद्विषयमपि ज्ञानं उत्पद्यते एव ॥ २० ॥

सिद्धान्तरमाह ।

कायरूपसंयमात्तद्ग्राह्यशक्तिस्तम्भे चक्षुःप्रकाशासंयोगेऽन्तर्द्धानं ॥ २१ ॥

---

* प्रथमस्येति C पुस्तकपाठः ।

† एतत्सूत्रं काश्यामुद्रितयोगभाष्यपुस्तके नास्ति ।

‡ प्रथमं यस्य परचित्तस्येति C पुस्तकपाठः ।

§ प्रत्ययस्येत्यादिसूत्रं, न तत्सालम्बनमित्यादिसूत्रञ्च काश्यामुद्रितयोगभाष्यपुस्तके नास्ति ।

Digitized by Google

'कायः' शरीरं। तस्य 'रूपं' चक्षुर्ग्राह्यो गुणः। तस्मिन् काये इदं रूपमिति* 'संयमात्', तस्य रूपस्य चक्षुर्ग्राह्यत्वरूपा या 'शक्तिः', तस्याः 'स्तम्भे' भावनावशात् प्रतिबन्धे। 'चक्षुःप्रकाशसंयोगे', 'चक्षुषः,' 'प्रकाशः' सत्त्वधर्मः, तस्य 'असंयोगे' तद्ग्रहणस्य व्यापाराभावे। योगिनः 'अन्तर्द्धानं', भवति। न केनचिदसौ दृश्यत इत्यर्थः। एतेन शब्दाद्यन्तर्द्धानमुक्तं वेदितव्यं†। एतेन रूपाद्यन्तर्द्धानोपायप्रदर्शनेनैव शब्दादीनां श्रोत्रादिग्राह्याणामन्तर्द्धानं उक्तं भवति॥

॥ २१ ॥

सिद्धान्तरमाह।

सोपक्रमं निरुपक्रमञ्च कर्म्म तत्संयमादपरान्तज्ञानमरिष्टेभ्यो वा ॥ २२ ॥

आयुर्व्विपाकं यत् पूर्व्वकृतं 'कर्म्म', तद्विप्रकारं, 'सोपक्रमं' 'निरुपक्रमञ्च'। तत्र 'सोपक्रमं' यत् फलजननाय सहोपक्रमेण कार्य्यकारणाभिमुख्येन वर्त्तते। यथा उष्णप्रदेशे प्रसारितार्द्रवासः शीघ्रमेव शुष्यति। उक्तविपरीतं 'निरुपक्रमं'। यथा तदेवार्द्रवासः संवर्त्तित-

---

* तस्मिन्नाख्यस्मिन् काये रूपमितीति F चिह्नितपुस्तकपाठः। तस्मिन्नाख्यस्मिन् काये रूपमितीति H पुस्तकपाठः।

† H चिह्नितपुस्तके 'एतेन शब्दाद्यन्तर्धानमुक्तं' इत्ययं पाठः सूत्राकारेण व्यवस्थापितः। परन्त्वयं न समीचीनः, उक्तपाठस्य काश्याम्मुद्रितयोगभाष्यपुस्तके भाष्यान्तर्गतत्वात्। तत्र वाचस्पतिमिश्रेण 'एतेनेति' इति भाष्यपाठं विधृत्य कायशब्दस्पर्शरसगन्धसंयमात् तद्ग्राह्यशक्तिस्तम्भे श्रोत्रत्वग्रसनघ्राणप्रकाशासंयोगे तदन्तर्धानमिति सूत्रमूहनीयं इति भाष्याभिप्रायस्य व्यञ्जितत्वात्। असम्लब्धपदत्वञ्च पुस्तकेषु दृश्यन्तर्गतत्वाच्च।

मनुष्यदेहे चिरेण क्षेपमेति । अस्मिन् द्विविधे कर्मणि यः 'संयमं करोति, किं मम कर्म क्षीघ्रविपाकं किं चिरविपाकमित्येवं ध्यानदार्ढ्यात् 'अपरान्तज्ञानं', अक्षोत्पद्यते । 'अपरान्तः' शरीरवियोगः । तस्मिन् 'ज्ञानं'। अमुस्मिन् काले अमुस्मिन् देशे मम शरीरवियोगो भविष्यतीति निःसंशयं जानाति। 'अरिष्टेभ्यो वा'। अरिष्टानि त्रिविधानि आध्यात्मिकाधिदैविकाधिभौतिकभेदेन । तत्राध्यात्मिकानि पिहितकर्णः कौष्ठस्य वायोर्घोषं न शृणोति इत्येवमादीनि । आधिभौतिकानि अकस्मात् विज्ञातपुरुषदर्शनादीनि । आधिदैविकानि अकाल एव* द्रष्टुमशक्यस्वर्गादिपदार्थदर्शनादीनि । तेभ्यः शरीरवियोगकालं जानाति । यद्यप्ययोगिनामप्यरिष्टेभ्यः प्रायेण ज्ञानमुत्पद्यते, तथापि तेषां सामान्याकारेण तत् संशयरूपं । योगिनां पुनर्नियतकालदेशतया प्रत्यक्षवदव्यभिचारि ॥ २२ ॥

परिकर्मनिष्पादिताः सिद्धीः† प्रतिपादयितुमाह ।

मैत्र्यादिषु बलानि ॥ २३ ॥

'मैत्री-करुणा-मुदितोपेक्षासु यो विहितः संयमः तस्य 'बलानि', तासां मैत्र्यादीनां सम्बन्धीनि प्रादुर्भवन्ति । मैत्री-करुणा-मुदितास्वाऽस्य प्रकर्षं गच्छन्ति, यत्रास्य सर्वस्य मित्रत्वादिकं सम्पत्तिपद्यते ॥ २३ ॥

सिद्ध्यन्तरमाह ।

---

* अकाल एवेति H पुस्तकपाठः ।

† परिकर्मनिष्पन्नभूताः सिद्धीरिति E, C पुस्तकद्वयपाठः ।

Digitized by Google

बलेषु हस्तिबलादीनि ॥ २४ ॥

हस्त्यादिसम्बन्धिषु 'बलेषु', कृतसंयमस्य हस्त्यादिवद्बलानि आविर्भवन्ति। तदयमर्थः। यस्मिन् हस्तिबले वायुवेगे सिंहवीर्ये वा तन्मयभावेन* संयमं करोति, तत्तत्सर्व्वसामर्थ्ययुक्तं सत्त्वमस्य प्रादुर्भवतीत्यर्थः ॥ २४ ॥

सिद्ध्यन्तरमाह।

प्रवृत्त्यालोकन्यासात् सूक्ष्म-व्यवहित-विप्रकृष्टज्ञानं† ॥ २५ ॥

'प्रवृत्तिर्व्विषयवती ज्योतिष्मती च प्रागुक्ता। तस्या योऽसौ 'आलोकः' सात्त्विकप्रकाशप्रसरः,‡ तस्य निखिलेषु विषयेषु 'न्यासात्' तदासितानां विषयाणां भावनातः,§ स्वान्तःकरणेऽिन्द्रियेषु च प्रवृष्ट-शक्तिमापन्नेषु॥ 'सूक्ष्मस्य' परमाण्वादेः, 'व्यवहितस्य' भूम्यन्तर्गतस्य निध्यादेः,¶ 'विप्रकृष्टस्य' मेर्व्वपरपार्श्ववर्त्तिनो रसायनादेः, 'ज्ञानं', उत्पद्यते ॥ २५ ॥

एतत्समानवृत्तान्तं सिद्ध्यन्तरमाह।

भुवनज्ञानं सूर्य्ये संयमात् ॥ २६ ॥

---

* तन्मयोभावेनेति H पुस्तकपाठः।
† सूक्ष्म-व्यवहित-विप्रकृष्टार्थज्ञानमिति E पुस्तकपाठः।
‡ सात्त्विकप्रकाश इति E पुस्तकपाठः।
§ भावनादिति H पुस्तकपाठः।
॥ प्रवृष्टशक्तितामापन्नेष्विति H पुस्तकपाठः।
¶ निध्यादेरिति H पुस्तकपाठः।

Digitized by Google

'सूर्ये' प्रकाशमये, यः संयमं करोति, तस्य सप्तसु भूर्भुवःस्वः-प्रभृतिषु लोकेषु यानि 'भुवनानि तत्सन्निवेशभाञ्जि पुराणि, तेषु यथावद्रस्य 'ज्ञानं', उत्पद्यते। पूर्वस्मिन् सूत्रे सात्त्विकप्रकाश आलम्बनत्वोक्त इह तु भौतिक इति विशेषः ॥ २६ ॥

भौतिकप्रकाशान्तरालम्बनद्वारेणैव सिद्धान्तरमाह।

चन्द्रे ताराव्यूहज्ञानं ॥ २७ ॥

'ताराणां' ज्योतिषां, यः 'व्यूहः' विशिष्टसन्निवेशः, तस्मिन् 'चन्द्रे', कृतसंयमस्य 'ज्ञानं', उत्पद्यते। सूर्यप्रकाशेन हृततेजस्कत्वात् ताराणां, सूर्यसंयमात्तज्ज्ञानं न शक्नोति भवितुमिति पृथगुपायो-ऽभिहितः ॥ २७ ॥

सिद्धान्तरमाह।

ध्रुवे तद्गतिज्ञानं ॥ २८ ॥

'ध्रुवे' निश्चले ज्योतिषां प्रधाने, कृतसंयमस्य तासां ताराणां या 'गतिः', प्रत्येकं नियतकाला नियतदेशा च तस्याः 'ज्ञानं', उत्पद्यते। इयं तारा अयं ग्रहः इयता कालेन इमं राशिमिदं नक्षत्रं यास्यति इति सर्वं जानातीत्यर्थः। इदं कालज्ञानफलमित्युक्तं भवति ॥ २८ ॥

वाच्याः सिद्धीः प्रतिपाद्यान्तराः सिद्धीः प्रतिपादयितुमुपक्रमते।

नाभिचक्रे कायव्यूहज्ञानं ॥ २९ ॥

शरीरमध्यवर्त्ति 'नाभिसंज्ञकं यत् षोड़शारं 'चक्रं', तस्मिन् कृत-

Digitized by Google

संयमस्य योगिनः, 'कायगतो योऽसौ 'व्यूहः' विशिष्टं रस-मस-धातु-नाड्यादीनामवस्थानं, तच्च 'ज्ञानं', उत्पद्यते। हृदमुक्तं भवति। नाभिचक्रं शरीरस्य मध्यवर्त्ति सर्व्वतः प्रसृतानां नाड्यादीनां मूलभूतं। अतस्तच्च क्षतावधानस्य समग्रः सन्निवेशो यथावदाभाति* ॥ २९ ॥

सिद्धान्तरमाह।

कण्ठकूपे क्षुत्पिपासानिवृत्तिः ॥ ३० ॥

कण्ठे गले कूपः 'कण्ठकूपः' जिह्वा-तन्त्वोरधस्तात्† कूपइव कूपो गर्त्ताकारप्रदेशः। प्राणादेर्यत्सम्पर्कात् क्षुत्पिपासादयः प्रादुर्भवन्ति। तस्मिन् क्षतसंयमस्य योगिनः 'क्षुत्पिपासादयो निवर्त्तन्ते। घण्टिकाधस्तात् श्रोतसाप्यायमाने‡ तस्मिन् भाविते भवत्येवंविधा सिद्धिः॥ ३० ॥

सिद्धान्तरमाह।

कूर्म्मनाड्यां स्थैर्य्यं ॥ ३१ ॥

कण्ठकूपस्याधस्तात् या 'कूर्म्माख्या नाड़ी, तस्यां क्षतसंयमस्य, चेतसः 'स्थैर्य्यं', उत्पद्यते। तत्स्थानमनुप्रविष्टस्य चपलता§ न भवतीत्यर्थः। यदि वा कायस्य स्थैर्य्यमुत्पद्यते, न केनचित् स्पन्दयितुं शक्यत इत्यर्थः ॥ ३१ ॥

सिद्धान्तरमाह।

---

* यथावदाविर्भवतीति B, C, E पुस्तकपाठः
† जिह्वाचक्षुरधस्तादिति F पुस्तकपाठः।
‡ श्रोतसा धार्य्यमाण इति F पुस्तकपाठः।
§ चलतेति C पुस्तकपाठः। चञ्चलतेति H पुस्तकपाठः।

Digitized by Google

मूर्द्धज्योतिषि सिद्धदर्शनं ॥ ३२ ॥

शिरःकपाले ब्रह्मरन्ध्राख्यं छिद्रं प्रकाशाधारत्वात् 'ज्योतिः'। यथा गृहाभ्यन्तरस्थस्य मणेः प्रसरन्ती प्रभा कुड्यिकाविवरप्रदेशे सङ्गृहीते*, तथा हृदयस्थः सात्त्विकः प्रकाशः प्रसृतस्तच्च सम्पिण्डितत्वं भजते। तच्च कृतसंयमस्य, ये द्यावा-पृथिव्योरन्तराले वर्त्तिनः 'सिद्धाः' दिव्याः पुरुषाः, तेषामितरप्राणिदृश्यानां तस्य दर्शनं भवति। तान् पश्यति, तैश्च सम्भाष्यत इत्यर्थः ॥ ३२ ॥

सर्वज्ञत्वे उपायमाह।

प्रातिभाद्वा सर्वं ॥ ३३ ॥

निमित्तानपेक्षं† मनोमात्रजन्यमविसंवादकं द्रागुत्पद्यमानं‡ ज्ञानं प्रतिभा। तस्यां संयमे क्रियमाणे 'प्रातिभं' विवेकख्यातेः पूर्व्वभावि तारकं ज्ञानं, उदेति§। यथोदेष्यतः सवितुः॥ पूर्व्वं प्रभा प्रादुर्भवति। तद्वद्विवेकख्यातेः पूर्व्वं तारकं 'सर्व्वविषयं ज्ञानमाविर्भवति। तस्मिन् सति संयमान्तरानपेक्षः सर्व्वं जानातीत्यर्थः ॥ ३३ ॥

सिद्धान्तरमाह।

हृदये चित्तसंवित् ॥ ३४ ॥

'हृदयं' शरीरस्य प्रदेशविशेषः। तस्मिन्नधोमुखस्वल्पपुण्डरीकाभ्यन्तरे

---

* कुड्यिताकारेव सर्व्वप्रदेशे सङ्घटत इति पा०।
† सर्व्वनिमित्तानपेक्षमिति H पुस्तकपाठः।
‡ झटित्युत्पद्यमानमिति D पुस्तकपाठः।
§ उत्पद्यत इति E पुस्तकपाठः।
‖ यथोदेष्यति सवितरीति D पुस्तकपाठः।

Digitized by Google

अन्तःकरणसत्त्वस्य* ज्ञानं। तच्च कृतसंयमस्य स्व-परचित्तज्ञानमुत्पद्यते। स्वचित्तगताः सर्व्वा वासनाः परचित्तगतांश्च रागादीन् जानातीत्यर्थः ॥ ३४ ॥

सिद्धान्तरमाह।

सत्त्वपुरुषयोरत्यन्तासङ्कीर्णयोः प्रत्ययाविशेषो भोगः† परार्थान्यस्वार्थसंयमात् पुरुषज्ञानं ॥ ३५ ॥

'सत्त्वं' प्रकाशसुखात्मकः प्राधानिकः परिणामविशेषः। 'पुरुषः' भोक्ता अधिष्ठातृरूपः‡। तयोर्भोग्य-भोक्तृरूपत्वात् चेतनाचेतनत्वाच्च अत्यन्तासङ्कीर्णत्वं भिन्नत्वमित्यर्थः। तयोर्यः 'प्रत्ययस्याविशेषः' भेदेनाप्रतिभासनं,§ स भोगः। तस्मात् सत्त्वस्यैव कर्तृताप्रत्ययेन या सुखदुःखसंवित् स 'भोगः' सत्त्वस्य स्वार्थनैरपेक्ष्येण 'परार्थः' पुरुषार्थः‖। तस्मादन्यो यः 'स्वार्थः' पुरुषस्वरूपमात्रालम्बनः, परित्यक्ताहङ्कारे सत्त्वे या चिच्छायासंक्रान्तिः, तच्च कृतसंयमस्य 'पुरुषविषयं 'ज्ञानं', उत्पद्यते। तदेवं रूपं स्वालम्बनं ज्ञानं सत्त्वनिष्ठं पुरुषो जानाति। न पुनः पुरुषो ज्ञाता ज्ञानस्य विषयभावमापद्यते, ज्ञेयत्वापत्तेः। ज्ञातृत्वज्ञेयत्वयोरत्यन्तविरोधात् ॥ ३५ ॥

अस्यैव संयमस्य फलमाह।

---

* अन्तःकरणस्येति H पुस्तकपाठः।

† प्रत्ययाविशेषाद् भोग इति H, B, C चिह्नितपुस्तकपाठः। पश्चिमतनामकपत्रे मुद्रितयोगसूत्रे पुरुषसत्त्वयोः इति पाठो दृश्यते।

‡ भोक्राधिष्ठातृरूप इति H पुस्तकपाठः।

§ अभेदेन प्रतिभासनमिति D पुस्तकपाठः।

‖ पुरुषार्थनिमित्त इति H पुस्तकपाठः।

Digitized by Google

ततः प्रातिभ-श्रावण-वेदनादर्शास्वादवार्त्ता जायन्ते ॥ ३६ ॥

'ततः' पुरुषसंयमादभ्यस्यमानात्, व्युत्थितस्यापि ज्ञानानि जायन्ते। तत्र 'प्रातिभं' पूर्व्वोक्तं ज्ञानं, तस्याविर्भवनात्* सूक्ष्मादिकमर्थं पश्यति। 'श्रावणं' श्रोत्रेन्द्रियजं ज्ञानं, तस्माच्च प्रकृष्टं दिव्यं दिवि भवं शब्दं जानाति। 'वेदना' स्पर्शेन्द्रियजं ज्ञानं, विद्यतेऽनयेति कृत्वा तान्त्रिकया संज्ञया व्यवह्रियते। तस्मात् दिव्यस्पर्शविषयं ज्ञानं उपजायते। 'आदर्शः' चक्षुरिन्द्रियजं ज्ञानं, आसमन्तात् दृश्यतेऽनुभूयते रूपमनेनेति कृत्वा, तस्य प्रकर्षाद्दिव्यरूपज्ञानमुत्पद्यते। 'आस्वादः' रसनेन्द्रियजं ज्ञानं, आस्वाद्यतेऽनेनेति कृत्वा, तस्मिन् प्रकृष्टे दिव्यरससंविदुपजायते। 'वार्त्ता' गन्धसंवित्,† वृत्तिशब्देन तान्त्रिकया परिभाषया घ्राणेन्द्रियमुच्यते, वर्त्तते गन्धविषय इति कृत्वा वृत्तेर्घ्राणेन्द्रियाज्जाता वार्त्ता गन्धसंवित्, तस्यां प्रकृष्यमाणायां दिव्यगन्धोऽनुभूयते ॥ ३६ ॥

एतेषां फलविशेषाणां विषयविभागमाह‡।

ते समाधावुपसर्गा व्युत्थाने सिद्धयः ॥ ३७ ॥

'ते' प्राक्प्रतिपादिताः फलविशेषाः, 'समाधेः प्रकर्षं गच्छतः§

---

* तस्याविर्भवादिति H पुस्तकपाठः।
† गन्धसंवित्तिरिति H पुस्तकपाठः।
‡ विशेषविभागमाहेति D पुस्तकपाठः।
§ समाधौ प्रकर्षं गच्छतीति D पुस्तकपाठः।

Digitized by Google

'उपसर्गाः' उपद्रवा विघ्नाः* । तच्च हर्ष-विस्मयादिकारणेन समाधिः शिथिलीभवति । 'व्युत्थाने' पुनर्व्यवहारदशायां, विशिष्टफलदायकत्वात् 'सिद्धयः', भवन्ति ॥ ३७ ॥

सिद्धान्तरमाह ।

बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः† ॥ ३८ ॥

व्यापकत्वादात्मचित्तयोर्नियतकर्मवशादेव शरीरान्तर्गतयोरेव भोक्तृ-भोग्यभावेन यत् संवेदनमुपजायते, स एव शरीरबन्ध इत्युच्यते । तत् यदा समाधिवशात् 'बन्धकारणं धर्माधर्माख्यं कर्म शिथिलीभवति, तानवमापद्यते । चित्तस्य च योऽसौ 'प्रचारः' हृदयप्रदेशादिन्द्रियद्वारेण विषयाभिमुख्येन प्रसरः, तस्य 'संवेदनं' ज्ञानं हृदयं चित्तवहा नाड़ी, अनया चित्तं वहति, हृदयञ्च प्राणादिवहाभ्यो नाड़ीभ्यो विलक्षणा इति स्वपरशरीरयोर्यदा सञ्चारं जानाति, तदा परकीयं शरीरं मृतं जीवच्छरीरं वा चित्तं सञ्चारद्वारेण प्रविशति । चित्तञ्च परशरीरे प्रविशत् इन्द्रियाण्यनुवर्त्तते, मधुकरराजमिव मधुमक्षिकाः‡ । अतः परशरीरप्रविष्टो योगी स्वशरीरेणेव तेन§ व्यवहरति, यतो व्यापकयोश्चित्तपुरुषयोर्भोगसङ्कोचकारणं कर्म, तच्चेत् समाधिना क्षीणं तदा खानक्षयात् सर्व्वत्रैव भोगनिष्पत्तिः ॥ ३८ ॥

---

* विघ्नकारिण इति H पुस्तकपाठः ।

† परशरीरप्रवेश इति D पुस्तकपाठः ।

‡ मक्षिका इति D पुस्तकपाठः ।

§ स्वशरीरवत्तेनेति "पण्डित"नामकपत्रपाठः ।

Digitized by Google

सिद्धान्तरमाह ।

उदानजयाज्जल-पङ्क-कण्टकादिष्वसङ्ग उत्क्रान्तिश्च ॥ ३९ ॥

समस्तानामिन्द्रियाणां तुषज्वालावद् या युगपदुत्थिता वृत्तिः सा जीवनशब्दवाच्या । तस्याः क्रियाभेदात् प्राणापानादिसंज्ञाभिर्व्यपदेशः । तत्र हृदयान्मुखनासिकाद्वारेण वायोः प्रणयनात् प्राण इत्युच्यते । नाभिप्रदेशात् पादाङ्गुष्ठपर्य्यन्तमपनयनादपानः । नाभिप्रदेशं परिवेष्य समन्तान्नयनात् समानः । कृकाटिकादेशादाशिरोवृत्तेरुन्नयनादुदानः । व्याप्य नयनात् सर्व्वशरीरव्यापी व्यानः । 'उदानस्य', संयमद्वारेण 'जयात्', इतरेषां वायूनां निरोधादूर्द्ध्वगामित्वेन 'जले' महानद्यादौ, महति वा कर्द्दमे, तीक्ष्णेषु कण्टकेषु वा न मज्जति इति । लघुवात्तूलपिण्डवज्जलादौ निमज्जनपि* उद्गच्छतीत्यर्थः† ॥ ३९ ॥

सिद्धान्तरमाह ।

समानजयात् प्रज्वलनं‡ ॥ ४० ॥

अग्निमावेष्य व्यवस्थितस्य 'समानाख्यस्य वायोः 'जयात्' संयमेन वशीकारात्, निरावरणस्याग्नेरूर्द्ध्वत्वात्तेजसा ज्वलन्निव योगी प्रतिभाति ॥ ४० ॥

सिद्धान्तरमाह ।

---

* मज्जित्वापीति D पुस्तकपाठः ।

† उपरिगच्छतीत्यर्थ इति E पुस्तकपाठः ।

‡ समानजयाज्ज्वलनमिति पाठः C चिह्नितपुस्तके काश्यां मुद्रितयोगभाष्यपुस्तके च वर्त्तते ।

Digitized by Google

श्रोत्राकाशयोः सम्बन्धसंयमाद्दिव्यं श्रोत्रं ॥ ४१ ॥

'श्रोत्रं' शब्दग्राहकमाहङ्कारिकमिन्द्रियं। 'आकाशं' व्योम शब्दतन्मात्रकार्य्यं। तयोः 'सम्बन्धः' देश्य-देशिभावलक्षणः। तस्मिन् कृतसंयमस्य योगिनः 'दिव्यं श्रोत्रं' प्रवर्त्तते, युगपत् सूक्ष्म-व्यवहित-विप्रकृष्टशब्दग्रहणसमर्थं भवतीत्यर्थः ॥ ४१ ॥

सिद्धान्तरमाह ॥

कायाकाशयोः सम्बन्धसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनं ॥ ४२ ॥

'कायः' पाञ्चभौतिकं शरीरं। तस्य 'आकाशेन अवकाशदायकेन* यः 'सम्बन्धः', तत्र संयमं विधाय 'लघुनि 'तूलादौ या 'समापत्तिः तन्मयीभावलक्षणा, तां विधाय प्राप्तात्यन्तलघुभावो योगी प्रथमं यथारुचि जले† सञ्चरन् क्रमेणोर्णनाभतन्तुजालेन सञ्चरमाण आदित्यरश्मिभिश्च विहरन् यथेष्टमाकाशे गच्छति ॥ ४२ ॥

सिद्धान्तरमाह।

बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः ॥ ४३ ॥

शरीरात् 'बहिः', या मनसः शरीरनैरपेक्ष्येण 'वृत्तिः', सा 'महाविदेहा', नाम विगतशरीराहङ्कारदार्ढ्योदारेणोच्यते। 'ततः' तस्मात्

---

* अवकाशदानादिति H पुस्तकपाठः।

† भुवीति H पुस्तकपाठः।

Digitized by Google

ज्ञातात् संयमात्, 'प्रकाशावरणक्षयः' सात्त्विकस्य चित्तस्य यः प्रकाशस्वभावस्य यदावरणं क्लेशकर्मादि तस्य क्षयः प्रविलयो भवति। अयमर्थः। शरीराहङ्कारे सति या मनसो बहिर्वृत्तिः सा कल्पितेत्युच्यते। यदा पुनः शरीराहङ्कारभावं* परित्यज्य स्वातन्त्र्येण मनसो वृत्तिः सा अकल्पिता, तस्यां संयमात् योगिनः सर्वे चित्तमलाः क्षीयन्ते ॥४३॥

तदेवं पूर्वान्तविषया अपरान्तविषया मध्यभावास्च सिद्धीः प्रतिपाद्यानन्तरं भुवनज्ञानादिरूपा बाह्याः, कायव्यूहादिरूपा आभ्यन्तराः, परिकर्मनिष्पन्नभूतास्च 'मैत्र्यादिषु बलानि' इत्येवमाद्याः समाध्युपयोगिनीस्त्वान्तःकरणबहिःकरणलक्षणेन्द्रियभावाः, प्राणादिवायुभावास्च सिद्धीस्त्रिसन्दर्भाच्च समाधेः समाम्नासेत्पन्नये प्रतिपाद्य इदानीं स्वदर्शनोपयोगिसबीज-निर्बीजसमाधिसिद्धये विविधोपायप्रदर्शनायाह।

स्थूल-स्वरूप-सूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः ॥४४॥

पञ्चानां पृथिव्यादीनां भूतानां ये पञ्चावस्थाविशेषरूपा धर्माः स्थूलत्वादयः, तत्र कृतसंयमस्य 'भूतजयः', भवति, भूतानि वश्यान्यस्य भवन्तीत्यर्थः†। तथाहि भूतानां परिदृश्यमानं विशिष्टाकारवद्रूपं 'स्थूलं' 'स्वरूपं' चैषां यथाक्रमं कार्यं गन्ध-स्नेहोष्णता-प्रेरणावकाशदानलक्षणं। 'सूक्ष्मं' तु यथाक्रमं भूतानां कारणत्वेन‡ व्यवस्थितानि गन्धादितन्मात्राणि। 'अन्वयिनो गुणाः प्रकाश-प्रवृत्ति-स्थितिरूपतया

---

* शरीरादहंभावमिति C पुस्तकपाठः।

† भूतान्यवश्यं वश्यानीत्यर्थ इति H पुस्तकपाठः।

‡ कारणभेदेनेति C, H, B पुस्तकपाठः।

Digitized by Google

सर्व्वत्रैवान्वयिलेन सम्भवोपलभ्यते। 'अर्थवत्त्वं' तेष्वेव गुणेषु भोगापवर्गसम्पादनाख्या शक्तिः। तदेवं भूतेषु पञ्चसु उक्तलक्षणावस्थापन्नेषु* प्रत्यवरं संयमं कुर्व्वन् योगी भूतजयी भवति। तद्यथा, प्रथमं स्थूलरूपे संयमं विधाय तदनु सूक्ष्मरूपे इत्येवं क्रमेण तस्य कृतसंयमस्य सङ्कल्पानुविधायिन्यो वत्सानुसारिण्य इव गावो भूतप्रकृतयो भवन्ति ॥ ४४ ॥

तस्यैव भूतजयस्य फलमाह।

ततोऽणिमादिप्रादुर्भावः कायसम्पत्तद्धर्म्मानभिघातश्च ॥ ४५ ॥

'अणिमा' परमाणुरूपतापत्तिः। लघिमा तूलपिण्डवल्लघुत्वप्राप्तिः। गरिमा गुरुत्वप्राप्तिः। महिमा महत्त्वप्राप्तिः अङ्गुल्यग्रेण चन्द्रादिस्पर्शनशक्तिः। प्राकाम्यं इच्छानभिघातः। अरीरान्तःकरणेश्वरत्वं ईशित्वं। सर्व्वत्र प्रभविष्णुता वशित्वं, सर्व्वाण्येव भूतानि अनुरागित्वात्† तदुक्तं नातिक्रामन्ति। कामावसायित्वं सर्व्वत्र कामावसायः, यस्मिन् विषयेऽस्य कामः इच्छा भवति, तस्मिन् विषये योगिनो वसायो भवति, तं विषयं स्वीकारद्वारेणाभिलाषसमाप्तिपर्य्यन्तं नयतीत्यर्थः। तत्र ते अणिमाद्याः समाध्युपयोगिनो भूतजयात् योगिनः प्रादुर्भवन्ति। यथा परमाणुत्वं प्राप्तो

---

* उक्तलक्षणावस्थावच्छिन्नेष्विति H पुस्तकपाठः। उक्तलक्षणावस्थाभिन्नेष्विति F पुस्तकपाठः।

† अनुगामित्वादिति H पुस्तकपाठः।

Digitized by Google

वज्रादीनामप्यन्तः प्रविशन्ति । एवं सर्व्वत्र योज्यं । एतेऽणिमादयोऽष्टौ गुणा महाविद्धय इत्युच्यन्ते । 'कायसम्पत्' वक्ष्यमाणा, तां प्राप्नोति । 'तद्धर्म्मानभिघातश्च' तस्य कायस्य ये धर्म्मा रूपादयस्तेषामभिघातो नाशो नास्य कुतश्चिदपि भवति । नास्य रूपमग्निर्दहति न च वायुः शोषयति इत्यादि योज्यं ॥ ४५ ॥

कायसम्पदमाह ।

रूप-लावण्य-बल-वज्रसंहननत्वानि कायसम्पत् ॥ ४६ ॥

'रूप-लावण्य-बलानि' प्रसिद्धानि । 'वज्रसंहननं' वज्रवत् कठिना संहतिरस्य शरीरे भवतीत्यर्थः । इति कायसम्पत् ॥ ४६ ॥

एवं भूतजयमभिधाय प्राप्तभूमिकस्येन्द्रियजयमाह ।

ग्रहण-स्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः ॥ ४७ ॥

'ग्रहणं' इन्द्रियाणां विषयाभिमुखी वृत्तिः । 'स्वरूपं' सामान्येन प्रकाशकत्वं । 'अस्मिता' अहङ्कारानुगमः । 'अन्वयार्थवत्त्वे' पूर्व्ववत् । एतेषामिन्द्रियाणामवस्थापञ्चके पूर्व्ववत् संयमं कृत्वा 'इन्द्रियजयी भवति ॥ ४७ ॥

तस्य फलमाह ।

ततो मनोजवित्वं विकरणभावः प्रधानजयश्च ॥४८॥

शरीरस्य मनोवदनुत्तमगतिलाभः* 'मनोजवित्वं' । कायनिरपे-

---

* मनोवदुत्तमगतिलाभ इति C पुस्तकपाठः ।

Digitized by Google

ज्ञानमिन्द्रियाणां वृत्तिलाभः 'विकरणभावः'। सर्व्वप्रधानत्वं 'प्रधानजयः'। एताः सिद्धयो जितेन्द्रियस्य प्रादुर्भवन्ति। ताश्च अस्मिन्शास्त्रे मधुप्रतीका इत्युच्यन्ते। यथा मधुन एकदेशोऽपि खदते, एवं प्रत्येकमेताः सिद्धयः खदन्त इति मधुप्रतीकाः॥ ४८॥

इन्द्रियजयमभिधायान्तःकरणजयमाह।

सत्त्व-पुरुषान्यताख्यातिमात्रस्य सर्व्वभावाधिष्ठातृत्वं सर्व्वज्ञातृत्वञ्च॥ ४९॥

तस्मिन् शुद्धे सात्त्विके परिणामे कृतसंयमस्य या सत्त्व-पुरुषयोरुत्पद्यते विवेकख्यातिः सा 'अन्यताख्यातिः',। गुणानां कर्त्तृत्वाभिमानग्रन्थिलीभावस्वरूपात्तन्माहात्म्यात्* तत्रैव स्थितस्य योगिनः 'सर्व्वभावाधिष्ठातृत्वं', 'सर्व्वज्ञातृत्वञ्च', समाधेर्भवति। सर्व्वेषां गुणपरिणामानां भावानां स्वामिवदाक्रमणं 'सर्व्वभावाधिष्ठातृत्वं'। तेषामेव शास्त्रोदिताव्यपदेश्यधर्म्मरूपेण स्थितानां यथावद्विवेकज्ञानं 'सर्व्वज्ञातृत्वं'। एषा च अस्मिन् शास्त्रे परस्यां वशीकारसंज्ञायां प्राप्तायां विशोका नाम सिद्धिरित्युच्यते॥ ४९॥

क्रमेण भूमिकान्तरमाह।

तद्वैराग्यादपि दोषबीजक्षये कैवल्यं॥ ५०॥

तस्यामपि विशोकायां सिद्धौ यदा वैराग्यमुत्पद्यते योगिनः, तदा तस्मात् 'दोषाणां' रागादीनां, यत् 'बीजं' अविद्या, 'तस्याः'

---

* कर्त्तृत्वाभिमानग्रन्थिलीभावस्वरूपया तन्मयतयेति C पुस्तकपाठः।

Digitized by Google

'क्षये' निर्मूलने, 'कैवल्यं' आत्यन्तिकी दुःखनिवृत्तिः। पुरुषस्य गुणानामधिकारपरिसमाप्तेः* स्वरूपनिष्ठत्वं ॥ ५० ॥

अस्मिन्नेव समाधौ स्त्युपायमाह।

स्थान्युपनिमन्त्रणे† सङ्ग-स्मयाकरणं पुनरनिष्टप्रसङ्गात् ॥ ५१ ॥

चत्वारो योगिनो भवन्ति। तत्राभ्यासवान्प्रवृत्तमाचज्योतिः प्रथमः। कृतप्रारब्धः§ द्वितीयः। भूतेन्द्रियजयी तृतीयः। अतिक्रान्तभावनीयश्चतुर्थः। तत्र चतुर्थस्य समाधेः प्राप्तसप्तविधप्रान्तभूमिप्रज्ञस्य॥ अन्त्यां मधुमतीसंज्ञां¶ भूमिं साक्षात्कुर्वतः 'स्थानिनो ह्येवा उपनिमन्त्रयितारो भवन्ति, दिव्यस्त्रीरसायनादिकमुपढौकयन्ति। तस्मिन् 'उपनिमन्त्रणे', नानेन 'सङ्गः', कर्त्तव्यः, नापि 'स्मयः',। सङ्गकरणे पुनर्विषयभोगे निपतति। स्मयकरणे कृतकृत्यमात्मानं मन्यमानो न समाधावुत्सहते। अतः सङ्ग-स्मययोरेतेन वर्जनं कर्त्तव्यं ॥ ५१ ॥

अस्यामेव फलभूतायां विवेकख्यातौ पूर्वेषामसंयमव्यतिरिक्तमुपायान्तरमाह।

---

* अधिकारसमाप्तेरिति B, C पुस्तकपाठः।

† स्वरूपप्रतिष्ठत्वमिति B, C पुस्तकपाठः।

‡ स्थान्युपनिमन्त्रये इति H पुस्तकपाठः।

§ कृतान्तरप्रज्ञ इति H पुस्तकपाठः।

‖ प्राप्तसप्तविधभूमिप्रत्ययस्येति H पुस्तकपाठः।

¶ मधुमतीं प्रज्ञामिति H पुस्तकपाठः।

Digitized by Google

क्षणतत्क्रमयोः* संयमाद्विवेकजं ज्ञानं† ॥ ५२ ॥

'क्षणः' सर्व्वान्त्यः कालावयवः। यस्य कला प्रविभक्तुं न शक्यते। तथाविधानां कालक्षणानां यः 'क्रमः' पौर्व्वापर्य्येण परिणामः, तत्र 'संयमात्' प्रागुक्तं 'विवेकजं ज्ञानं', उत्पद्यते। अयमर्थः। अयं कालक्षणोऽस्मात् कालक्षणादुत्तरः, अयमस्मात् पूर्व्व इत्येवंविधे ज्ञाने कृतसंयमस्यात्यन्तसूक्ष्मोऽपि क्षणक्रमे यदा भवति साक्षात्कारः, तदा अन्यदपि सूक्ष्मं महदादि साक्षात्करोतीति विवेकज्ञानोत्पत्तिः॥ ५२॥

अस्यैव संयमस्य विषयविशेषोपक्षेपणायाह‡।

जाति-लक्षण-देशैरन्यतानवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः ॥ ५३ ॥

पदार्थानां भेदहेतवः 'जाति-लक्षण-देशा भवन्ति। क्वचिद्भेदहेतुः 'जातिः', यथा गौरियं महिषीयमिति। जात्या तुल्ययोः 'लक्षणं', भेदहेतुः, यथा दूयं कर्व्वुरा दूयमरुणेति। जात्या लक्षणेन चाभिन्नयोर्भेदहेतुः 'देशः', दृष्टः, यथा तुल्यप्रमाणयोरामलकयोर्भिन्नदेशस्थितयोः। यत्र पुनर्भेदोऽवधारयितुं न शक्यते, यथैकदेशस्थितयोः शुक्लयोः पार्थिवयोः परमाण्वोः। तथाविधे विषये भेदाय कृतसंयमस्य यदा भेदेन ज्ञानमुपजायते, तदा तदभ्यासात् सूक्ष्मान्यपि तत्त्वानि भेदेन प्रतिपाद्यन्ते। एतदुक्तं भवति, यत्र केनचिदु-

---

* क्षणक्रमयोरिति H पुस्तकपाठः।

† विवेकज्ञानमिति H पुस्तकपाठः।

‡ विषयविवेकोपयोगमाहेति C पुस्तकपाठः।

Digitized by Google

पायेन भेदो नावधारयितुं शक्यस्तत्र संयमाद्भवत्येव भेदप्रतिपत्तिः सूक्ष्माणां तत्त्वानां ॥ ५३ ॥

उक्तस्य विवेकजन्यज्ञानस्य संज्ञां विषयं स्वभावं व्याख्यातुमाह ।

तारकं सर्व्वविषयं सर्व्वथाविषयमक्रमञ्चेति विवेकजं ज्ञानं ॥ ५४ ॥

उक्तसंयमबलाद्व्युत्थायां भूमिकायामुत्पन्नं 'ज्ञानं', 'तारकं', इति । तारयत्यगाधात् संसारपयोधेः* योगिनं इत्यान्वर्थिक्या संज्ञया 'तारकं', इत्युच्यते । अस्य विषयमाह, 'सर्व्वविषयं' इति, सर्व्वाणि तत्त्वानि महदादीनि विषयोऽस्येति 'सर्व्वविषयं' । स्वभावस्यास्य सर्व्वथाविषयत्वं । सर्व्वाभिरवस्थाभिः स्थूल-सूक्ष्मादिभेदेन तैस्तैश्च परिणामैः सर्व्वेणाकारेणावस्थितानि तत्त्वानि विषयोऽस्येति 'सर्व्वथा विषयं' । स्वभावान्तरमाह । 'अक्रमञ्च', इति । निःशेषनानावस्थापरिणतदिव्येकभावग्रहणे† नास्य क्रमो विद्यते इति 'अक्रमं' । सर्व्वं करतलामलकवद्युगपत् पश्यतीत्यर्थः ॥ ५४ ॥

अस्माच्च विवेकजातात्तारकाख्यज्ञानात् किं भवतीत्याह ।

सत्त्व-पुरुषयोः शुद्धिसाम्ये कैवल्यं ॥ ५५ ॥

'सत्त्व-पुरुषौ' उक्तलक्षणौ । तयोः 'शुद्धिसाम्ये कैवल्यं' ।

---

* संसारसागरादिति H पुस्तकपाठः ।

† निःशेषनानावस्थापरिणतन्यात्मकभावग्रहणे इति H पुस्तकपाठः । निःशेषनानावस्थापरिणतन्यूनाधिकभावग्रहणे इति C पुस्तकपाठः ।

Digitized by Google

चित्तसत्त्वस्य सर्व्वथा कर्त्तृत्वाभिमाननिवृत्त्या स्वकारणेऽनुप्रवेशः शुद्धिः। पुरुषस्य शुद्धिरूपचरितभोगाभावः। इति द्वयोः समानायां शुद्धौ पुरुषस्य कैवल्यं उत्पद्यते, मोक्षो भवतीत्यर्थः।

तदेवमन्तरङ्गयोगाङ्गत्रयमभिधाय तस्य च संयमसञ्ज्ञां कृत्वा संयमस्य विषयप्रदर्शनार्थं परिणामत्रयमुपपाद्य संयमलोत्पद्यमानाः पूर्व्वान्तापरान्त-मध्यभावाः सिद्धीरुपदर्श्य समाध्याश्वासोत्पत्तये वाह्या भुवनज्ञानादिरूपा आभ्यन्तराश्च कायव्यूहज्ञानादिरूपाः प्रदर्श्य समाध्युपयोगायेन्द्रियप्राणादिजयपूर्व्विकाः प्रदर्श्य परमपुरुषार्थसिद्धये यथाक्रममवस्थासहितभूतजयेन्द्रिय-सत्त्वजयोद्भवाश्च व्याख्याय विवेकज्ञानोत्पत्तये तांस्तान् उपायान् उपन्यस्य तारकस्य सर्व्वसमाध्यवस्थापर्य्यन्तभवस्य स्वरूपमभिधाय तत्समापत्तेः कृताधिकारस्य चित्तसत्त्वस्य स्वकारणानुप्रवेशात् कैवल्यमुत्पद्यते इत्यभिहितं इति व्याख्यातो विभूतिपादः॥ ५५॥

इति महाराजाधिराजश्रीभोजदेवविरचितायां राजमार्त्तण्डाभिधायां पातञ्जलयोगशास्त्रसूत्रवृत्तौ विभूतिपादस्तृतीयः॥ ३॥

Digitized by Google

अथ चतुर्थः पादः ।

यदाश्रयैव कैवल्यं विनोपायैः प्रजायते ।
तमेकमजमीशानं चिदानन्दमयं स्तुमः ॥

इदानीं विप्रतिपत्तिसमुत्थभ्रान्तिनिराकरणेन युक्त्या कैवल्यस्वरूपावस्थापनाय* कैवल्यपादोऽयमारभ्यते ।

तत्र याः पूर्वसूत्राः सिद्धयस्तासां नानाविधजन्मादिकारणप्रतिपादनद्वारेणैवं बोधयति, एताः सिद्धयः सर्वाः पूर्वजन्माभ्यस्तसमाधिबलाज्जन्मादिनिमित्तमाश्रित्य प्रवर्त्तन्ते । ततस्त्वानेकभवसाध्यस्य समाधेर्न चतिरस्तीत्याश्वासोत्पादनाय समाधिसिद्धेश्च प्राधान्यख्यापनार्थं कैवल्योपयोगार्थत्वाच्च ।

जन्मौषधि-मन्त्र-तपः-समाधिजाः सिद्धयः ॥ १ ॥

कासुचन 'जन्मनिमित्ता एव सिद्धयः । यथा पक्ष्यादीनामाकाशे गमनादयः । यथा वा कपिलमहर्षिप्रभृतीनां जन्मसमनन्तरमेव उपजायमाना ज्ञानादयः सांसिद्धिका गुणाः । 'औषधिसिद्धयो यथा पातालादौ रसायनाद्युपभोगात् शरीरदार्ढ्यादयः । 'मन्त्रसिद्धिर्यथा मन्त्रजपात् केषाञ्चिदाकाशगमनादि । 'तपःसिद्धिर्यथा विश्वामित्रादीनां । 'समाधिसिद्धिर्यथा प्रागेव प्रतिपादिताः । एताः सिद्धयः पूर्वजन्मनि क्षयितक्लेशानामेवोपजायन्ते, तस्मात् समाधिसिद्धाविव

---

* कैवल्यस्वरूपस्थापनायेति C पुस्तकपाठः ।

Digitized by Google

अन्यासां सिद्धीनां समाधिरेव जन्मान्तराभ्यस्तः कारणं, मन्त्रादीनि तु निमित्तमात्राणि ॥ १ ॥

ननु नन्दीश्वरादीनां जात्यादिपरिणामः अस्मिन्नेव जन्मनि दृश्यते तत् कथं जन्मान्तराभ्यस्तसमाधेः कारणत्वमुच्यते* इत्याशङ्क्याह।

जात्यन्तरपरिणामः प्रकृत्यापूरात् ॥ २ ॥

योऽयमिहैव जन्मनि नन्दीश्वरादीनां 'जात्यादिपरिणामः, सः 'प्रकृत्यापूरात्'। पाश्चात्या एव हि प्रकृतयोऽस्मिन् जन्मनि विकारानापूरयन्ति जात्यन्तराकारेण परिणमन्ति ॥ २ ॥

ननु धर्माऽधर्मादयस्तच्च क्रियमाणा उपलभ्यन्ते, तत् कथं प्रकृतीनामापूरणे कारणत्वमित्याह।

निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत् ॥ ३ ॥

'निमित्तं' धर्मादि। तत् 'प्रकृतीनां', अर्थान्तरपरिणामे न 'प्रयोजकं'। न हि कार्येण कारणं प्रवर्त्तते। कुत्र तर्हि तस्य धर्मादेर्व्यापार इत्याह। 'वरणभेदस्तु ततः क्षेत्रिकवत्'। 'ततः' तस्मादनुष्ठीयमानाद्धर्मादेः, यत् 'वरणं' आवरकं अधर्मादिः, तस्यैव विरोधित्वात् 'भेदः' क्षयः, क्रियते, तस्मिन् प्रतिबन्धके क्षीणे प्रकृतयः स्वयमभिमतकार्य्याय प्रभवन्ति। दृष्टान्तमाह। 'क्षेत्रिकवत्', यथा क्षेत्रिकः

---

* कारणभाव उच्यत इति C पुस्तकपाठः।

Digitized by Google

क्षीवलः केदारात् केदारान्तरं जलं निनीषुः जलप्रतिबन्धक-वरणभेदमात्रं करोति, तस्मिन् भिन्ने जलं स्वयमेव प्रसरद्रूपं परिणामं गच्छति, न तु जलप्रसरणे तस्य कश्चित् प्रयत्नः। एवं धर्मादेर्बोद्धव्यं ॥ ३ ॥

यदा साक्षात्कृततत्त्वस्य योगिनो युगपत् कर्मफलोपभोगाया-त्मीयनिरतिशयविभूत्यनुभावात्* युगपदनेकशरीरनिर्मितिमिच्छा उप-जायते तदा कुतस्तानि चित्तानि प्रभवन्तीत्याह।

निर्माणचित्तान्यस्मितामात्रात् ॥ ४ ॥

योगिनः स्वयं निर्मितेषु कायेषु यानि 'चित्तानि', तानि मूल-कारणात् 'अस्मितामात्रात्', एव तदिच्छया प्रसरन्ति, अग्नेर्विस्फुलिङ्गा इव युगपत् परिणमन्ति ॥ ४ ॥

ननु बहूनां चित्तानां भिन्नाभिप्रायत्वान्नैककार्यकर्तृत्वं स्यादि-त्याह।

प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषां ॥ ५ ॥

तेषां 'अनेकेषां', चेतसां, 'प्रवृत्तिभेदे' व्यापारनानात्वे 'एकं', योगिनः 'चित्तं', 'प्रयोजकं' प्रेरकमधिष्ठातृत्वेन। तेन न भिन्नमतत्वं। अयमर्थः यथा आत्मीये शरीरे मनः चक्षुःपाण्यादीनि यद्येच्छं प्रेरयत्यधिष्ठातृत्वेन, एवं कायान्तरेष्वपीति† ॥ ५ ॥

---

* निरतिशयविभूत्यनुभवायेति C पुस्तकपाठः।
† कार्यान्तरेष्वपीतीति B पुस्तकपाठः।

Digitized by Google

जन्मादिप्रभवत्वात् सिद्धीनां चित्तमपि तत्प्रभवं पञ्चविधमेव अतो जन्मादिप्रभवात् चित्तात् समाधिप्रभवस्य चित्तस्य वैलक्षण्यमाह।

तच्च ध्यानजमनाशयं ॥ ६ ॥

'ध्यानजं' समाधिजं यच्चित्तं, तत् पञ्चसु मध्ये 'अनाशयं' कर्म-वासनारहितं, इत्यर्थः ॥ ६ ॥

यथेतरचित्तेभ्यो योगिनश्चित्तं क्लेशादिरहितं विलक्षणं तथा कर्मापि विलक्षणमित्याह।

कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषां ॥ ७ ॥

शुभफलप्रदं कर्म यागादि शुक्लं। अशुभफलप्रदं ब्रह्महत्यादि कृष्णं। उभयसङ्कीर्णं शुक्लकृष्णं। तच्च शुक्लं कर्म विचक्षणानां दान-तपः-स्वाध्यायादिमतां पुरुषाणां। कृष्णं कर्म नारकानां। शुक्ल-कृष्णं मनुष्याणां। 'योगिनान्तु संन्यासवतां एवंविधकर्मविपरीत-लक्षणं, तत् फलत्यागानुसन्धानेनैवानुष्ठानात् न किञ्चित् फलमार-भते ॥ ७ ॥

अस्यैव कर्मणः फलमाह।

ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानां ॥८॥

इह द्विविधाः कर्मवासनाः स्मृतिमात्रफलाः जात्यायुर्भोगफलाश्च। तत्र जात्यायुर्भोगफला एकानेकजन्मभवाः* इत्यनेन पूर्वमेव कृत-

---

* एकानेकजन्मफला इति F पुस्तकपाठः।

Digitized by Google

निर्णयाः । यास्तु स्मृतिमात्रफलास्तासामभिव्यक्तिस्ततः कर्मणः । येन कर्मणा यादृक् शरीरमारब्धं देव-मनुष्य-तिर्यग्गादिभेदेन*, तस्य विपाकस्य याः 'अनुगुणा अनुरूपा वासनाः, तासामेव तस्मात् 'अभिव्यक्तिः', 'वासनानां', भवति । अयमर्थः येन कर्मणा पूर्वं देवतादिशरीरमारब्धं जात्यन्तरशतव्यवधाने पुनस्तथाविधस्यैव शरीरस्यारम्भे तदनुरूपा एव स्मृतिफला वासनाः प्रकटीभवन्ति । लोकान्तरेष्वेवार्थेषु तस्य स्मृत्यादयो जायन्ते । इतरास्तु सत्योऽपि न्यग्भूता†स्तिष्ठन्ति । न तस्यां दशायां नारकादिशरीरोपभोगभवा वासना अभिव्यक्तिमायान्ति ॥ ८ ॥

आसामेव वासनानां कार्यकारणभावानुपपत्तिमाशङ्क्य समर्थयितुमाह ।

जाति-देश-काल-व्यवहितानामप्यानन्तर्यं स्मृति-संस्कारयोरेकरूपत्वात् ॥ ९ ॥

इह नानायोनिषु भ्रमतां संसारिणां काश्चिद्योनिमनुभूय यदा योन्यन्तरसहस्रव्यवधानेन पुनस्तामेव योनिं प्रतिपद्यन्ते, तदा तस्यां पूर्वानुभूतायां योनौ तथाविधशरीरादिव्यञ्जकापेक्षया वासना याः प्रकटीभूता आसंस्तथाविधव्यञ्जकाभावात्तिरोभूताः पुनस्तथाविधव्यञ्जकशरीरादिलाभे प्रकटीभवन्ति । 'जाति-देश-कालव्यवधानेऽपि तासां स्वानुरूपस्मृत्यादिफलसाधने 'आनन्तर्यं' नैरन्तर्यमेव । कुतः ।

---

* देवमनुष्यतिर्यग्गादिभेदमिति H पुस्तकपाठः ।

† अथाक्तसंस्कारास्तिष्ठन्तीति H पुस्तकपाठः ।

Digitized by Google

'स्मृतिसंस्कारयोरेकरूपत्वात्'। तथा हि अनुष्ठीयमानात् कर्मणश्चित्तसत्त्वे वासनारूपः संस्कारः समुत्पद्यते, स च स्वर्गनरकादीनां फलानाम्बाङ्कुरीभावः, कर्मणां वा यागादीनां शक्तिरूपतयावस्थानं, कर्त्तुर्वा तथाविधभोग्यभोक्तृत्वरूपं सामर्थ्यं, संस्कारात् स्मृतिः, स्मृतेश्च सुखदुःखोपभोगः, तदनुभवाच्च पुनरपि संस्कारस्मृत्यादयः। एवञ्च यस्य स्मृतिसंस्कारादयो भिन्नास्तस्यानन्त्यभावे दुर्लभः कार्य्यकारणभावः। अस्माकन्तु यदानुभव एव संस्कारीभवति, संस्कारश्च स्मृतिरूपतया परिणमते, तदा एकस्यैव चित्तस्याऽनुसन्धात्रत्वेन स्थितत्वात् कार्य्यकारणभावो न दुर्घटः॥ ९॥

भवत्वानन्त्यं कार्य्यकारणभावश्च वासनानां। यदा तु प्रथममेवानुभवः प्रवर्त्तते तदा किं वासनानिमित्त उत निर्निमित्त इति शङ्कां व्यपनेतुमाह।

तासामनादित्वमाशिषो नित्यत्वात्॥ १०॥

'तासां' वासनानां। 'अनादित्वं' न विद्यते आदिर्यस्य तस्य भावस्तत्त्वं। आसामादिर्नास्तीत्यर्थः। कुतः* 'आशिषो नित्यत्वात्'। येयमाशीर्मदहमोहरूपा सदैव सुखसाधनानि मे भूयासुः मा कदाचन तैर्मम वियोगो भूयादिति यः सङ्कल्पविशेषो वासनानां कारणं तस्य नित्यत्वादनादित्वादित्यर्थः। एतदुक्तं भवति कारणस्य सन्निहितत्वादनुभवसंस्कारादीनां कार्य्याणां प्रवृत्तिः केन वार्य्यते, अनुभव-

---

* कुत इत्यत आहेति F पुस्तकपाठः।

Digitized by Google

संस्कारानुविद्धं संक्लेश-विकाश्रयधर्मि चित्तं तत्तदभिव्यञ्जकविपाक-लाभात् तत्फलरूपतया परिणमत इत्यर्थः ॥ १० ॥

आसामानन्त्यात् हानं कथं सम्भवतीत्याशङ्क्य हानोपायमाह ।

हेतु-फलाश्रयालम्बनैः सङ्गृहीतत्वादेषामभावे तदभावः ॥ ११ ॥

वासनानामनुभवो हेतुः, तस्यानुभवस्य रागादयः, तेषामविद्या इति साक्षात् पारम्पर्येण च 'हेतुः' । 'फलं' शरीरादि स्मृत्यादि च । 'आश्रयः' बुद्धितत्त्वं । 'आलम्बनं' यदेवानुभवस्य तदेव वासनानां । अतस्तैः 'हेतु-फलाश्रयालम्बनैः', अनन्तानामपि वासनानां 'संगृहीत-त्वात्', तेषां हेत्वादीनां 'अभावे' ज्ञान-योगाभ्यां दग्धबीजकल्पत्वे विहिते, निर्मूलत्वात् न वासनाः प्ररोहन्ति* न कार्यमारभन्त इति तासां 'अभावः' ॥ ११ ॥

ननु प्रतिक्षणं चित्तस्य नश्वरत्वोपलब्धेर्वासनानां तत्फलानाञ्च कार्यकारणभावेनायुगपद्भावित्वात् भेदे कथमेकत्वमित्याशङ्क्य एकत्व-समर्थनायाह ।

अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणां ॥ १२ ॥

इह अत्यन्तमसतां भावानामुत्पत्तिर्न दृष्टिमती तेषां सत्त्वसम्ब-न्धायोगात् । नहि शशविषाणादीनां क्वचिदपि सत्त्वसम्बन्धो दृष्टः । निरुपाख्ये च कार्ये किमुद्दिश्य कारणानि प्रवर्त्तेरन् । नन्वसन्नं विष-

---

* प्ररोहमुपयान्तीति B, F पुस्तकद्वयपाठः ।

Digitized by Google

यमालोच्य कश्चित् प्रवर्त्तते। सतामपि विरोधाभावसम्बन्धोऽस्ति। यत् स्वरूपेण सत्त्वसत्ताकं तत् कथं निरूपाख्यतामभावस्वरूपतां च भजते, न विरुद्धं रूपं स्वीकरोतीत्यर्थः। तस्मात् सतां नाशासम्भवात् असतश्चोत्पत्त्यभावात् तैस्तैर्धर्म्मैर्व्विपरिणममानो धर्म्मी सदैकरूप एवावतिष्ठते। धर्म्माश्च ते त्र्यध्वकत्वेन व्यवस्थिताः*। स्वस्मिन् स्वस्मिन्नध्वनि व्यवस्थिताः स्वरूपं त्यजन्ति,† वर्त्तमानेऽध्वनि व्यवस्थिताः केवलं भोग्यतां भजन्ते। तस्माद्धर्म्माणामेव अतीतानागताद्यध्वभेदस्तेनैव रूपेण कार्य्यकारणभावोऽस्मिन् दर्शने प्रतिपद्यते, तस्मादपवर्गपर्य्यन्तमेकमेव चित्तं धर्म्मितयानुवर्त्तमानं न निरोद्धुं पार्य्यते ॥ १२ ॥

त एते धर्म्म-धर्म्मिणः किंरूपा इत्याह।

ते व्यक्त-सूक्ष्मा गुणात्मानः ॥ १३ ॥

य एते धर्म्म-धर्म्मिणः प्रोक्ताः 'ते', 'व्यक्त-सूक्ष्मभेदेन व्यवस्थिताः। 'गुणाः' सत्त्वरजस्तमोरूपाः। तदात्मानस्तत्स्वभावास्तत्परिणामरूपा इत्यर्थः। यतः सत्त्वरजस्तमोभिः सुखदुःखमोहरूपैः सर्व्वासां बाह्याभ्यन्तरभिन्नानां भावव्यक्तीनामन्वयानुगमो दृश्यते, यच्च यदन्वयि तत् तत्परिणामरूपं दृष्टं। यथा घटाद्यो मृदन्विता मृत्परिणामरूपाः॥ १३ ॥

यद्येते त्रयो गुणाः सर्व्वत्र मूलकारणं, कथमेको धर्म्मीति व्यपदेशः इत्याशङ्क्याह।

---

* त्र्यध्वकत्वेन त्रैकालिकत्वेन व्यवस्थिता इति F पुस्तकपाठः।

† न स्वरूपं त्यजन्तीति C पुस्तकपाठः।

Digitized by Google

संस्कारानुविद्धं संक्लेश-विकल्पधर्मि चित्तं तत्तदभिव्यञ्जकविपाक-लाभात् तत्फलरूपतया परिणमत इत्यर्थः ॥ १० ॥

आसामानन्त्यात् हानं कथं सम्भवतीत्याशङ्क्य हानोपायमाह ।

हेतु-फलाश्रयालम्बनैः सङ्गृहीतत्वादेषामभावे तदभावः ॥ ११ ॥

वासनानामनुभवो हेतुः, तस्यानुभवस्य रागादयः, तेषामविद्या इति साक्षात् पारम्पर्येण च 'हेतुः' । 'फलं' शरीरादि स्मृत्यादि च । 'आश्रयः' बुद्धितत्त्वं । 'आलम्बनं' यदेवानुभवस्य तदेव वासनानां । अतस्तैः 'हेतु-फलाश्रयालम्बनैः', अनन्तानामपि वासनानां 'संगृहीत-त्वात्', तेषां हेत्वादीनां 'अभावे' ज्ञान-योगाभ्यां दग्धबीजकल्पे विहिते, निर्मूलत्वात् न वासनाः प्ररोहन्ति* न कार्यमारभन्त इति तासां 'अभावः' ॥ ११ ॥

ननु प्रतिक्षणं चित्तस्य नश्वरत्वोपलब्धेर्वासनानां तत्फलानाञ्च कार्यकारणभावेनायुगपद्भावित्वात् भेदे कथमेकत्वमित्याशङ्क्य एकत्व-समर्थनायाह ।

अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणां ॥ १२ ॥

इह अत्यन्तमसतां भावानामुत्पत्तिर्न युक्तिमती तेषां सत्त्वसम्ब-न्धायोगात् । नहि शशविषाणादीनां क्वचिदपि सत्त्वसम्बन्धो दृष्टः । निरुपाख्ये च कार्ये किमुद्दिश्य कारणानि प्रवर्त्तेरन् । नञ्समं विष-

---

* प्ररोहमुपयान्तीति B, F पुस्तकद्वयपाठः ।

Digitized by Google

यमालोच्य कश्चित् प्रवर्त्तते । सतामपि विरोधान्नाभावसम्बन्धोऽस्ति । यत् स्वरूपेण सत्त्वसत्ताकं तत् कथं निरूपाख्यतामभावस्वरूपतां च भजते, न विरुद्धं रूपं स्वीकरोतीत्यर्थः । तस्मात् सतां नाशासम्भवात् असतां चोत्पत्त्यभावात् तैस्तैर्धर्म्मैर्व्विपरिणममानो धर्म्मी सदैकरूप एवावतिष्ठते । धर्म्मास्तु ते अध्वकत्वेन व्यवस्थिताः* । स्वस्मिन् स्वस्मिन्नध्वनि व्यवस्थिताः स्वरूपं त्यजन्ति,† वर्त्तमानेऽध्वनि व्यवस्थिताः केवलं भोग्यतां भजन्ते । तस्माद्धर्म्माणामेव अतीतानागताद्यध्वभेदस्तेनैव च रूपेण कार्य्यकारणभावोऽस्मिन् दर्शने प्रतिपद्यते, तस्मादपवर्गपर्य्यन्तमेकमेव चित्तं धर्म्मितयानुवर्त्तमानं न निह्नोतुं पार्य्यते ॥ १२ ॥

त एते धर्म्म-धर्म्मिणः किंरूपा इत्याह ।

ते व्यक्त-सूक्ष्मा गुणात्मानः ॥ १३ ॥

य एते धर्म्म-धर्म्मिणः प्रोक्ताः 'ते', 'व्यक्त-सूक्ष्मभेदेन व्यवस्थिताः । 'गुणाः' सत्त्वरजस्तमोरूपाः । तदात्मानस्तत्स्वभावास्तत्परिणामरूपा इत्यर्थः । यतः सत्त्वरजस्तमोभिः सुखदुःखमोहरूपैः सर्व्वासां बाह्याभ्यन्तराभिज्ञानां भावव्यक्तीनामन्वयाऽनुगमो दृश्यते, यच्च यदन्वयि तत् तत्परिणामरूपं दृष्टं । यथा घटाद्यो मृदन्विता मृत्परिणामरूपाः ॥ १३ ॥

यद्येते त्रयो गुणाः सर्व्वत्र मूलकारणं, कथमेको धर्म्मीति व्यपदेशः इत्याशङ्क्याह ।

---

* अध्वकत्वेन त्रैकालिकत्वेन व्यवस्थिता इति F पुस्तकपाठः ।

† न स्वरूपं त्यजन्तीति C पुस्तकपाठः ।

Digitized by Google

परिणामैकत्वाद्वस्तुतत्त्वं ॥ १४ ॥

यद्येते त्रयो गुणास्तथापि तेषामङ्गाङ्गिभावगमनलक्षणो यः 'परिणामः' क्वचित् सत्त्वमङ्गि क्वचिद्रजः क्वचिच्च तम इत्येवंरूपः, तस्य 'एकत्वात्', 'वस्तुनः', 'तत्त्वं' एकत्वमुच्यते । यथेयं पृथिवी अयं वायुरित्यादि ॥ १४ ॥

ननु विज्ञानव्यतिरिक्ते सत्यर्थे वस्त्वेकमनेकं वा वक्तुं युज्यते यदा विज्ञानमेव वासनावशात् कार्यकारणभावेनावस्थितं तथा तथा प्रतिभाति, तदा कथमेतच्छक्यते वक्तुमित्याशङ्क्याह ।

वस्तुसाम्ये चित्तभेदात्तयोर्विविक्तः पन्थाः ॥ १५ ॥

'तयोः' ज्ञान-ज्ञेययोः, 'विविक्तः पन्थाः' विविक्तो मार्गभेद इति यावत् । कथं? 'वस्तुसाम्ये चित्तभेदात्', समाने वस्तुनि स्त्र्यादावुपलभ्यमाने नानाप्रमातॄणां चित्तभेदः सुख-दुःख-मोहरूपतया समुपलभ्यते । तथाहि एकस्यां रूपलावण्यवत्यां योषिति उपलभ्यमानायां सरागस्य सुखमुत्पद्यते, सपत्न्यास्तु द्वेषः, परिव्राजकादेर्घृणेत्येकस्मिन् वस्तुनि नानाविधचित्तोदयात् कथञ्चिन्न कार्यत्वं वस्तुनः । एकचित्तकार्यत्वे वस्तु एकरूपतयैवावभासेत । किञ्च चित्तकार्यत्वे वस्तुनः यस्य चित्तस्य यद् वस्तु कार्यं, तस्मिन् अर्थान्तरव्यासक्ते चित्ते तद्वस्तु न किञ्चित् स्यात् । भवतीति चेन्न। तदेव कथमन्यैर्बहुभिरुपलभ्यते । उपलभ्यते च तस्मान्न चित्तकार्यं । अथ युगपद्बहुभिः योऽर्थः क्रियते तदा बहुनिर्मितस्य तस्य* एकनिर्मितादैलक्षण्यं स्यात् । यदि

* कार्य्यस्येति C पुस्तकपाठः ।

Digitized by Google

वैलक्षण्यं नेष्यते तदा कारणभेदे सति कार्यभेदस्याभावे निर्हेतुकमेकरूपं वा जगत् स्यात्। एतदुक्तं भवति सत्यपि भिन्ने कारणे यदि कार्यस्याभेदः तदा समग्रं जगन्नानाविधकारणजन्यमेकरूपं स्यात्, कारणभेदाननुगमात् स्वातन्त्र्येण निर्हेतुकं वा स्यात्। यद्येवं कथं तेन त्रिगुणात्मनार्थेनैकस्यैव प्रमातुः सुख-दुःख-मोहमयानि ज्ञानानि जन्यन्ते। मैवं। यथा अर्थस्त्रिगुणस्तथा चित्तमपि त्रिगुणं, तस्य च अर्थप्रतिभासोत्पत्तौ धर्मादयः* सहकारिकारणं। तदुद्भवाभिभवयोग्यचित्तस्य तेन तेन रूपेणाभिव्यक्तिः। तथा च कामुकस्य सन्निहितायां योषिति धर्मसहकृतं चित्तं सत्त्वस्याङ्गितया परिणममाणं सुखमयं भवति। तदेवाधर्मसहकारि रजसोऽङ्गितया दुःखरूपं सपत्नीमात्रस्य भवति। तीव्राधर्मसहकारितया तमसोऽङ्गित्वेन कोपनायाः सपत्न्या मोहमयं भवति। तस्मादिज्ञानव्यतिरिक्तोऽस्ति बाह्योऽर्थः†। तदेवं विज्ञानार्थयोः‡ तादात्म्यविरोधान्न कार्यकारणभावः। कारणाभेदे सत्यपि कार्यभेदे अतिप्रसङ्गादिति ज्ञानाद्व्यतिरिक्तत्वमर्थस्य व्यवस्थापितं ॥ १५ ॥

यद्येकं ज्ञानं प्रकाशकत्वात् ग्रहणस्वभावमर्थस्य प्रकाश्यत्वाद्ग्राह्यस्वभावः तत् कथं युगपत् सर्वानर्थान्न गृह्णाति न स्मरति चेत्याशङ्क्य परिहारं कर्तुमाह।

---

* धर्माधर्मादय इति F पुस्तकपाठः।

† बाह्यार्थ इति C पुस्तकपाठः।

‡ विज्ञानवस्तुनोरिति F पुस्तकपाठः।

Digitized by Google

तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातं ॥ १६ ॥

'तस्य' अर्थस्य, 'उपरागादाकारसमर्पणात्, चित्ते वाह्यं 'वस्तु', 'ज्ञातमज्ञातञ्च भवति। अयमर्थः, सर्व्वः पदार्थः स्वात्मलाभे सामग्रीमपेक्षते, नीलादिज्ञानञ्चोपजायमानं इन्द्रियप्रणालिकया समागतमर्थोपरागं सहकारिकारणत्वेनापेक्षते व्यतिरिक्तस्यार्थस्य सम्बन्धाभावाद्ग्रहीतुमशक्यत्वात्। ततश्च येनैवार्थेन तस्य ज्ञानस्य स्वरूपोपरागः कृतः तमेवार्थं तज्ज्ञानं व्यवहारयोग्यतां नयति। ततश्च सोऽर्थो ज्ञात इत्युच्यते। येन चाकारो न समर्पितः सोऽज्ञातत्वेन व्यवह्रियते। यस्मिंस्त्वनुभूतेऽर्थे सादृश्यादिरर्थः संस्कारमुद्बोधयन् सहकारिकारणतां प्रतिपद्यते तस्मिन्नेवार्थे स्मृतिरुपजायते इति सर्व्वस्य न ज्ञानं, नापि सर्व्वस्य स्मृतिरिति न कश्चिद्विरोधः*॥ १६ ॥

यद्येवं प्रमातापि पुरुषो यस्मिन् काले नीलं संवेदयते न तस्मिन् काले पीतं अतश्चित्तवत्तस्यापि कदाचिद्ग्रहीतृरूपत्वादाकारग्रहणे परिणामित्वं प्राप्तमित्याशङ्क्य परिहर्त्तुमाह।

सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामात्† ॥ १७ ॥

या एताः 'चित्तस्य', प्रमाण-विपर्य्ययादिरूपाः 'वृत्तयः', ताः 'तत्प्रभोः' तस्य चित्तस्य ग्रहीतुः, 'पुरुषस्य', 'सदा' सर्व्वकालमेव, 'ज्ञेयाः, तस्य चिद्रूपतया 'अपरिणामात्' परिणामित्वाभावादित्यर्थः।

---

* क्वचिदिरोध इति F पुस्तकपाठः।

† पुरुषस्यापरिणामित्वादिति काशीमुद्रितभाष्यपुस्तकपाठः।

Digitized by Google

यद्यसौ परिणामी स्यात्तदा परिणामस्य कादाचित्कत्वात्सर्वा चित्तवृत्तीनां सदा ज्ञातत्वं नोपपद्यते। अयमर्थः, पुरुषस्य चिद्रूपस्य सदैवाधिष्ठातृत्वेन व्यवस्थितस्य यदन्तरङ्गं निर्मलं सत्त्वं तस्यापि सदैवावस्थितत्वात् तद्येन येनार्थेनोपरक्तं भवति तथाविधस्यार्थस्य सदैव चिच्छायासंक्रान्तिसम्भवः, तस्यां सत्यां सिद्धं सदा ज्ञातृत्वमिति न कदाचित्परिणामित्वाशङ्का ॥ १७ ॥

ननु चित्तमेव सत्त्वोत्कर्षाद्यदि प्रकाशकं तदा स्वपरप्रकाशरूपत्वात्* आत्मानमर्थञ्च प्रकाशयतीति तावतैव व्यवहारसमाप्तिः किं गृहीतृचित्तान्तरेण दृश्याशङ्कामपनेतुमाह।

न तत् स्वाभासं दृश्यत्वात् ॥ १८ ॥

'तत्' चित्तं, 'स्वाभासं' स्वप्रकाशं, न भवति, पुरुषवेद्यं भवतीति यावत्। कुतः 'दृश्यत्वात्', यत् किल दृश्यं तद्दृष्टृवेद्यं, यथा घटादि। दृश्यञ्चेदं चित्तं तस्मान्न स्वाभासं ॥ १८ ॥

ननु साध्याविशिष्टोऽयं हेतुः दृश्यत्वमेव चित्तस्यासिद्धं, किञ्च स्वबुद्धिसंवेदनद्वारेण पुरुषाणां हिताहितप्राप्तिपरिहाररूपा वृत्तयो दृश्यन्ते, तथाहि क्रुद्धोऽहं भीतोऽहं न मे राग इत्येवमाद्या संविद्दुद्धेरसंवेदनान्नोपपन्नेत्याशङ्कां निरसितुमाह।

एकसमये चोभयानवधारणं ॥ १९ ॥

अर्थस्य संवित्तिरिदन्तया व्यवहारयोग्यतापादनं अयमर्थः सुख-

---

* स्वपरप्रकाशकत्वादिति C पुस्तकपाठः।

† वेद्यत्वेति C पुस्तकपाठः।

Digitized by Google

हेतुर्दुःखहेतुर्वेति। बुद्धेश्च संवित् अहमित्येवमाकारेण सुखदुःखरूपतया व्यवहारक्षमतापादनं। एवंविधश्च व्यापारद्वयमर्थप्रत्यक्षकाले न युगपत्कर्तुं शक्यं विरोधात्। न हि विरुद्धयोर्व्यापारयोर्युगपत्समावेशोऽस्ति। अतः 'एकस्मिन् काले, 'उभयस्य' स्वरूपस्यार्थस्य च, अवधारयितुमशक्यत्वान्न चित्तं स्वप्रकाशकमित्युक्तं भवति। किञ्चैवंविधव्यापारद्वयं निष्पाद्य फलद्वयस्यासंवेदनाद्बहिर्मुखतयैवार्थनिष्ठमेव चित्तस्य स्वयमसंवेदनात्* अर्थनिष्ठमेव फलं न स्वनिष्ठमित्यर्थः ॥१९॥

ननु माभूद्बुद्धेः स्वयं ग्रहणं बुद्ध्यन्तरेण तु भविष्यति इत्याशङ्क्याह।

चित्तान्तरदृश्ये बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसङ्करश्च ॥२०॥

यदि हि बुद्धिर्बुद्ध्यन्तरेण संवेद्यते तदा सापि बुद्धिः स्वयमबुद्धा बुद्ध्यन्तरं प्रकाशयितुमसमर्थेति तस्या ग्राहकं बुद्ध्यन्तरं कल्पनीयं तस्या अप्यन्यदित्यवनवस्थानात् पुरुषायुषेणाप्यर्थप्रतीतिर्न स्यात्। नहि प्रतीतावप्रतीतायामर्थः प्रतीतो भवति। स्मृतिसङ्करश्च प्राप्नोति। रूपे रसे वा समुत्पन्नायां बुद्धौ तद्ग्राहिकाणामनन्तानां बुद्धीनामुत्पत्तेर्बुद्धिजनितैः संस्कारैर्बहवो वाह्यस्मृतयः क्रियन्ते, तदार्थबुद्धेरपर्य्यवसनाद् बुद्धिस्मृतीनां युगपदुत्पत्तेः कस्मिन्नर्थे स्मृतिरियमुत्पन्नेति ज्ञातुमशक्यत्वात् 'स्मृतिसङ्करः',† स्यादियं रूपस्मृतिरियं रसस्मृतिरिति न ज्ञायेत ॥ २० ॥

---

* स्वरूपसंवेदनाभावादिति C पुस्तकपाठः।

† स्मृतीनां सङ्कर इति F पुस्तकपाठः।

Digitized by Google

ननु बुद्धेः स्वप्रकाशत्वाभावे बुद्ध्यन्तरेण चासंवेदने कथमयं विषयसंवेदनरूपो व्यवहार इत्याशङ्क्य स्वसिद्धान्तमाह।

चितेरप्रतिसङ्क्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनं ॥२१॥

पुरुषशक्तिरूपत्वात् 'चितिः', सा 'अप्रतिसङ्क्रमा, न विद्यते प्रतिसङ्क्रमोऽन्यत्र गमनं यस्याः सा तथोक्ता अन्येनासङ्कीर्णेति यावत्। यथा गुणा अङ्गाङ्गिभावलक्षणे* परिणामे अङ्गित्वं गुणिनमुपसंक्रामन्ति तद्रूपतामिवापद्यन्ते, यथा वा लोके परमाणवः प्रसरन्तो विषयमारोपयन्ति नैवं चितिशक्तिः, तस्याः सर्व्वदैकरूपतया स्वप्रतिष्ठितत्वेन व्यवस्थितत्वात्। अतस्तत्सन्निधाने यदा बुद्धिस्तदाकारतामापद्यते चेतनेवोपजायते, बुद्धिवृत्तिप्रतिसङ्क्रान्ता च यदा चिच्छक्तिः बुद्धिवृत्त्यवच्छिन्नतया† संवेद्यते तदा बुद्धेः स्वस्यात्मनो वेदनं सम्भवतीत्यर्थः॥ २१ ॥

इत्थं स्वसंविदितं चित्तं सर्व्वार्थग्रहणसामर्थ्येन सकलव्यवहारक्षमं भवतीत्याह।

द्रष्टृ-दृश्योपरक्तं चित्तं सर्व्वार्थं ॥ २२ ॥

'द्रष्टा' पुरुषः, तेन 'उपरक्तं' तत्सन्निधाने तद्रूपतामिवापन्नं,‡ 'दृश्योपरक्तं' गृहीतविषयाकारपरिणामं, यदा भवति तदा तदेव सर्व्वार्थग्रहणसमर्थं जायते। यथा निर्म्मलस्फटिकदर्पणाद्येव प्रतिबिम्बग्रहणसमर्थं एवं रजस्तमोभ्यामनभिभूतं सत्त्वं प्रौढत्वाच्छिच्छाया-

---

* अङ्गाङ्गिभावगमनलक्षणे इति F पुस्तकपाठः।

† बुद्धिवृत्तिविशिष्टतया इति F पुस्तकपाठः।

‡ तद्रूपतामिव प्राप्तमिति F पुस्तकपाठः।

Digitized by Google

ग्रहणसमर्थं भवति, न पुनरशुद्धत्वाद्रजस्तमसी। तत् न्यग्भूत-रजस्तमोरूपमक्लिष्टतया सत्त्वं निस्तरङ्गप्रदीपशिखाकारं सदैवैकरूपतया परिणममाणं चिच्छायायाग्रहणसामर्थ्यादामोक्षप्राप्तेरवतिष्ठते। यथा अयस्कान्तसन्निधाने लौहस्य चलनमाविर्भवति, एवं चिद्रूपसन्निधाने सत्त्वस्याभिव्यङ्ग्यमभिव्यज्यते चैतन्यं। अत एवास्मिन् दर्शने द्वे चिच्छक्ती नित्योदिताऽभिव्यङ्ग्या च। नित्योदिता चिच्छक्तिः पुरुषः। तत्सन्नि-धानादभिव्यक्तचैतन्यं सत्त्वमभिव्यङ्ग्या चिच्छक्तिः। तदत्यन्तं सन्निहित-त्वादन्तरङ्गं पुरुषस्य भोग्यतां प्रतिपद्यते। तदेव आगन्तवस्त्ववादिभिः बाह्यैः पुरुषस्य परमात्मनोऽधिष्ठेयं कर्मानुरूपसुखदुःखभोक्तृतया व्यप-दिश्यते। यत्त्वत्यन्तानुद्रिक्तत्वादेकस्यापि गुणस्य, कदाचित्कस्यचिद्वृ-त्तावन्यगुणं प्रतिक्षणं परिणममानं सुख-दुःख-मोहात्मकं न निर्भासं, तत्तस्मिन् कर्मात्मरूपे शुद्धे सत्त्वे स्वाकारसमर्पणद्वारेण संवेद्यता-मापादयति। तच्छुद्धमाद्यं चित्तसत्त्वमेकतः प्रतिसंक्रान्तचिच्छायमन्यतो गृहीतविषयाकारेण चित्तेनोपढौकितस्वाकारं चित्तसंक्रान्तिबलाच्चेत-नायमानं वास्तवचैतन्याभावेऽपि सुख-दुःखरूपभोगमनुभवति। स एव भोगोऽत्यन्तसान्निध्येन विवेकाग्रहणाद्भोक्तुरपि पुरुषस्य भोग इति व्यप-दिश्यते। अनेनाभिप्रायेण विन्ध्यवासिनोक्तं। "सत्त्वतत्त्वमेव पुरुष-तत्त्वं" इति। अन्यत्रापि "बिम्बे प्रतिबिम्बमानच्छायासदृशच्छायान्त-रोद्भवः प्रतिबिम्बशब्देनोच्यते। एवं सत्त्वेऽपि पौरुषेयचिच्छायासदृश-चिच्छायान्तराभिव्यक्तिः प्रतिसङ्क्रान्तिशब्दार्थः"*। ननु प्रतिबिम्बनं

* प्रतिबिम्बशब्दार्थ इति C पुस्तकपाठः। चिच्छायाशब्दार्थ इति H पुस्तकपाठः।

Digitized by Google

सूचाणां सूची।

	सूत्रे	पादे	सूत्रं
अतीतानागतमित्यादि	९९	४	१२
अथ योगानुशासनं	१	१	१
अनित्याशुचीत्यादि	३३	२	५
अनुभूतविषयेत्यादि	७	१	११
अपरिग्रहस्थैर्यं इत्यादि	५२	२	३९
अभावप्रत्ययेत्यादि	७	१	१०
अभ्यासवैराग्येत्यादि	८	१	१२
अविद्याक्षेत्रेत्यादि	३	२	४
अविद्यास्मितेत्यादि	३	२	६
अहिंसाप्रतिष्ठायामित्यादि	५१	२	३७
अहिंसासत्यास्तेयेत्यादि	५१	२	३५
अहिंसासत्यास्तेयेत्यादि	५७	२	३०
ईश्वरप्रणिधानाद्वा	१५	१	२३
उदानजयाज्जलेत्यादि	८०	३	३९
ऋतम्भरा तत्र प्रज्ञा	२८	१	४८
एकतत्त्वे चेन्द्रियाणां संयमा-			
दवधानं	१०१	४	१९
एतयैव सविचारेत्यादि	२९	१	४४
एवं आत्मनिवेदनेत्यादि	४७	२	३१
एवेन भूतेन्द्रियेत्यादि	६५	३	१३
कण्ठकूपे क्षुत्पिपासानिवृत्तिः	७५	३	३०
कर्माशुक्लाकृष्णमित्यादि	९३	४	७
कायरूपसंयमादित्यादि	७०	३	२१
कायाकाशयोरित्यादि	८१	३	४१

	सूत्रे	पादे	सूत्रं
कायेन्द्रियसिद्धिरित्यादि	५३	२	४३
किञ्च स्वाध्यायादित्यादि	५२	२	४१
कूर्मनाड्यां स्थैर्यं	७५	३	३१
कृतार्थं प्रतीत्यादि	५२	२	२२
क्रमान्यत्वं परिणामान्यत्वे			
हेतुः	९९	३	१५
क्लेशकर्मविपाकेत्यादि	१५	१	२४
क्लेशमूलः कर्माशयश्चेत्यादि	२९	२	१२
क्षणतत्क्रमयोरित्यादि	८७	३	५२
क्षणप्रतियोगीत्यादि	१११	४	३२
क्षीणवृत्तेरभिजातस्येव-			
त्यादि	२५	१	४१
ग्रहणस्वरूपेत्यादि	८४	३	४७
गले तारावूटश्चानं	७४	३	२७
चित्तेरप्रतिसङ्क्रमायाः			
इत्यादि	१०२	४	२१
चित्तान्तरदृश्येत्यादि	१०२	४	२०
जन्मौषधिमन्त्रतपःइत्यादि	९०	४	१
जातिदेशकालेत्यादि	९४	४	९
जातिलक्षणेत्यादि	८७	३	५३
जात्यन्तरपरिणाम इत्यादि	९१	४	२
तच्छिद्रेष्वित्यादि	१०९	४	२९
तज्जाः संस्कार इत्यादि	२९	१	५०
तज्जयपक्षदर्शनाच्चं	१८	१	२८

Digitized by Google

	सूत्रे, पादे, सूत्रं।		
ततश्चयात् प्रज्ञालोकः	११	२	५
ततः कृतार्थानामित्यादि	१११	४	२१
ततः क्लेशकर्म्मनिवृत्तिः	११०	४	२९
ततः क्षीयते प्रकाशावरणं	५०	२	५२
ततः परमा वश्यतेन्द्रियाणां	५८	२	५५
ततः प्रत्यक्चेतनेत्यादि	१८	१	२९
ततः प्रातिभश्रावणेत्यादि	७८	२	२५
ततोऽणिमादिप्रादुर्भाव इत्यादि	८२	२	४५
ततो द्वन्द्वानभिघातः	५१	२	४८
ततो मनोजवित्वमित्यादि	८४	२	४८
ततस्तद्विपाकेत्यादि	९२	४	८
तत्परं पुरुषख्यातेरित्यादि	१०	१	१६
तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः	२१	१	३२
तत्र ध्यानजमनाशयं	९२	४	६
तत्र निरतिशयं सर्व्वज्ञबीजं	१०	१	२५
तत्र प्रत्ययैकतानता ध्यानं	९०	२	२
तत्र श्रद्धोत्यादि	९१	२	१४
तत्र स्थितौ यत्नोऽभ्यासः	९	१	१३
तत्र स्थिरसुखमासनं	५५	२	४६
तदपि बहिरङ्गं निर्बीजस्य	९२	२	८
तदभावात् संयोगाभावः इत्यादि	५५	२	२५
तदर्थ एव दृश्यस्यात्मा	५२	२	२१
तदसंख्येयवासनाभिरित्यादि	१०७	४	२२
तदा द्रष्टुरित्यादि	४	१	३
तदा विवेकनिम्नमित्यादि	१०८	४	२५

	सूत्रे, पादे, सूत्रं।		
तदा सर्व्वावरणमलेत्यादि	११०	४	३०
तदुपरागापेक्षित्वादि- त्यादि	१००	४	१९
तद्दैवार्थमार्थनिर्भासमित्यादि	९१	२	३
तद्दैराग्यादपीत्यादि	८५	२	५०
तपः स्वाध्यायेश्वरेत्यादि	२१	२	१
तस्य प्रशान्तवाहितासंस्कारात्	९२	२	१०
तस्य भूमिषु विनियोगः	९२	२	९
तस्य वाचकः प्रणवः	१८	१	२७
तस्य वशत्वेत्यादि	५५	२	२७
तस्य हेतुरविद्या	५३	२	२४
तस्यापि निरोधे इत्यादि	२९	१	५१
तस्मिन् सति श्वासेत्यादि	५९	२	४९
ता एव सबीजः समाधिः	२७	१	४६
तारकं सर्व्वविषयमित्यादि	८८	३	५४
तासामनादित्वमित्यादि	९५	४	१०
तीव्रसंवेगानामासन्नः	१४	१	२१
ते प्रतिप्रसवहेयाः सूक्ष्माः	२५	२	१०
ते व्युत्थाननिरुद्धाभिभवः	९७	४	१३
ते समाधावुपसर्गा इत्यादि	७८	२	२७
ते ह्लादपरितापफला इत्यादि	२८	२	१४
त्रयमन्तरङ्गं पूर्व्वेभ्यः	९२	३	७
त्रयमेकत्र संयमः	९१	३	४
दुःखदौर्म्मनस्येत्यादि	२०	१	३१
दुःखानुशयी द्वेषः	२४	२	८
दृग्दर्शनेत्यादि	२४	२	९

Digitized by Google

	पृष्ठे,	पादे,	सूत्रं।
दृष्टानुश्रविकेत्यादि	९	१	१५
देशबन्धश्चित्तस्य धारणा	६०	२	१
ध्रुवे तद्गतिज्ञानं इत्यादि	४१	२	२०
ध्रुवे दृष्टिमात्र इत्यादि	४०	२	१७
ध्रुवतारकव्यूहज्ञानमित्यादि	१०६	४	२९
धारणासु च योग्यता मनसः	५८	२	५३
ध्यानहेयास्तद्वृत्तयः	६६	२	११
नाभिचक्रे कायव्यूहज्ञानं	७४	२	२८
निमित्तमप्रयोजकेत्यादि	९१	४	३
निर्माणचित्तान्यस्मिता-मात्रात्	९२	४	४
निर्विचारवैशारद्ये इत्यादि	२७	१	४७
परमाणुपरममहत्त्वान्त इत्यादि	२४	१	४०
परिणामतापसंस्कारेत्यादि	२८	२	१५
परिणामत्रयेत्यादि	९७	२	१६
परिणामैकत्वाद्वस्तुतत्त्वं	९८	४	१४
पुरुषार्थशून्यानामित्यादि	१११	४	३३
प्रकाशक्रियेत्यादि	४०	२	१८
प्रच्छर्दनविधारणाभ्यामि-त्यादि	२२	१	३४
प्रत्यक्षानुमानेत्यादि	६	१	७
प्रत्ययस्य परचित्तज्ञानं	७०	३	१९
प्रमाणविपर्ययेत्यादि	६	१	६
प्रयत्नशैथिल्येत्यादि	५५	२	४७
प्रवृत्तिभेदप्रयोजकमित्यादि	९२	४	५
प्रवृत्त्यालोकन्यासादित्यादि	७३	२	२५
प्रसंख्यानेऽप्यकुसीदस्य-त्यादि	११०	४	२८
प्रातिभाद्वा सर्वं	७१	३	३३
बन्धकारणशैथिल्यादि-त्यादि	७९	२	३८
बलेषु हस्तिबलादीनि	७३	२	२४
ब्रह्मचर्यप्रतिष्ठायां वीर्य-लाभः	५१	२	३८
भवप्रत्ययो विदेहेत्यादि	१३	१	१९
भुवनज्ञानं सूर्ये संयमात्	७३	२	२१
मूर्धज्योतिषि सिद्धदर्शनं	७१	३	३२
मृदुमध्येत्यादि	१५	१	२२
मैत्रीकरुणेत्यादि	२१	१	३३
मैत्र्यादिषु बलानि	७२	३	२३
यथाभिमतध्यानाद्वा	२४	१	३९
यमनियमासनेत्यादि	४९	२	२९
योगश्चित्तवृत्तिनिरोधः	२	१	२
योगाङ्गानुष्ठानेत्यादि	४१	२	२८
रूपलावण्येत्यादि	८४	३	४९
वस्तुसाम्ये इत्यादि	९८	४	१५
वहिरकल्पितेवृत्तिर्महाविदेहेत्यादि	८१	३	४३
वाक्सिद्धिवाग्वाक्यप्रतिभाश्रवणवेदनादर्शास्वादवार्ता जायन्ते इत्यादि	५७	२	५१
वितर्कबाधने इत्यादि	४९	२	३३
वितर्कविचारानन्देत्यादि	१०	१	१७
वितर्कोहिंसादय इत्यादि	४९	२	३४
विपर्ययो मिथ्याज्ञानेत्यादि	६	१	८
विरामप्रत्ययाभ्यासेत्यादि	११	१	१८
विवेकख्यातिरविप्लवेत्यादि	४४	२	२६

Digitized by Google

	अष्ठे,	पादे,	सूत्रं।
विशेषदर्शिन इत्यादि	१०८	४	२४
विशेषाविशेषेत्यादि	४१	१	१८
विशोका वा ज्योतिष्मती	२२	१	३६
विषयवती वेत्यादि	२२	१	३५
वीतरागविषयं वा चित्तं	२२	१	३७
वृत्तयः पञ्चतय्य इत्यादि	५	१	५
वृत्तिसारूप्यमितरत्र	५	१	४
व्याधिस्त्यानेत्यादि	१८	१	३०
व्युत्थाननिरोधेत्यादि	५१	३	९
शब्दज्ञानानुपातीत्यादि	७	१	६
शब्दार्थज्ञानेत्यादि	२५	१	४२
शब्दार्थप्रत्ययेत्यादि	५८	३	१७
शान्तोदिताव्यपदेश्यैत्यादि	५४	३	१२
शौच-सन्तोषेत्यादि	४८	२	३२
श्रोत्रात्कायाकाशयोरित्यादि	५२	२	४०
श्रद्धा-वीर्य्य-स्मृतीत्यादि	१४	१	२०
श्रुतानुमानेत्यादि	२८	१	४९
षोडशकार्य्येरित्यादि	८१	३	४१
संस्कारसाक्षात्करणात्-इत्यादि	१९	२	१८
स एष पूर्वेषामपीत्यादि	२७	१	२६
सति मूले इत्यादि	४७	२	१३
स तु दीर्घकालेत्यादि	९	१	१४
स तु सत्कारासेवनेत्यादि	४६	२	६०
सत्यप्रतिष्ठायामित्यादि	५६	२	३९
सत्त्वपुरुषयोरत्यन्तेत्यादि	७७	३	३५
सत्त्वपुरुषयोरित्यादि	८८	३	५५
सत्त्वपुरुषान्यतेत्यादि	८५	३	४९
सदाराधनाविधिष्वप्रत्यादि	१००	४	१७
सन्तोषादनुत्तमः सुखलाभः	५२	२	४२
समाधिभावनार्थः इत्यादि	३१	२	२
समाधिसिद्धीरित्यादि	५४	२	४५
समानजयात् प्रज्वलनं	८०	३	४०
सर्व्वार्थतैकाग्रतयोरित्यादि	६४	३	११
सुखानुशयी रागः	२४	२	७
सूक्ष्मविषयत्वेत्यादि	२०	१	४५
सोपक्रमं निरुपक्रमञ्चेत्यादि	७१	२	२२
स्थान्युपनिमन्त्रणे इत्यादि	५१	२	५१
स्थूलस्वरूपेत्यादि	८२	३	४४
स्मृतिपरिशुद्धौत्यादि	२१	१	४३
स्वप्ननिद्रेत्यादि	२४	१	२८
स्वरसवाही विदुषोऽपि-त्यादि	२५	२	९
स्वविषयासम्प्रयोगा-भाव इत्यादि	५८	२	५४
स्वाङ्गाभिघातेरित्यादि	४३	२	२३
स्वाध्यायादिष्टदेवते-त्यादि	५४	२	४४
हानमेषां क्लेशवदुक्तं	१०९	४	२१
हृदये चित्तसंवित्	७१	३	२४
हेतुफलाश्रयालम्बनैरि-त्यादि	९९	४	१२
हेयं दुःखमनागतं	२९	२	१६

Digitized by Google

नामानिर्म्मलस्य नियतपरिणामस्य* निर्म्मले दृष्टं, यथा मुखस्य दर्पणे। अत्यन्तनिर्म्मलस्य व्यापकस्य अपरिणामिनः पुरुषस्य तस्मादनिर्म्मले सत्त्वे कथं प्रतिविम्बनमुपपद्यते। उच्यते। प्रतिविम्बनस्य स्वरूपमनवधारयता भवतेदमभ्यधायि। यैव सत्त्वगताया अभिव्यञ्जायाश्चिच्छक्तेः पुरुषस्य सान्निध्यादभिव्यक्तिः सैव प्रतिविम्बनमुच्यते। यादृशी पुरुषगता चिच्छक्तिस्तच्छाया तत्सत्त्वाविर्भवति। यदणुकममध्यमानिर्म्मलः पुरुषः कथमनिर्म्मले सत्त्वे प्रतिसंक्रामतीति तदप्यनैकान्तिकं। नैर्म्मल्यादपकृष्टेऽपि जलादौ† आदित्यादयः प्रतिसंक्रान्ता: समुपलभ्यन्ते। यदणुकमपरिच्छिन्नस्य नास्ति प्रतिसंक्रान्तिरिति तदप्ययुक्तं। व्यापकस्याकाशस्य दर्पणादौ प्रतिसंक्रान्तिदर्शनात्। एवं सति न काचिदनुपपत्तिः प्रतिविम्बदर्शनस्य॥

ननु सात्त्विकपरिणामरूपे बुद्धिसत्त्वे पुरुषसन्निधानादभिव्यञ्जायाश्चिच्छक्तेर्योऽयमाकारसंक्रान्तौ पुरुषस्य सुखदुःखरूपो भोग इत्युक्तं तदनुपपन्नं, तदेव चित्तसत्त्वं प्रकृतावपरिणतायां कथं सम्भवति, किमर्थश्च तस्याः परिणामः। तथोच्यते‡। पुरुषस्यार्थोपभोगसम्पादनं तया कर्त्तव्यमतः पुरुषार्थकर्त्तव्यतया तस्या युक्त एव परिणामः॥

नन्वनुपपन्नं पुरुषार्थकर्त्तव्यताया एवानुपपत्तेः। पुरुषार्थो मया कर्त्तव्य इत्येवंविधोऽध्यवसायः पुरुषार्थकर्त्तव्यतोच्यते, जडायास्तु प्रकृतेः कथमेवंविधोऽध्यवसायः। अस्ति चेदध्यवसायः, कथं जडत्वं।

---

* नियतपरिमाणस्येति C पुस्तकपाठः।

† तदाभासादिति C पुस्तकपाठः।

‡ अथोच्यत इति C पुस्तकपाठः।

Digitized by Google

अत्रोच्यते। अनुलोमप्रतिलोमलक्षणे परिणामद्वये सहजं शक्तिद्वयमस्ति, तदेव पुरुषार्थकर्त्तव्यतोच्यते। सा च शक्तिरचेतनायाः प्रकृतेः सहजा एव। तत्र महदादिमहाभूतपर्य्यन्तोऽस्या बहिर्मुखतयानुलोमः परिणामः। पुनः स्वकारणानुप्रवेशद्वारेणाव्यक्तान्तः प्रतिलोमः परिणामः। इत्थं पुरुषस्य भोगपरिसमाप्तेः सहजशक्तिद्वयत्वात् कृतार्था प्रकृतिर्न पुनः परिणाममारभते। एवं विधायाश्च पुरुषार्थकर्त्तव्यतायां जडाया अपि प्रकृतेर्न काचिदनुपपत्तिः॥

ननु यदीदृशी शक्तिः सहजैव प्रधानस्यास्ति तत् किमर्थं मोक्षार्थिभिः* मोक्षाय यत्नः क्रियते, मोक्षस्य चानर्थनीयत्वे तदुपदेशकस्य शास्त्रस्यानर्थक्यं। उच्यते। योऽयं प्रकृतिपुरुषयोरनादिर्भोग्यभोक्तृभावलक्षणः सम्बन्धः, तस्मिन् सति व्यक्तचेतनायाः प्रकृतेः कर्त्रात्माभिमानात् दुःखानुभवे सति कथमियं दुःखनिवृत्तिरात्यन्तिकी मम स्यादिति भवत्येवाध्यवसायः। अतो दुःखनिवृत्त्युपायोपदेशकशास्त्रोपदेशापेक्षात्रैव प्रधानस्य। तथाभूतमेव कर्म्मानुरूपं बुद्धिसत्त्वं† शास्त्रोपदेशस्य विषयः। दर्शनान्तरेष्वप्येवंविध एवाविद्यास्वभावः शास्त्रेऽधिक्रियते। स च मोक्षाय प्रयतमान एवंविधमेव शास्त्रोपदेशं सहकारिणमपेक्ष्य मोक्षाख्यं फलमासादयति। सर्व्वाण्येव कार्य्याणि प्राप्तायां सामग्र्यां‡ आत्मानं लभन्ते, अस्य च प्रतिलोमपरिणामद्वारेणैवोत्पाद्यस्य मोक्षाख्यस्य कार्य्यस्य ईदृश्येव सामग्री प्रमाणेन निश्चिता, प्रकारान्तरेणानुपपत्तेः। अतस्तां विना कथं

* तदर्थिभिरिति F पुस्तकपाठः।
† कर्म्मात्मरूपं बुद्धिसत्त्वमिति C पुस्तकपाठः।
‡ समग्रायां सामग्र्यामिति F पुस्तकपाठः।

Digitized by Google

भवितुमर्हति। अतः स्खितमेतत्। संक्रान्तविषयोपरागमभिव्यक्तचिच्छायं बुद्धिसत्त्वं विषयनिश्चयद्वारेण समर्थं लोकयात्रां निर्व्वाहयतीत्येवंविधमेव चित्तं पश्यन्तो भ्रान्ताः स्वसंवेदनं चित्तं, चित्तमात्रञ्च जगदित्येवं ब्रुवाणाः प्रतिबोधिता भवन्ति ॥२२॥

ननु यद्येवंविधादेव चित्तात् सकलव्यवहारनिष्पत्तिः* कथं प्रमाणशून्यो द्रष्टा अभ्युपपद्यते† इत्याशङ्क्य द्रष्टुः‡ प्रमाणमाह।

तदसङ्ख्येयवासनाभिश्चित्रमपि§ परार्थं संहत्यकारित्वात् ॥ २३ ॥

'तत्' एतच्चित्तं, 'असङ्ख्यातुमशक्याभिः, 'वासनाभिः', 'चित्रमपि' नानारूपमपि, 'परार्थं' परस्य स्वामिनो भोक्तुर्भोगापवर्गलक्षणमर्थं साधयतीति। कुतः, 'संहत्यकारित्वात्' संहत्य सम्भूय मिलित्वा अर्थक्रियाकारित्वात्। यच्च संहत्यार्थक्रियाकारि तत्परार्थं दृष्टं, यथा शयनासनादि। सत्त्व-रजस्तमांसि च चित्तलक्षणपरिणामभाञ्जि संहत्यकारीणि, अतः परार्थानि। यस्य परः स पुरुषः ॥

ननु च यादृशेनाशयनासनादिना परेण शरीरवता परार्थत्वमुपलब्धं,‖ तद्दृष्टान्तबलेन तादृश एव परः सिध्यति, यादृशस्य भवतां परोऽसंहतरूपोऽभिप्रेतस्तद्विपरीतस्य सिद्धेरयमिष्टविघातकृद्धेतुः¶। उच्यते।

---

* सकलव्यवहारनिर्वृत्तिरिति C पुस्तकपाठः।

† अभ्युपगम्येत इति C. अभ्युपगन्तव्य इति F पुस्तकपाठः।

‡ द्रष्टरीति C पुस्तकपाठः।

§ चित्तमपीति C पुस्तकपाठः। परन्त्वयं न समीचीनः।

‖ पारार्थ्यमुपलब्धमिति F पुस्तकपाठः।

¶ अयमिष्टविघातको हेतुरिति C पुस्तकपाठः।

Digitized by Google

यद्यपि सामान्येन परार्थत्वमात्रे व्याप्तिर्गृहीता तथापि सत्त्वादि-विलक्षणधर्मिपर्यालोचनया तद्विलक्षण एव भोक्ता परः सिध्यति। यथा सेन्धनाद्दते ऽग्निरिति विलक्षणाद्धूमादग्निरनुमीयमान इतरवह्निविलक्षणसेन्धनप्रभव एव प्रतीयते, एवमिहापि विलक्षणस्य सत्त्वाख्यस्य भोग्यस्य परार्थत्वेऽनुमीयमाने तथाविध एव भोक्ताऽधिष्ठाता परस्मिन्नाचरूपोऽवश्यं सिध्यति। यदि वा तस्य परत्वं सर्वोत्कृष्टत्वमेव प्रतीयते, तथापि तामसेभ्यो विषयेभ्यः प्रख्यते शरीरं प्रकाशरूपेन्द्रियाश्रयात्वात्। तस्मादपि प्रख्यन्ते इन्द्रियाणि। ततोऽपि प्रख्यं सत्त्वं प्रकाशरूपं। तथापि यः प्रकाशकः प्रकाशविलक्षणः स चिद्रूप एव भवतीति कूटस्थस्य संहतत्वं ॥ २३ ॥

इदानीं शास्त्रफलं कैवल्यं निर्णेतुं दशभिः सूत्रैरुपक्रमते।

विशेषदर्शिन आत्मभावभावनानिवृत्तिः ॥ २४ ॥

एवं सत्त्वपुरुषयोरन्यत्वे साधिते* यस्तयोर्विशेषं पश्यति अयमस्मादन्य इत्येवंरूपं,† तस्य विज्ञातचित्तसत्त्वस्वरूपस्य चित्ते या 'आत्मभावभावना', सा निवर्त्तते। चित्तमेव कर्त्तृ स्याद् भोक्तृ इत्यभिमानो निवर्त्तते ॥ २४ ॥

तस्मिन् सति किं भवतीत्याह।

तदा विवेकनिम्नं कैवल्यप्राग्भारं‡ चित्तं ॥ २५ ॥

---

* प्रतिपादिते इति C पुस्तकपाठः।

† अहमस्मादन्य इत्येवंरूपमिति C पुस्तकपाठः।

‡ कैवल्यप्रभावमिति F पुस्तकपाठः।

Digitized by Google

यदस्याज्ञाननिम्नं बहिर्मुखं विषयोपभोगफलं चित्तमासीत्तदिदानीं 'विवेकनिम्नं'* विवेकमार्गमज्जनमुखं, 'कैवल्यप्राग्भारं' कैवल्यफलं, कैवल्यप्रारम्भं वा सम्पद्यत इति ॥ २५ ॥

अस्मिंश्च† विवेकवाहिनि चित्ते येऽन्तराया: प्रादुर्भवन्ति तेषां हेतुप्रतिपादनद्वारेण त्यागोपायमाह।

तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः ॥ २६ ॥

तस्मिन् समाधौ स्थितस्य, 'छिद्रेषु' अन्तरालेषु, यानि 'प्रत्ययान्तराणि' व्युत्थानरूपाणि ज्ञानानि, तानि प्राग्भवेभ्यः‡ व्युत्थानानुभवजेभ्यः 'संस्कारेभ्यः', अहं ममेत्येवंरूपाणि क्षीयमाणेभ्योऽपि प्रभवन्ति। अन्तःकरणोच्छित्तिद्वारेण तेषां हानं कर्त्तव्यमित्युक्तं भवति ॥ २६ ॥

हानोपायस्य पूर्व्वमेवोक्तत्वादाह।

हानमेषां क्लेशवदुक्तं ॥ २७ ॥

यथा 'क्लेशानामविद्यादीनां, हानं पूर्व्वमुक्तं, तथा संस्कारणामपि कर्त्तव्यं। यथा ते ज्ञानाग्निना सुष्ठा दग्धबीजकल्पा न पुनश्चित्तभूमौ प्ररोहं लभन्ते, तथा संस्कारा अपि ॥ २७ ॥

एवं प्रत्ययान्तरानुदये स्थिरीभूते§ समाधौ यादृशस्य योगिनः समाधेः प्रकर्षप्राप्तिर्भवति, तथाविधमुपायमाह¶।

---

* विवेकविवग्रमिति E पुस्तकपाठः।

† तस्मिंश्चेति F पुस्तकपाठः।

‡ प्राक्तनेभ्य इति H पुस्तकपाठः।

§ स्थिरीकृत इति F पुस्तकपाठः।

¶ एतत्पाठः सर्व्वत्र वर्त्तते, परन्तु उपायमिति न समीचीनं यादृशस्य योगिन इति पाठेन सह विरुद्धत्वात्।

Digitized by Google

प्रसङ्ख्यानेऽप्यकुसीदस्य सर्व्वथा विवेकख्यातेर्धर्म्ममेघः समाधिः ॥ २८ ॥

'प्रसङ्ख्यानं' यावतां तत्त्वानां यथाक्रमं व्यवस्थितानां परस्परविलक्षणस्वरूपविभावनं, तस्मिन् सति 'अपि', 'अकुसीदस्य' फलमक्षिप्तोः, प्रत्ययान्तराणामनुदये 'सर्व्वप्रकारविवेकख्यातेः' परिशेषात् 'धर्म्ममेघः समाधिः' भवति, प्रकृष्टमशुक्लकृष्णं धर्म्मं परमपुरुषार्थसाधकं मेहति सिञ्चतीति 'धर्म्ममेघः'। अनेन प्रकृष्टधर्म्मस्यैव ज्ञानहेतुत्वमित्युपपादितं भवति ॥ २८ ॥

तस्माद्धर्म्ममेघात् किं भवतीत्याह* ।

ततः क्लेशकर्म्मनिवृत्तिः ॥ २९ ॥

'क्लेशानामविद्यादीनामभिनिवेशात्मानां, 'कर्म्मणाञ्च शुक्लादिभेदेन त्रिविधानां, ज्ञानोदयात् पूर्व्वपूर्व्वकारणनिवृत्त्या 'निवृत्तिः', भवतीत्यर्थः ॥ २९ ॥

निवृत्तेषु तेषु किं भवतीत्याह ।

तदा सर्व्वावरणमलापेतस्य ज्ञानस्यानन्त्याज्ज्ञेयमल्पं ॥ ३० ॥

आव्रियते चित्तमेभिरिति 'आवरणानि' क्लेशाः, त एव 'मलाः', तेभ्यः 'अपेतस्य' तद्विरहितस्य, 'ज्ञानस्य' गतघनगगनमिभस्य, 'आन-

---

* भवतीत्यत आहेति C पुस्तकपाठः ।

Digitized by Google

ज्यात्' अनवच्छेदात्, 'ज्ञेयं', 'अल्पं' गणनास्पदं भवति, अक्लेशेनैव सर्व्वं ज्ञेयं जानातीत्यर्थः ॥ ३० ॥

ततः किमित्याह ।

ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानां ॥ ३१ ॥

'कृतः' निष्पादितः, भोगापवर्गलक्षणः पुरुषार्थः प्रयोजनं यैस्ते 'कृतार्थाः', 'गुणाः' सत्त्व-रजस्तमांसि, तेषां 'परिणामः' आ पुरुषार्थ-समाप्तेरानुलोम्येन प्रातिलोम्येन चाङ्गाङ्गिभावावस्थितिलक्षणः, तस्य योऽसौ 'क्रमः' वक्ष्यमाणः, तस्य 'परिसमाप्तिः' निष्ठा, न पुनरुद्भव इत्यर्थः ॥ ३१ ॥

क्रमस्योक्तस्य लक्षणमाह ।

क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः ॥३२॥

'क्षणः' अल्पीयान् कालः, तस्य योऽसौ 'प्रतियोगी' एकक्षणवि-लक्षणः। 'परिणामापरान्तनिर्ग्राह्यः' अनुभूतेषु क्षणेषु पश्चात् सङ्कल-नबुद्ध्या यो गृह्यते स क्षणानां 'क्रमः' उच्यते । न ह्यननुभूतेषु क्षणेषु क्रमः परिग्रहीतुं शक्यः ॥ ३२ ॥

इदानीं फलभूतस्य कैवल्यस्यासाधारणं स्वरूपमाह ।

पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूप-प्रतिष्ठा वा चितिशक्तिरिति ॥ ३३ ॥

समाप्तभोगापवर्गलक्षणपुरुषार्थानां 'गुणानां', यः 'प्रतिप्रसवः'

Digitized by Google

प्रसङ्ख्यानेऽप्यकुसीदस्य सर्व्वथा विवेकख्यातेर्धर्म्ममेघः समाधिः ॥ २८ ॥

'प्रसङ्ख्यानं' यावतां तत्त्वानां यथाक्रमं व्यवस्थितानां परस्परविलक्षणस्वरूपविभावनं, तस्मिन् सति 'अपि', 'अकुसीदस्य' फलमभिप्रेतः, प्रत्ययान्तराणामनुदये 'सर्व्वप्रकारविवेकख्यातेः' परिशेषात् 'धर्म्ममेघः समाधिः' भवति, प्रकृष्टमशुक्लकृष्णं धर्म्मं परमपुरुषार्थसाधकं मेहति सिञ्चतीति 'धर्म्ममेघः'। अनेन प्रकृष्टधर्म्मस्यैव ज्ञानहेतुत्वमित्युपपादितं भवति ॥ २८ ॥

तस्माद्धर्म्ममेघात् किं भवतीत्याह* ।

ततः क्लेशकर्म्मनिवृत्तिः ॥ २९ ॥

'क्लेशानामविद्यादीनामभिनिवेशान्तानां, 'कर्म्मणाञ्च शुक्लादिभेदेन त्रिविधानां, ज्ञानोदयात् पूर्व्वपूर्व्वकारणनिवृत्त्या 'निवृत्तिः', भवतीत्यर्थः ॥ २९ ॥

निवृत्तेषु तेषु किं भवतीत्याह ।

तदा सर्व्वावरणमलापेतस्य ज्ञानस्यानन्त्याज्ज्ञेयमल्पं ॥ ३० ॥

आव्रियते चित्तमेभिरिति 'आवरणानि' क्लेशाः, त एव 'मलाः', तेभ्यः 'अपेतस्य' तद्विरहितस्य, 'ज्ञानस्य' गतघनगगननिभस्य, 'ज्ञान-

---

* भवतीत्यत आहेति C पुस्तकपाठः ।

Digitized by Google

ज्यात्' अनवच्छेदात्, 'ज्ञेयं', 'अल्पं' गणनास्पदं भवति, अक्लेशेनैव सर्व्वं ज्ञेयं जानातीत्यर्थः ॥ ३० ॥

ततः किमित्याह ।

ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानां ॥ ३१ ॥

'कृतः' निष्पादितः, भोगापवर्गलक्षणः पुरुषार्थः प्रयोजनं यैस्ते 'कृतार्थाः', 'गुणाः' सत्त्व-रजस्तमांसि, तेषां 'परिणामः' आ पुरुषार्थ-समाप्तेरानुलोम्येन प्रातिलोम्येन चाङ्गाङ्गिभावावस्थितिलक्षणः, तस्य योऽसौ 'क्रमः' वक्ष्यमाणः, तस्य परिसमाप्तिः' निष्ठा, न पुनरुद्भव इत्यर्थः ॥ ३१ ॥

क्रमस्योक्तस्य लक्षणमाह ।

क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः ॥३२॥

'क्षणः' अल्पीयान् कालः, तस्य योऽसौ 'प्रतियोगी' एकक्षणवि-लक्षणः। 'परिणामापरान्तनिर्ग्राह्यः' अनुभूतेषु क्षणेषु पश्चात् सङ्कल-नबुद्ध्या यो गृह्यते स क्षणानां 'क्रमः' उच्यते । न ह्यननुभूतेषु क्षणेषु क्रमः परिज्ञातुं शक्यः ॥ ३२ ॥

इदानीं फलभूतस्य कैवल्यस्यासाधारणं स्वरूपमाह ।

पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूप-प्रतिष्ठा वा चितिशक्तिरिति ॥ ३३ ॥

समाप्तभोगापवर्गलक्षणपुरुषार्थानां 'गुणानां', यः 'प्रतिप्रसवः'

Digitized by Google

प्रतिलोमपरिणामसमाप्तौ विकारानुद्भवः, यदि वा चित्तस्वरूपनिष्ठौ स्वरूपमात्रेणावस्थानं तत् 'कैवल्यं' उच्यते ॥

न केवलमस्माद्दर्शने चेत्थम्: कैवल्यावस्थायामेवभूतचिद्रूपः, यावद्दर्शनान्तरेष्वपि विमृश्यमाण एवंविधरूपोऽवतिष्ठते । तथाहि संसारदशायामात्मा कर्तृत्व-भोक्तृत्वानुसन्धातृत्वमयः प्रतीयते । अन्यथा यद्यमेकः चेत्थम्स्यात्तथाविधो न स्यात्तदा ज्ञानक्षणानामेव पूर्वापरानुसन्धानाभावे* नियतकर्मफलसम्बन्धो न स्यात्, कृतनाशाकृताभ्यागमप्रसङ्गश्च । यदि येनैव शास्त्रोपदिष्टमनुष्ठितं कर्म तस्यैव भोक्तृत्वं भवेत् तदा हिता-हितप्राप्तिपरिहारार्थाः† सर्वस्य प्रवृत्तिर्घटते । सर्वस्यैव व्यवहारस्य ह्यनेपादानलक्षणस्यानुसन्धानेनैव व्याप्तत्वात् ज्ञानक्षणानां परस्परभेदेनानुसन्धानशून्यत्वात् तदनुसन्धानाभावे‡ कस्यचिदपि व्यवहारस्यानुपपत्तेः कर्त्ता भोक्तानुसन्धाता यः स आत्मेति व्यवस्थाप्यते । मोक्षदशायान्तु सकलग्राह्य-ग्राहकलक्षणव्यवहाराभावात् चैतन्यमात्रमेव तस्यावशिष्यते । तच्च चैतन्यं चितिमात्रत्वेनैवोपपद्यते न पुनरात्मसंवेदनेन, यस्माद्विषयग्रहणसमर्थत्वमेव चितेरूपं, नात्मग्राहकत्वं । तथाहि अर्थस्वित्या गृह्यमाणः अयमिति गृह्यते । स्वरूपं गृह्यमाणमहमिति । न पुनर्युगपद्बहिर्मुखतान्तर्मुखतालक्षणव्यापारद्वयं परस्परं विरुद्धं कर्तुं शक्यं । अत एकस्मिन् समये व्यापारद्वयस्य कर्तुमशक्यत्वात् चिद्रूपतयैवावशिष्यते । अतो मोक्षावस्थायां निवृत्ताधिकारेषु गुणेषु

---

* ज्ञानक्षणज्ञानानामेव पूर्वापरानुसन्धानशून्यानां भावे इति C पुस्तकपाठः ।
† हितहितप्राप्तयपरिहारायेति F पुस्तकपाठः ।
‡ अनुसन्धानाभावे इति C पुस्तकपाठः। तदनुसन्धानभाव इति F पुस्तकपाठः।

Digitized by Google

चिन्मात्र एवात्मावतिष्ठत इत्येवं युक्तं। संसारदशायान्तु एवंभूतस्य कर्तृत्वं भोक्तृत्वमनुसन्धातृत्वञ्च सर्व्वमुपपद्यते। तथाहि योऽयं प्रकृत्या महदादिर्नैसर्गिकोऽस्य भोग्य-भोक्तृभावलक्षणः सम्बन्धः अविवेकख्यातिमूलः, तस्मिन् सति पुरुषार्थकर्त्तव्यतारूपप्रक्रियसङ्गावे या महदादिभावेन परिणतिस्तस्यां संयोगे सति यदात्मनोऽधिष्ठातृत्वं चिच्छायासमर्पणसामर्थ्यं, बुद्धिसत्त्वस्य च सङ्क्रान्तचिच्छायाग्रहणसामर्थ्यं, चिदवष्टब्धायास्च बुद्धेर्योऽयं कर्तृत्व-भोक्तृत्वाध्यवसायस्तत एव सर्व्वस्यानुसन्धानपूर्व्वकस्य व्यवहारस्य निष्पत्तेः किमन्यैः फल्गुभिः कल्पनाजालैः।

यदि पुनरेवम्भूतमार्गव्यतिरेकेण पारमार्थिकमात्मनः कर्तृत्वाद्यङ्गीक्रियते, तदास्य परिणामित्वप्रसङ्गः, परिणामित्वाच्चानित्यत्वे तस्यात्मत्वमेव न स्यात्। न ह्येकस्मिन्नेव समये एकेनैव रूपेण परस्परविरुद्धावस्थानुभवः सम्भवति। तथाहि यस्यामवस्थायां आत्मसमवेते समुत्पन्ने सुखे तस्यानुभवित्वं, न तस्यामेवावस्थायां दुःखानुभवित्वं। अतोऽवस्थानानात्वान्नदभिन्नस्यावस्थावतोपि नानात्वं, नानात्वेन च परिणामित्वान्नात्मत्वं नापि नित्यत्वं। अत एव भ्रान्तब्रह्मवादिभिः साङ्ख्यैरात्मनः सदैव संसारदशायां मोक्षदशायाञ्चैकरूपत्वमङ्गीक्रियते।

ये तु वेदान्तवादिनश्चिदानन्दमयत्वमात्मनो मोक्षं मन्यन्ते, तेषां न युक्तः पक्षः। तथाहि आनन्दस्य सुखस्वरूपत्वात् सुखस्य च संवेद्यमानतयैव प्रतिभासात् संवेद्यमानत्वञ्च संवेदनव्यतिरेकेणानुपपन्नमिति संवेद्य-संवेदनयोर्द्वयोरभ्युपगमात् अद्वैतहानिः। अथ सुखात्मकत्वमेव तस्योच्यते। तत् विरुद्धधर्माध्यासादनुपपन्नं। न हि संवेदनं संवेद्यञ्चैकं भवितुमर्हति। किञ्चाद्वैतवादिभिः कर्म्मात्म-परमात्मभेदेनात्मा द्विविध

उच्यते* । तच्च येनैव रूपेण सुख-दुःखभोक्तृत्वं कर्म्मात्मनः, तेनैव रूपेण यदि परमात्मनः स्यात्तदा कर्म्मात्मवत्परमात्मनः परिणामित्वमविद्यास्वभावत्वञ्च स्यात्। अथ न साक्षाद्भोक्तृत्वं, किन्तु तदुपटौकितमुदासीनतयाधिष्ठातृत्वेन स्वीकरोति, तदाप्यहंग्रहोपनानुप्रवेशः। आनन्दरूपता च पूर्व्वमेव निराकृता। किञ्चाविद्यास्वभावत्वे निःस्वभावत्वात् कर्म्मात्मनां कः शास्त्राधिकारी। न तावन्नित्यनिर्मुक्तत्वात् परमात्मा, नाप्यविद्यास्वभावत्वात् कर्म्मात्मा। ततश्च सकलशास्त्रवैयर्थ्यप्रसङ्गः। अविद्यामयत्वे च जगतोऽङ्गीक्रियमाणे कस्याविद्येति विचार्य्यते। न तावत्परमात्मनः नित्यनिर्मुक्तत्वात् विद्यारूपत्वाच्च। कर्म्मात्मनोऽपि निःस्वभावतया शशविषाणप्रख्यत्वे कथमविद्यासम्बन्धः। अथोच्यते एतदेवाविद्याया अविद्यात्वं यदविचारणीयत्वं नाम। यैव हि विचारेण दिनकरकरस्पृष्टनीहारवद्विलयमुपयाति, सैवाविद्येत्युच्यते। मैवं। यदस्तु किञ्चित्कार्य्यं करोति तदवश्यं कुतश्चिद्भिन्नमभिन्नं वा वक्तव्यं, अविद्यायाश्च संसारलक्षणप्रपञ्चकार्य्यकर्त्तृत्वमवश्यमङ्गीकर्त्तव्यं, तस्मिन् सत्यपि यद्यनिर्व्वाच्यत्वमुच्यते, तदा कस्यचिदपि वाच्यत्वं न स्यात् ब्रह्मणोऽप्यवाच्यताप्रसक्तिः। तस्मादधिष्ठातृरूपतान्यतिरेकेण नान्यदात्मनो रूपमुपपद्यते। अधिष्ठातृत्वञ्च चिद्रूपत्वमेव तद्व्यतिरिक्तस्य धर्म्मस्य कस्यचित् प्रमाणानुपपत्तेः।

यैरपि नैयायिकादिभिरात्मा चेतनाद्योगाच्चेतन इत्युच्यते, चेतनापि तस्य मनःसंयोगजा। तथाहि इच्छा-ज्ञान-प्रयत्नादयो गुणास्तस्य

---

* इष्यत इति C पुस्तकपाठः।

व्यवहारदशायां आत्ममनःसंयोगादुत्पद्यन्ते। तैरेव च गुणैः स्वयं ज्ञाता कर्त्ता भोक्तेति व्यपदिश्यते। मोक्षदशायान्तु मिथ्याज्ञाननिवृत्तौ तन्मूलानां दोषाणामपि निवृत्तेरेषां बुद्ध्यादीनां विशेषगुणानामत्यन्तोच्छित्तिः स्वरूपमात्रप्रतिष्ठत्वमात्मनोऽङ्गीकृतं। तेषां न युक्तः पक्षः। यतस्तस्यां दशायां किमात्मन आत्मत्वं। व्यापकत्वादयो गुणा आकाशादीनामपि सन्ति। अतस्तद्वैलक्षण्येनात्मनः किञ्चिद्रूपमवश्यमङ्गीकर्त्तव्यं। आत्मत्वलक्षणजातियोग इति चेत्। न। सर्व्वस्यैव हि जातियोगः सम्भवति। अतो जातिभ्यो वैलक्षण्यमात्मनोऽवश्यमङ्गीकर्त्तव्यं। तच्चाधिष्ठातृत्वं चिद्रूपतयैव घटते नान्यथा।

यैरपि मीमांसकैः कर्म्म-कर्तृरूप आत्माङ्गीक्रियते। तेषामपि न युक्तः पक्षः। तथाहि अहंप्रत्ययग्राह्य आत्मेति तेषां प्रतिज्ञा अहंप्रत्यये च कर्तृत्वं कर्म्मत्वञ्चात्मन एव। न चैतद्विरुद्धत्वादुपपद्यते कर्तृत्वं प्रमातृत्वं, कर्म्मत्वञ्च प्रमेयत्वं। न चैतद्विरुद्धधर्म्माध्यासो युगपदेकस्य घटते, यद्विरुद्धधर्म्माध्यस्तं न तदेकं। यथा भावाभावौ। विरुद्धे च कर्तृत्व-कर्म्मत्वे। अथोच्यते। न कर्तृत्व-कर्म्मत्वयोर्विरोधः, किन्तु कर्तृत्व-करणत्वयोः। नैतद्युक्तं, विरुद्धधर्म्माध्यासस्य तुल्यत्वात्। तस्मादहंप्रत्ययग्राह्यत्वं परित्यज्यात्मनोऽधिष्ठातृत्वमेवोपपन्नं, तच्च चेतनत्वमेव।

यैरपि द्रव्यपर्य्यायभेदेनात्मनोऽव्यापकस्य शरीरपरिमाणस्य परिणामित्वमिष्यते, तेषामुत्थानपराहत एव पक्षः। परिणामित्वे चिद्रूपताहानिः। चिद्रूपताभावे किमात्मन आत्मत्वं। तस्मादात्मन आत्मत्वमिच्छता चिद्रूपत्वमेवाङ्गीकर्त्तव्यं तच्चाधिष्ठातृत्वमेव।

Digitized by Google

केचित् कर्त्तृरूपमेवात्मानमिच्छन्ति । तथाहि विषयसन्निध्ये या ज्ञानलक्षणा क्रिया समुत्पन्ना तस्या विषयसंवित्तिः फलं, तस्याश्च फलरूपायां संवित्तौ स्वरूपं प्रकाशरूपतया प्रतिभासते, विषयश्च ग्राह्यतया, आत्मा ग्राहकत्वेन । घटमहं जानामीत्यनेनाकारेण तस्याः समुत्पत्तेः । क्रियायाः कारणं कर्त्तैव भवतीत्यतः कर्त्तृत्वं भोक्तृत्वञ्चात्मनो रूपमिति । तदनुपपन्नं । यस्मात्तासां संवित्तीनां किं कर्त्तृत्वं युगपत् प्रतिपद्यते क्रमेण वा । युगपत्कर्त्तृत्वे क्षणान्तरे तस्य कर्त्तृत्वं न स्यात् । अथ क्रमेण कर्त्तृत्वं, तदैकरूपस्य न घटते । एकेन रूपेण चेत्तस्य कर्त्तृत्वं तदा एकस्य सदैव सन्निहितत्वात् सर्व्वं फलमेकरूपं स्यात् । अथ नानारूपतया तस्य कर्त्तृत्वं तदा परिणामित्वं । परिणामित्वाच्च न चिद्रूपत्वं । अतश्चिद्रूपत्वमात्मन इच्छन्निर्भं साक्षात्कर्त्तृत्वमङ्गीकर्त्तव्यं । यादृशमस्माभिः कर्त्तृत्वमात्मनः प्रतिपादितं कूटस्थस्य नित्यस्य चिद्रूपस्य तदेवोपपन्नं ।

एतेन स्वप्रकाशस्वात्मनो विषयसंवित्तिद्वारेण ग्राहकत्वमभिव्यञ्जत इति ये वदन्ति, तेऽप्येतेनैव निराकृताः ।

केचिद्विमर्शात्मकत्वमात्मनश्चिच्छायत्वमिच्छन्ति । ते खल्वेनं विमर्शव्यतिरेकेण चिद्रूपत्वमात्मनो निरूपयितुं शक्यं । जडात् किञ्च वैलक्षण्यं चिद्रूपत्वमुच्यते । तच्च विमर्शव्यतिरेकेणानिरूप्यमाणं नाव्यवतिष्ठते । तदनुपपन्नं । इदमित्थमेवंरूपमिति यो विचारः स विमर्श इत्युच्यते, स चास्मितान्यतिरेकेणेत्यात्मनेव न लभ्यते । तथाहि आत्मन्युपजायमानो विमर्शः अहमेवम्भूत इत्यनेनाकारेण संवेद्यते । ततश्चाहंशब्दसन्निवेशस्वात्मलक्षणस्यार्थस्य तच्च स्फुरणान्न विकल्पस्वरूप-

तातिक्रमः। विकल्पसाध्यवसायात्मा बुद्धिधर्मो न चिद्धर्मः। कूटस्थनित्यत्वेन चितेः सदैकरूपत्वान्नाहंकारानुप्रवेशः। तद्नेन सविमर्शत्वमात्मनः प्रतिपाद्यता बुद्धिरेवात्मत्वेन भ्रान्त्या प्रतिपादिता, न प्रकाशात्मनः परस्य पुरुषस्य स्वरूपमवगतमिति।

एवं सर्वेष्वपि दर्शनेष्वधिष्ठातृत्वं विहाय नान्यदात्मनो रूपमुपपद्यते। अधिष्ठातृत्वञ्च चिद्रूपत्वं। तच्च जडादैलक्षण्यमेव। चिद्रूपतया यदधितिष्ठति तदेव भोग्यतां भवति*। यच्च चेतनाधिष्ठितं तदेव सकलव्यवहारयोग्यं भवति। एवञ्च सति कृतकृत्यत्वात् प्रधानस्य व्यापारनिवृत्तौ यदात्मनः कैवल्यमस्माभिरुक्तं तदिहाय दर्शनान्तराणामपि नान्या गतिरस्ति तस्मादिदमेव युक्तमुक्तं वृत्तिसारूप्यपरीहारेण स्वरूपप्रतिष्ठा चितिशक्तेः कैवल्यं।

तदेवं सिद्धान्तरेभ्यो विलक्षणां सर्वसिद्धिमूलभूतां समाधिसिद्धिमभिधाय जात्यन्तरपरिणामलक्षणस्य च सिद्धिविशेषस्य प्रकृत्यापूरणमेव कारणमित्युपपाद्य धर्मादीनां प्रतिबन्धकनिवृत्तिमात्र एव सामर्थ्यमिति प्रदर्श्य निर्माणचित्तानामस्मितामात्रादुद्भव इत्युक्त्वा तेषाञ्च योगिचित्तमेवाधिष्ठानात्मकमिति प्रदर्श्य योगिचित्तस्य चित्तान्तरवैलक्षण्यमभिधाय तत्कर्मणामलौकिकत्वञ्चोपपाद्य विपाकानुगुणानां वासनानामभिव्यक्तिसामर्थ्यं कार्यकारणयोरैक्यप्रतिपादनेन व्यवहितानामपि वासनानामानन्तर्यमुपपाद्य तासामानन्तर्येपि हेतुफलादिद्वारेण ज्ञानमुपदिश्यातीतादिष्वध्वसु धर्माणां सद्भावमुपपाद्य वि-

---

* भोग्यतामेतीति C पुस्तकपाठः।

Digitized by Google

ज्ञानवादं निराकृत्य साकारवादं प्रतिष्ठाप्य पुरुषस्य ज्ञातृत्वमुक्त्वा चित्तद्वारेण सकलव्यवहारनिष्पत्तिमुपपाद्य पुरुषसिद्धौ प्रमाणमुपदर्श्य कैवल्यनिर्णयाय दशभिः सूत्रैः क्रमेणोपयोगिनोऽर्थानभिधाय ज्ञात्वान्तरेष्वेतदेव कैवल्यमित्युपपाद्य कैवल्यस्वरूपं निर्णीतमिति व्याकृतः कैवल्यपादः ।

सर्वे यस्य यशःप्रतापवसतेः पादाम्बुसेवागति-
प्रभ्रश्यन्मुकुटेषु मूर्द्धसु दधत्याज्ञां धरित्रीभृतः ।
यद्वक्त्राब्जमवाप्य गर्व्वमसमं वाग्देवतापि श्रिता
स श्रीभोजमहीपतिः फणिपतेः सूत्रेषु वृत्तिं व्यधात् ॥

इति श्रीमहाराजाधिराजश्रीभोजदेवविरचितायां राजमार्त्तण्डाभिधायां पातञ्जलयोगशास्त्रवृत्तौ कैवल्यपादश्चतुर्थः । समाप्ता चेयं पातञ्जलयोगसूत्रवृत्तिः ॥०॥

Digitized by Google

24.	Kathá Sarit Ságara, (English) Fasc. I—X @ 1/ each ..	Rs.	10	0
25.	Lalita Vistara, (Sans.) Fasc. I—VI @ /10/ each ..	..	3	12
26.	Ditto (English) Fasc. I—II	..	2	0
27.	Maitri Upanishad, (Sans. & English) Fasc. I—III @ /10/ each	..	1	14
28.	Mímámsá Darsana, (Sans.) Fasc. II—XVI @ /10/ each ..	..	9	6
29.	Márkandeya Puráṇa, (Sans.) Fasc. IV—VII @ /10/ each ..	..	2	8
30.	Nrisimha Tápaní, (Sans.) Fasc. I—III @ /10/ each ..	..	1	14
31.	Nirukta, (Sans.) Fasc. I—VI @ /10/ each	..	3	12
32.	Nárada Pancharátra, (Sans.) Fasc. III—IV @ /10/ each ..	..	1	4
33.	Nyáya Darsana, (Sans.) Fasc. I and III @ /10/ each ..	..	1	4
34.	Nítisára, or, The Elements of Polity, By Kámandaki, (Sans.) Fasc. II—IV		1	14
35.	Pingala Chhandah Sútra, (Sans.) Fasc. I—III @ /10/ each..	..	1	14
36.	Prithiráj Rásau, (Sans.) Fasc. I—V @ /10/ each ..	..	3	2
37.	Ditto (English) Fasc. I	..	1	0
38.	Páli Grammar, (English) Fasc. I and II @ /10/ each ..	..	1	4
39.	Prákṛita Lakshaṇam, (Sans.) Fasc. I	..	1	8
40.	Parásara Smriti (Sans.) Fasc. I	..	0	10
41.	Rig Veda, (Sans.) Vol. I, Fasc. IV	..	0	10
42.	Srauta Sútra of Ápastamba, (Sans.) Fasc. I—V @ /10/ each	..	3	2
43.	Ditto Aśvaláyana, (Sans.) Fasc. I—XI @ /10/ each	..	6	14
44.	Ditto Látyáyana (Sans.) Fasc. I—IX @ /10/ each	..	5	10
45.	Sáma Veda Saṃhitá, (Sans.) Fasc. I—XXXVII @ /10/ each	..	23	2
46.	Sáhitya Darpaṇa, (English) Fasc. I—IV @ /10/ each ..	..	2	8
47.	Sáṅkhya Aphorisms of Kapila, (English) Fasc. I and II @ /10/ each	..	1	4
48.	Súrya Siddhánta, (Sans.) Fasc. IV	..	0	10
49.	Sarva Darsana Sangraha, (Sans.) Fasc. II	..	0	10
50.	Saṅkara Vijaya, (Sans.) Fasc. II and III @ /10/ each ..	..	1	4
51.	Sáṅkhya Pravachana Bháshya, (English) Fasc. III ..	..	0	10
52.	Sáṅkhya Sára, (Sans.) Fasc. I	..	0	10
53.	Suśruta Saṃhita, (Sans.) Fasc. I	..	0	10
54.	Taittiríya Áraṇyaka, (Sans.) Fasc. I—XI @ /10/ each ..	..	6	14
55.	Ditto Bráhmaṇa (Sans.) Fasc. I—XXIV @ /10/ each ..	..	15	0
56.	Ditto Saṃhitá, (Sans.) Fasc I—XXXII @ /10/ each ..	..	20	0
57.	Ditto Prátiśákhya, (Sans.) Fasc. I—III @ /10/ each ..	..	1	14
58.	Ditto and Aitareya Upanishads, (Sans.) Fasc. II and III@ /10/ each		1	4
59.	Ditto Aitareya Śvetáśvatara Kena Íśá Upanishads, (English) Fasc. I and II @ /10/ each	..	1	4
60.	Táṇḍyá Bráhmaṇa, (Sans.) Fasc. I—XIX @ /10/ each ..	..	11	14
61.	Uttara Naishadha, (Sans.) Fasc. II—XII @ /10/ each ..	..	6	14
62.	Váyu Puráṇa, (Sans.) Vol. I, Fasc. I—VI; Vol. II, Fasc. I—III @ /10/ each	..	5	10
63.	Vishṇu Smriti, (Sans.) Fasc. I—II @ /10/ each ..	..	1	4
64.	Yoga Sútra of Patanjali, (Sans. & English) Fasc. I—IV. ..	..	4	6

Arabic and Persian Series.

1.	'Alamgírnámah, with Index, (Text) Fasc. I—XIII @ /10/ each ..	..	8	2
2.	Ain-i-Akbarí, (Text) Fasc. I—XXII @ 1/4 each ..	..	27	8
3.	Ditto (English) Vol. I (Fasc. I—VII)	..	12	4
4.	Akbarnámah, with Index, (Text) Fasc. I—XXII @ 1/4 each	..	27	8
5.	Bádsháhnámah with Index, (Text) Fasc. I—XIX @ /10/ each	..	11	14
6.	Beale's Oriental Biographical Dictionary, pp. 291, 4to, thick paper, @ 4/12; thin paper	..	4	8
7.	Dictionary of Arabic Technical Terms and Appendix, Fasc. I—XXI @ 1/4 each	..	26	4
8.	Farhang-i-Rashídí (Text), Fasc. I—XIV @ 1/4 each ..	..	17	8
9.	Fihrist-i-Túsí, or, Túsy's list of Shy'ah Books, (Text) Fasc. I—IV @ /12/ each	..	3	0
10.	Futúh-ul-Shám Waqídí, (Text) Fasc. I—IX @ /10/ each ..	..	5	10
11.	Ditto Azádí, (Text) Fasc. I—IV @ /10/ each ..	..	2	8
12.	Haft Asmán, History of the Persian Masnawi. (Text) Fasc. I	..	1	8
13.	History of the Caliphs, (English) Fasc. I—VI @ 1/ each ..	..	6	0
14.	Iqbálnámah-i-Jahángirí, (Text) Fasc. I—III @ /10/ each ..	..	1	14
15.	Isabáh, with Supplement, (Text) Fasc. I—XXXI @ /12/ each	..	23	4
16.	Maghází of Wáqidí, (Text) Fasc. I—V @ /10/ each ..	..	3	2
17.	Muntakhab-ul-Tawáríkh, (Text) Fasc. I—XV @ /10/ each..	..	9	6

Digitized by Google

18.	Muntakhab-ul-Lubáb, (Text) Fasc. I—XVIII @ /10/ each, and Fasc. XIX with Index @ /12/	12	0
19.	Mu'ásir-i-'Alamgírí (Text), Fasc. I—VI @ /10/ each	3	12
20.	Nukhbat-ul-Fikr, (Text) Fasc. I	0	10
21.	Nizámí's Khiradnámah-i-Iskandarí, (Text) Fasc. I and II @ 1/ each ..	2	0
22.	Suyúty's Itqán, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. II—IV, VII—X @ 1/4 each	8	12
23.	Ṭabaqát-i-Náṣirí, (Text) Fasc. I—V @ /10/ each	3	2
24.	Ditto (English) Fasc. I—XIV @ 1/ each	14	0
25.	Táríkh-i-Fíruz Sháhi, (Text) Fasc. I—VII @ /10/ each	4	6
26.	Táríkh-i-Baihaqí, (Text) Fasc. I—IX @ /10/ each	5	10
27.	Wís o Rámín, (Text) Fasc. I—V @ /10/ each	3	2

ASIATIC SOCIETY'S PUBLICATIONS.

1.	Asiatic Researches. Vols. VII—XI; Vols. XIII and XVII, and Vols. XIX and XX @ 10/ each	90	0
	Ditto Index to Vols. I—XVIII	5	0
2.	Proceedings of the Asiatic Society from 1865 to 1869 (incl.) @ /4/ per No.; and from 1870 to date @ /8/ per No.		
	Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1849 (12), 1850 (7), @ 1/ per No. to Subscribers and @ 1/8 per No. to Non-Subscribers; and for 1851 (7), 1857 (6), 1858 (5), 1861 (4), 1864 (5), 1865 (8), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), @ 1/8 per No. to Subscribers and @ 2/ per No. to Non-Subscribers.		
	N. B. The figures enclosed in brackets give the number of Nos. in each Volume.		
	General Cunningham's Archæological Survey Report for 1863-64 (Extra No., J. A. S. B., 1864)	2	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., J. A. S. B., 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., J. A. S. B., 1875)	4	0
	Sketch of the Turki Language as spoken in Eastern Turkestan, Part II, Vocabulary, by R. B. Shaw (Extra No., J. A. S. B., 1878) ..	4	0
	A Grammar and Vocabulary of the Northern Balochí Language, by M. L. Dames (Extra No., J. A. S. B., 1880)	4	0
	Introduction to the Maithili Language of North Bihár, by G. A. Grierson, Part I, Grammar (Extra No., J. A. S. B., 1880)	2	0
	Part II, Chrestomathy and Vocabulary (Extra No., J. A. S. B., 1882)..	4	0
4.	Aborigines of India, by B. H. Hodgson	3	0
5.	Anis-ul-Musharrihin	3	0
6.	Catalogue of Fossil Vertebrata	2	0
7.	Ditto of Arabic and Persian Manuscripts	1	0
8.	Examination and Analysis of the Mackenzie Manuscripts by the Rev. W. Taylor	2	0
9.	Han Koong Tsew, or the Sorrows of Han, by J. Francis Davis ..	1	8
10.	Iṣṭiláhát-us-Ṣúfíyah, edited by Dr. A. Sprenger, 8vo.	1	0
11.	Ináyah, a Commentary on the Hidáyah, Vols. II and IV, @ 16/ each ..	32	0
12	Jawámi-ul-'ilm ir-riyází, 168 pages with 17 plates, 4to. Part I ..	2	0
13.	Khizánat-ul-'ilm	4	0
14.	Mahábhárata, Vols. III and IV, @ 20/ each	40	0
15.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I—II, with 5 coloured Plates, 4to. @ 6/ each	12	0
16.	Puráṇa Sangraha, I (Markandeya Purana), Sanskrit	1	0
17.	Sharaya-ool-Islám	4	0
18.	Tibetan Dictionary	10	0
19	Ditto Grammar	8	0
20.	Vattodaya, edited by Lt.-Col. G. E. Fryer	2	0
	Notices of Sanskrit Manuscripts, Fasc. I—XVII @ 1/ each ..	17	0
	Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ..	5	0

Digitized by Google